MANJUSHA 1951 G.K.V.

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीशिवः शरणम्

५म-वर्षे February, 1951. ६८-संख्या

सम्पादकः—श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

मञ्जूषा

1111 26.

Principal Contents.

Haomo Yasht with notes and translation by Dr. I. J. S. Tarporevala, B.A., Ph. D., Barrister-at-Law.

Usha-hymn with a new commentary.

Christian prayer with their Sanskrit equivalents.

The Problem of Demarcation (Serial Story) by Sri Upendranath Ganguly.

Doubtful grammatical forms in the Bhaṭṭi-Kāvya.

Mahabhāṣya with notes and Translation.

Critical Observations on the text of Sayana's Commentary on the Rigveda.

Next Month

Kātantra-Vistara of Vardhamāna—Karaka section.

Technical Terms in the Phiṭ-sūtras.

Dr. M. Winternitz wrote to the Editor :

I have often to refer to it just now in preparing the English translation of Vol. III of my History of Indian Literature.

Office : 81 Shyambazar Street, Calcutta—4

Annual Subscription : Rupees Six only.

Foreign—Rupees Nine.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काव्यालङ्कारसूत्रवृत्तिः (वामनविरचिता ५।१)
अभिनवविशदविस्तृतटीकोपेता Rs. 2

Convocation Address in Ancient India -8-

स्त्रीप्रशंसा—The original slokas of Varāhamihira with a splendid Sanskrit commentary Re. 1/-

Popular Etymology Re. 1/-

শব্দকথা—সরস সরল ভাষাতত্ত্ব— ২৲

উষার আলো—হাসির গল্পের সমষ্টি— ৸৹

নক্ষত্রমালা—ধর্মবিষয়ক শ্লোক ও অনুবাদ— ।৴৹

मञ्जूषाया नियमावली

१। मञ्जूषाया वार्षिकं मूल्यं रूपकषट्कम्। ग्राहकैर्वर्षस्य प्रथमसंख्यात एव ग्रहीतव्यम्।

२। प्रतिसौरमासं दशमदिने (आङ्लमासस्य चतुर्विंशे दिवसे) 81, Shyambazar Street, Calcutta 4 इत्यतो मञ्जूषा प्रकाश्यते।

३। मञ्जूषायास्तावद् भागत्रितयं वर्तते। तत्र प्रथमे भागे देवभाषां प्रविविक्षूणां कृते सरलाः श्लोकाः, आभाणकाः, कथाः, आख्यानानि च सन्निवेश्यन्ते, द्वितीये भागे दार्शनिकाः प्रबन्धाः, व्याकरणालङ्कारादीनां विमर्शाः, पाठविचारः, जिज्ञासा मीमांसा च, पुस्तकपरिचयादयश्च प्रकाश्यन्ते; तृतीये भागे सानुवादाः पारसीकानां गाथाः, साङ्लानुवादं महाभाष्यम्, ऋग्वेदश्च सभाष्यो मुद्र्यन्ते।

Several complete sets of Vol. IV of the Manjusha are still available for Rs. 6/- and only a few sets of Vols. I-III are available at Rs. 5/12/- for the lot.

श्रीविश्वनाथ चट्टोपाध्यायः।

८१ श्यामबाजार ष्ट्रीट्, कलिकाता ४।

81, Shyambazar Street, Calcutta 4.

Phone: B. B. 4049.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
111126

शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम् ॥

मञ्जूषा

February, 1951. | १८७२-शकीय-फाल्गुनस्य ५म-वर्षस्य षष्ठ-संख्या | Vol. V No. 6

सुभाषितादि

१। अनन्तपारं किल शब्दशास्त्रं
स्वल्पं तथायुर्बहवश्च विघ्नाः ।
सारं ततो ग्राह्यमपास्य फल्गु
हंसैर्यथा क्षीरमिवाम्बुमध्यात् ॥
अनन्तशास्त्रं बहुलाश्च विद्याः
स्वल्पश्च कालो बहुविघ्नता च ।
यत् सारभूतं तदुपासनीयं
हंसो यथा क्षीरमिवाम्बुमिश्रम् ॥

(ला) Ars longa, vita brevis.
"Art is long, and time is fleeting."

२। कालो न यातो वयमेव याताः । भर्तृहरिः
"Time goes, you say? Ah, no!
Alas, Time stays; *we* go." AUSTIN DOBSON.

३। "Every hour of lost time is a chance of future misfortune." NAPOLEON.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षण एकोऽपि कालस्य क्षपितस्य विनोद्यभम् ।
आपदः स्याद्भविष्यन्त्या निदानत्वाय कर्हिचित् ॥ ओकः ।

४ । केह देखे शेखे, केह ठेके शेखे ।
कोऽपि दृष्ट्वा शिक्षते, कोऽपि प्रतिहतः शिक्षते ।

(शा) Andrer Torheit sei deine Weisheit.
परेषामिह मूर्खत्वं तव ज्ञानाय कल्पताम् ।

उषःस्तोत्रम् (ऋग्वेद १।४९)

[काश्यप-श्रीक्षितीशचन्द्र-चट्टोपाध्यायेन व्याख्यातम्]

संहितापाठः	पदपाठः
उषो भद्रेभिरा गहि	उषः । भद्रेभिः । आ । गहि ।
दिवश्चिद्रोचनादधि ।	दिवः । चित् । रोचनात् । अधि ।
वहन्त्वरुणप्सव	वहन्तु । अरुणऽप्सवः ।
उप त्वा सोमिनो गृहम् ॥ १ ॥	उप । त्वा । सोमिनः । गृहम् ॥

Come (*ā' gahi*), Dawn (*Uṣah*) with thine auspicious (*bhadre'bhih*) [wealth], even (*cit*) from above (*a'dhi*) heaven's (*diva'h*) bright realm (*rocanāt*). May thy [steeds] of ruddy forms (*aruṇa'-psavah*) waft (*u'pa va'hantu*) thee (*tvā*) to the Soma-giver's (*somi'nah*) house (*gṛha'm*).

कुसुमाञ्जलिः । अये 'उषः' देवि ! 'दिवः' स्वर्गस्य 'चित्' एव । चिदित्येषोऽनेककर्मा निपातोऽत्रैवार्थे द्रष्टव्यः, सद्यश्चि-दित्यादिषु यथा । रोचनात् दीप्यमानात् लोकात् । विशेषण-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मात्रप्रयोगो विशेषप्रतिपत्तौ। अधि उपरिस्थात् इत्यर्थः। तथाच भगवान् यास्कः "अधिरुपरिभावे" इति। यद्वा अधिरित्यनर्थको निपातः, "अधिपरी अनर्थकौ" [१।४।९३] इति पाणिनिस्मरणात्। भद्रेभिः रत्नद्रविणादिभिः। "यद्वै पुरुषस्य वित्तं तद् भद्रं गृहा भद्रं प्रजा भद्रं पशवो भद्रम्" इति शाट्यायनिनः समामनन्ति। "इन्द्रो नो राधसागमत्" [ऋ० सं० ४।५५।१०] इतिवत् सहार्थे तृतीया। तथाहि—

सह वामेन न उषो व्युच्छा दुहितर्दिवः।
सह द्युम्नेन बृहता विभावरि राया देवि दास्वती॥

इति पूर्वसूक्तस्य प्रारम्भे श्रूयते।

त्यं त्येभिरा गहि वाजेभिर्दुहितर्दिवः।
अस्मे रयिं नि धारय॥

[१।३०।२२] इत्यपि निगमो भवति। भद्रेभिः कल्याणैरश्वैः इति स्कन्दस्वामी। कल्याणै रश्मिभिरिति पाश्चात्याः। आ गहि आगच्छ। अरुणप्सवः अरुणा आरक्तवर्णाः प्सवः रूपाणि येषां ते आरक्तरूपा वाहाः। ते चाश्वाः। तथाच निगमा भवन्ति— "प्रबोधयन्त्यरुणेभिरश्वैरोषा याति सुयुजा रथेन" [ऋ० सं १।११३। १४]। "वि तद् ययुररुणयुग्भिरश्वैश्चित्रं भान्त्युषसश्चन्द्ररथाः" [ऋ० सं० ६।६५।२] इत्यादयः। यद्वा आरक्तवर्णा गावः। तथाच निगमः—वहन्ति सीमरुणासो रुशन्तो गावः सुभगामुर्विया प्रथानाम् [६।६४।३] इति। "पृषत्योऽश्वास्तु मरुतां गावोऽरुण्यस्तथोषसाम्" इति च स्मर्यते। प्सा भक्षणे इति धातोर्बाहुलकात् औणादिके कुप्रत्यये "आतो लोप इटि च" [६।४।६४] इत्याकारलोपे प्सुरिति पदम्। तस्य च प्राथमिकोऽर्थः मुखम्, ततो मुखोपलक्षितं रूपम्, ततो वर्णस्तत आकारः। अत एव प्सुशब्दो निर्णिगादिषु षोड़शसु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॰रूपनामसु समाम्नायते। त्वा त्वां सोमिनः सोऽवतः गृहं सदनम् उपवहन्तु प्रापयन्तु।

(क्रमशः)

परमं प्रमाणम्

काष्ठमयात् सोपानपथान्निपतिता भृशं पीड़िता काचन परिचारिका क्षतिपूरणार्थं धर्माधिकरणमाश्रितवती। तस्याः समीचीनतमः साक्षी काष्ठसोपानपथोऽपि धर्माधिकरणं मण्डयामास। तया चोक्तम्, सोपानपथोऽयं जीर्णो विपज्जनकश्चेति। तस्याश्च स्वामिन्या व्यवहाराजीवेन सोपानपथस्य समीचीनत्वं प्रमापयितुं प्रयतितम्। तदर्थमसावुत्प्लुत्य सोपानस्य शिखरभागमनुप्राप्य तत्र स्थितः, ततश्च वेगेन तदुपरि न्यपतत्, तस्य च भारेण सोपानपथोऽयं खण्डशो भूमौ न्यपतत्। व्यवहाराजीवश्च भूमित उत्थायावदत् प्राड्विवाकम्, महाभाग स्वयमेव प्रत्यक्षीकृतं भवता सोपानपथस्य कठिनत्वं निर्माणपाटवं च। मम भारस्तावन्मणद्वितयम्, सर्वात्मना प्रयतमानेन मयोर्ध्वतो वेगेन निपत्यायं भग्नः, अन्यथायमक्षत एवासीत्।

प्राड्विवाकेन तस्यैव जयो व्यवस्थापितः।

आत्मानं विद्धि

अपि नाम भवानेव स मनोदर्शको यो हीराद्वयात् पूर्वं सूच्यादीनि सूक्ष्मवस्तूनि जनैर्निगूढं स्थापितानि प्रादुष्कृत्य जनांस्तोषयन्नासीत्?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ किम् ।

किमितीयच्चिरं भवानत्रैवावतिष्ठते ?

अहं तावन्मदीयं छत्रमन्विष्यामि ।

पाणिनीया पद्धतिः

शकटनन्ददेशीयः कश्चन शस्त्रचिकित्सकोऽतिमात्रं स्वल्पभाषणपर आसीत् । एकदा स मितभाषणे स्त्रीजनेन केनचन व्यजीयत । सा हि नितरां स्फीतरक्तबाहुस्तस्य चिकित्साशालां प्राप । इत्थं च तयोः संलापोऽभूत् । प्रथमवक्ता च प्रतिवारं भिषगेव ।

"दाहः ?"

"आघातः ।"

"प्रलेपः ।"

परेद्यवि पुनरपि सा महिला समागता ।

"स्वस्थतरा ?"

"अस्वस्थतरा ।"

"पुनरपि प्रलेपः ।"

दिनद्वयादूर्ध्वं पुनरपि सा समागता ।

"विशेषः ?"

"स्वास्थ्यम् । प्रदेयम् ?"

"न किञ्चित् । ईदृशी बुद्धिमती न कदाचिन्मया दृष्टपूर्वा ।"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

युद्धप्रशमप्रार्थना

[श्रीमन्महालिङ्गशास्त्रि-विरचिता]

हे राजानः शृणुत मसृणां वाचमस्मद्विधानां
मा विद्वेषात्प्रहरत मिथो रक्षतान्योन्यसीमाः ।
युद्धारम्भे गणयत जनोन्माथमर्थक्षतिं च
प्राज्यं राज्ये परिकलयत क्षेममाजावजाते* ॥ १ ॥

प्रत्यन्ते वः प्रशमरसिकः कश्चिदास्ते प्रतुष्यन्
यस्मिन्नीर्ष्याकलुषितहृदो मेषशालावृकीयम् ।
यूयं न्यायं सरभसमुपावर्तयन्तः समिद्धा-
काण्डक्रोधाः प्रहतपटहा हेतिमापातयध्वे ॥ २ ॥

पादातैर्वः सरथतुरगैर्भारवाहप्रवाहैः
सेनाश्रेणी प्रतिभयरवा निःसहा निःसरन्ती ।
अध्वन्यध्वन्यशरणतया प्राणिषु प्रद्रवत्सु
क्षेत्रारामान् परिणतफलान् रंहसा जङ्घनीति ॥ ३ ॥

अन्नं पानं सुबहु सुषमा भूयसी यत्र पूर्वं
तत्रानीकाचरितदुरितैर्मारवं दारुणत्वम् ॥
शस्त्रारब्धं प्रधनमथ तौ भूरि विस्तारयन्तौ
तद्दायादौ भुवि विहरतो व्याधिदुर्भिक्षयोगौ ॥ ४ ॥

इत्यासुर्या विजितभुवना घातुकप्रायवृत्त्या
प्रत्यायाताः स्वपुरमभितो वन्दिभिः स्तूयमानाः ।
हृष्टा यूयं निवसथ गृहे बालिशाश्चर्यचर्या
लोकस्तावच्चिरमनुभवत्यायतिं यातनानाम् ॥ ५ ॥

* पाठान्तरम् "आजेरभावे" ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

युद्धे चैवं जगति विरते सम्भ्रमे सन्निवृत्तेऽ-
प्यासन्नं स्यादनुपदमहो न प्रजानां सुभिक्षम् ।
दूरे तासामुपचयरसैरुत्प्रमोदाः प्रसङ्गाः
सीदन्तीनामहह बहुशो दुर्दशाक्लेशभाजाम् ॥ ६ ॥
क्षोणीकोणानधिगतवतां भर्तृभावं गतानां
हन्तैतेषामगतिषु कृतं दुर्नयैः किं न विघ्नः ।
यत्रान्यत्र क्वचिदपि भवेदानृशंस्यं प्रशस्यं
तत्र स्यान्नः स्थितिरिति मुहुः प्रार्थनां संविदध्म ॥ ७ ॥
निःसादत्त्यव्यतिकरसुखो निर्भरोर्वीविकास-
श्रीमान् कालः परिवहतु नो भारते जन्मभाजाम् ।
रक्षायोगात् प्रकृतिषु हितः पार्थिवः सज्जनाना-
मुच्छ्रायाय प्रतिहतखलोपद्रवः प्रोज्जिहीताम् ॥ ८ ॥

[WAR BY COWPER

Fast by the stream that bounds your just domain,
And tells you where you have a right to reign,
A nation dwells, not envious of your throne,
Studious of peace, their neighbour's and their own.
Ill-fated race ! how deeply must they rue
Their only crime, vicinity to you !
The trumpet sounds, your legions swarm abroad,
Through the ripe harvest lies their destined road ;
At every step, beneath their feet they tread
The life of multitudes, a nation's bread.
Earth seems a garden in its loveliest dress
Before them, and behind a wilderness ;
Famine, and Pestilence her first-born son,
Attend to finish what the Sword began ;
And echoing praises, such as fiends might earn
And folly pays, resound at your return.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

A calm succeeds ; but Plenty with her train
Of heart-felt joys, succeeds not soon again,
And years of pining indigence must show
What scourges are the gods that rule below.
Oh, place me in some heaven-protected isle,
Where peace and equity and freedom smile,
Where no volcano pours his fiery flood,
No crested warrior dips his plume in blood,
Where power secures what industry hath won,
Where to succeed is not to be undone,
A land that distant tyrants hate in vain,
In Britain's isle, beneath a George's reign.]

भट्टिप्रयोगविमर्शः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

विदितमेवैतत् प्रायेण प्रियवाचकमहाभागानां यद्दजुमार्गेण व्याकरणरहस्यावबोधनायैव प्रवृत्तं भट्टिकाव्यापराख्यं दशाननवध-काव्यम्। परं तत्रत्याः केचनापाणिनीयाः प्रयोगा व्याकुलीकुर्वन्ति मानसानि सहृदयानाम्। तेषु चान्यतमोऽनुजानातेरात्मनेपदप्रयोगः। तथाहि—

क्रुध्यन् कुलं धक्ष्यति विप्रवह्नि-
र्यास्यन् सुतस्तप्स्यति मां समन्युम्।
इत्थं नृपः पूर्वमवालुलोचे
ततोऽनुजज्ञे गमनं सुतस्य॥ १। २३

ईक्षाञ्चक्रेऽथ सौमित्रिमनुजज्ञे वलानि च।
नमश्चकार देवेभ्यः पर्णतल्पं मुमोच च॥ १४। १८

इति श्लोकद्वये मुद्रितेषु हस्तलिखितेषु च पुस्तकेषु "अनुजज्ञे" इति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पदनुपलभ्यते । तच्च न सिध्यति, पाणिनिप्रमुखैर्वैयाकरणैः शुद्धस्यानुजानातेरात्मनेपदस्याविधानात्।

अत्रादौ टीकाकृतां मतान्युद्ध्रियन्ते।

जयमङ्गला। अनुज्ञातं नृपेणेति विभक्तिविपरिणामेन तेनेति योज्यम्। कर्मणि लिट्। ज्ञा अवबोधने इति परस्मैपदित्वात्। न चानुपूर्वादस्मादात्मनेपदं विहितम्। १। २४। अनुपूर्वो जानातिरनुज्ञाने वर्तते, तस्य परस्मैपदित्वात् "अनुपसर्गाज् ज्ञः" [१।३।७६] इति वचनादात्मनेपदम्, उपसर्गेण युक्तत्वात्(?)। १४।१८।

सर्वपथीना। तत आलोचनानन्तरं सुतस्य गमनमनुमेने अङ्गीचकार, कुलदाहादात्मसन्तापमात्रं वरमिति निश्चयादिति भावः। मन्यतेः कर्तरि लिट्। कौमुद्यान्तु "ततोऽनुजज्ञे" इति पाठमनुसृत्य अनुपसर्गाज् ज्ञ इति शास्त्रप्रातिकूल्यमुद्भाव्य नृप इत्यत्र नृपेणेति विपरिणामं कृत्वा दोषपरिहारः कृतः॥ तदा अनुजज्ञे अनुज्ञातम्। कर्मणि जानाते रूपम्। १।२४। बलानि चानुजज्ञे योद्धुमिति शेषः। १४।१८

कलापचन्द्रः। उपसर्गप्रतिरूपकोऽयम् अनुशब्द इति अनुपसर्गाज् ज्ञ इति पाणिनिमते आत्मनेपदम्। अस्मन्मतेऽपि तादृशस्य रुचादौ पाठोऽङ्गीकर्तव्य इति कातन्त्रप्रदीपे व्याख्यातम्। अन्ये तु तम् अनु लक्षीकृत्य ज्ञातवान् इत्यर्थः। यद्वा विभक्तिव्यत्ययेन सुतस्य गमनं तेनानुजज्ञे इति कर्मणि प्रत्ययः। तत इत्यस्य तेनेत्यर्थः। आद्यादेराकृतिगणत्वाद् विभक्त्यन्तरादपि तसित्याहुः। १।२४। यद्यपि "अकर्मकश्च" [आख्यात २।७६।४०] इति रुचादिगणसूत्रस्य नायं विषयः सकर्मकत्वात्, तथापि अनु पश्चात् बलानि ज्ञातवान् इत्यर्थात् अनुपसर्गाज् ज्ञ इति यजादिपाठात् [आख्यात २।७६] उभयपदम्। अथवा उपसर्गप्रतिरूपकोऽयं निपात इति प्राञ्चः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याकरणव्याख्यानेषु च प्रायेणेमे एव पक्षाः सन्दृश्यन्ते।

सर्वपथीनाकारेण "प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्" इति न्यायमूरीकृत्य प्रथमसर्गे "अनुमेने" इति पाठः स्वीकृतः। परं पाठान्तरं कल्पनीयं चेत् किमित्युभयत्रापि अनुजज्ञौ इति शुद्धः पाठो न कल्प्यते? यथा वयं पश्यामस्तथोभयत्रापि अनुजज्ञौ इति वा पठनीयम्, व्याकरणान्तरमतेन अनुपूर्वस्य जानातेरुभयपदित्वं वाङ्गीकरणीयम्। इतिहास-पुराणादिषु अनुजानातेरात्मनेपद-प्रयोगा बाहुल्येनोपलभ्यन्ते। तथाहि—

तत् सौम्य गम्यताम्, अनुजाने भवन्तं श्रेयोऽवाप्स्यसीति। महाभा, आदि ३।१७०

अनुजज्ञे तदा ज्येष्ठामम्बां काशीपतेः सुताम् ।१०२।६४

श्रुत्वैव च महाबाहुरनुजज्ञे स पाण्डवः १।२१९।२५।

"नन्वित्यनुज्ञैषणायाम्" [८।१।४३] इति सूत्रस्य काशिकायां दृश्यते—

ननु इत्यनेन युक्तं तिङन्तं नानुदात्तं भवति अनुज्ञैषणायां विषये। अनुज्ञाया एषणा प्रार्थना अनुज्ञैषणा। अनुज्ञाप्रार्थनेत्यर्थः। ननु करोमि भोः। अनुजानीष्व मां गमनं प्रतीत्यर्थः। अनुज्ञैषणाया-मिति किम्? अकार्षीः कटं देवदत्त? ननु करोमि भोः। पृष्ट-प्रतिवचनमेतन्नानुज्ञैषणा*। इति।

---

* अनुज्ञाया एषणा प्रार्थनेति। किञ्चित् कर्तुं स्वयमेवोद्यतस्यैवं क्रियतामित्यनुज्ञानमनुज्ञा। प्रार्थनायां मूलोदाहरणयोः "वर्तमाने लट्" [३।२।१२३] इति लट्। प्रत्युदाहरणे तु भूते "ननौ पृष्टप्रतिवचने" [३।२।१२०] इत्यनेन। न्यासः॥ सूत्रार्थमुदाहरणेन दर्शयति—करणं प्रतीति। करणगमने प्रतीत्यर्थः। उदाहरणे वर्तमाने लट्, प्रत्युदाहरणे तु भूते ननौ पष्टप्रतिवचने इत्यनेन। पदमञ्जरी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

The root *jñā* is *ubhayapadin* in Vedic literature. In the Dhātupāṭha it is Kryādi Parasmaipadin : ज्ञा अवबोधने. Acc. to Pāṇini, by itself it is Ātmanepadin when intransitive or when the fruit of the action accrues to the agent, with *apa* it is A. in the sense of *apahnava* or denial and with *sam* and *prati* it is A. except in the sense of 'remembering with longing'. In actual practice, however, *jñā* by itself as also when followed by *anu*, *ava*, *abhi*, *vi* and *pra* is used indiscriminately in either *pada*. In the Bhaṭṭikāvya we find ततोऽनुजज्ञे गमनं सुतस्य i. 24 and अनुजज्ञे बलानि च xiv. 18. Probably in both these cases the correct reading is अनुजज्ञौ. In the Buddhacarita, we find प्रजज्ञिरे in the stanza (iv. 5) :

सौम्यत्वाच्चैव धैर्याच्च काश्चिदेनं प्रजज्ञिरे।
अवतीर्णो महीं साक्षाद् गूढांशुश्चन्द्रमा इति ॥

In the Bhāṣyas of S'aṅkarācārya, *ava-jñā* is often found used in the Ātmanepada*, but in all these cases the correct reading would appear to be *apa* and not *ava*. Some of the South Indian scripts are notorious for their confusion of प and व. In the Caraka Saṁhitā we find न स्त्रियमवजानीत i. 8. 22 and a few lines later न च कञ्चिदवजानीयात् i. 8. 25.

न्यासे विस्पष्टमेव "मूलोदाहरणयोः" इत्यत्र द्विवचनं वर्तते, पदमञ्जर्यामपि करणगमने प्रति इत्यत्रोदाहरणद्वितयं निर्दिष्टम्। अत एव पदमञ्जर्याम्— "उदाहरणे वर्तमाने लट्" इत्यत्र जातावेकवचनं बोध्यम्, 'उदाहरणयोः' इति वा पठनीयम्।

* नं च वयमुपभोगस्थानत्वं स्थावरजङ्गमानामवजानीमहे। ब्रह्मसू. भाष्य ३।१।२४

न हि वयं कर्मणः फलदायिनीं शक्तिमवजानीमहे, विद्यते हि सा। सा तु विद्यादिना कारणान्तरेण प्रतिबध्यत इति वदामः। ब्र. सू. भा. ४।१।१३

In both these cases the correct reading is undoubtedly अपजानीमहे.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्र विस्पष्टमेव केचन प्रमादा वर्तन्ते। तथाहि—"अनुज्ञाप्रार्थनेत्यर्थः" इत्यंशोऽतिरिक्त इव प्रतीयते। "ननु करोमि भोः" इत्यत ऊर्ध्वम् "ननु गच्छामि भोः" इति पाठ आवश्यकः। 'अनुजानीष्व मां गमनं प्रति' इत्यत्र 'अनुजानीत मां गमनं प्रति करणं प्रतीत्यर्थः' इत्येवंजातीयः पाठो युक्तः। वामनेन 'अनुजानीष्व' इति विलिखितं वा 'अनुजानीहि' इति विलिखितं वा इत्यत्र गरीयान् संशयो वर्तते, न्यासे वा पदमञ्जर्यां वा प्रतीकस्यास्यानुल्लेखात्, अनुजानीष्वपदस्य चापाणिनीयत्वात्। सिद्धान्तकौमुद्याम् अनुजानीहीति शुद्धमेवोपलभ्यते।

सोमा-समस्या

[श्रीउपेन्द्रनाथ-गङ्गोपाध्यायः]

(४)

प्रस्थिते समरेशे वनलता रेडिओयन्त्रोद्घाटनार्थं पाणिं प्रसारितवती, परं परस्मिन्नेव मुहूर्ते हस्तमपसार्य काष्ठासनं परित्यज्य समुत्थाय करणालयस्य द्वारविलम्बिन्यास्तिरस्करिण्याः पार्श्वमुपसृत्य निःशब्दं स्थितवती। बहोः कालादनन्तरं पुनरप्यद्य नेओयालालः कस्य वा निग्रहस्य करुणां प्रवृत्तिं वहन् समुपस्थित इति ज्ञातुं समुत्कण्ठते स्म तस्या मानसम्।

नेओयालालो हि समरेशस्य पुरातनो मक्केलः। यदा तावत् प्रथमतस्तेन साकं समरेशस्य परिचयः सञ्जातस्तदासौ केनसिङ्गटन्-आयरन्-ओयार्कस्-समाख्यायाः कर्मारशालायाः कस्यचिद् विभागस्य सुपारभाइजारः आसीत्। इतो वत्सरपञ्चकात् पूर्वमेकदा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाग्यान्वेषणाभिप्रायेण रेलकोम्पानिं विप्रलभ्य विनैव शुल्कपत्रम् आराप्रदेशस्य कस्माच्चनानाख्याताद् ग्रामादसौ कलिकातामुपस्थितः। तत्र पञ्चषाणि दिवसान्यसौ प्रायेण भिक्षार्जितैरेवान्नैः कथञ्चित् प्राणान् धारयामास, ततश्च भाग्यक्रमेण केनचन स्वदेशवासिना साकं तस्य साक्षात्कारः सञ्जातः। ततश्च तस्यैव प्रयत्नेन प्रार्थनेन च प्रोक्तपूर्वायां कर्मारशालायां नितान्तत एव साधारण-श्रमिकरूपेणासौ प्रवेशमलभत।

आसीन्नेओयालालस्य शरीरे शक्तिर्मस्तिष्के च बुद्ध्या साकं कियतीचित् कूटबुद्धिः। तस्याः प्रभावेणास्य समुन्नतेर्मार्गः सुगमः गतिश्च द्रुताभवत्। पञ्चषैरेव वर्षैः क्रमिकयोन्नत्या साधारण-श्रमिकश्रेणीतोऽसौ परिदर्शकपदमधिचकार।

नेओयालालस्य परिदर्शकपदप्राप्तितो मासषट्काभ्यन्तरे पारितोषिकस्य परिमाणमतिकालकर्मणश्च कल्पादिकमधिकृत्य शिल्पिश्रमिककर्मचारिभिरधिकारिणां सङ्घर्षः सञ्जातः। आवेदन-कारिणां युक्तावेदनपत्रे येषां तावत् प्रार्थनानां सूचिरासीत् तेषां पञ्चदशकलानामेव प्रत्याख्यानं पृष्ठे निधायाधिकारिणां पक्षतः सुतीव्रां टिप्पणीं कटुतरं च तिरस्कारं समुह्य प्रत्यावृत्तमावेदन-पत्रम्। तेन च आवेदनकारिषु विप्लवः पदं न्यदधात्, तस्य च फलेनान्तरान्तरा तैः सम्भूय कर्मरोधः कृतः। कदाचिद्वा कर्मार-शालायां पञ्चषाः शिल्पिनो नैव समायान्ति, कदाचिद्वा करणगृहे त्रिचतुराः कर्मचारिणो नैवोपतिष्ठन्ते।

न खल्वेवंविधस्य क्षीणप्राणस्य विप्लवस्य वृक्षे किमपि शोभनं फलमजायत। एकस्मिंश्च दिवसे करणालयं गत्वा सर्वेऽपश्यन् स्थाने स्थाने त्रिचतुरा अभिनवाः पुरुषाः पुरातनानां स्थानान्यधिकृत्य समुपविष्टाः, करणालयस्य द्वारस्य च पुरतोऽभ्यन्तरे चान्तरान्तरा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सशस्त्रा आरक्षिकपुरुषाः सन्निविष्टा वर्तन्ते। ये तावत् प्रतीहारस्य पुरतः पिकेटिं-करणार्थं सम्प्राप्तास्तेषामनेक एव गुलिकाप्रक्षेपणीसंसक्तास्तीक्ष्णाश्छुरिका निर्वर्ण्य परिस्थितिं सुविषमामाकलय्याभ्यन्तरं प्रविविशुः, शिष्टाश्च द्वित्रा द्वारदेशात् निर्विघ्नदूरदेशेऽवस्थाय स्वल्पमूल्यास्तमाखुवर्तिका भस्मीकुर्वन्तस्तस्थुः।

समीचीनस्य नेतृत्वस्याभावेन विप्लवनौर्मज्जनोन्मुखी सञ्जातेति प्रत्यक्षीकृत्य नेओयालालः कतिपयोर्ध्ववर्तिनः कर्मचारिणः सङ्घर्षण-ताड़नादिना पृष्ठतः कृत्वा स्वयमागत्यारित्रं धृत्वोपविष्टः। अचिरादेव सङ्घो घनीभूय सुपरिचालनागुणेन तथाग्रतः प्रससार यथा नाप्यधिकारिणस्तं शमयितुं प्रबभूवुर्नापि वारक्षिकपुरुषास्तं तापयितुं प्रबभूवुः। अर्थस्य लोभेन गुलिकाप्रक्षेपण्याश्च भयेन यथा कर्मारशाला प्रचचाल न खलु तत् प्रचलनमिति व्यपदेष्टुं शक्यते।

उद्दीपितामर्षा अधिकारिणो नेओयालालं भ्रष्टाधिकारं व्यदधुः। तेन परिस्थितेर्यदि किमपि परिवर्तनं सञ्जातं तर्हि तन्नेओयालालस्य सपक्षे एवेति प्रत्यभात्। त्रिचतुरदिनेभ्योऽनन्तरमधिकारिणां कक्षतो नेओयालालस्याह्वानमागतम्। द्वाराद् बहिरुपानद्युगलं मुक्त्वा नेओयालालः कक्षं प्रविश्यानतकायमधिकारित्रयमभिवाद्य कृताञ्जलिः स्थितवान्।

एकोऽधिकारीङ्गितेन तमवदत्—उपविश्यतामिति।

सविनयं शिरः सञ्चाल्य नेओयालालोऽवदत्, आर्य्य, न खल्वीदृशायापराधाय समादिशन् मां लज्जयितुमर्हति भवान् इति।

कपटसतीत्वमूलकं सप्रश्रयं वचनमाकर्ण्याधिकारिणां गात्राणि दग्धानि। एकेनोक्तम्, कथमेतत्? को वात्र दोषः? यदा तावत् त्वां वयं कर्मणः प्रच्यावितवन्तः, तदा त्वमिदानीं नः कर्मकर एव न भवसि इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नेओयालालः सगद्गदकण्ठमवदत्, आजीवनमहमार्याणां दास एव भवामि। वर्षपञ्चकात् पूर्वं बुभुक्षितेनोदरेणार्याणां कर्मारशालां प्रविष्टोऽहमासम्, न खलु तत् कदापि विस्मरिष्यामि। इति।

"तर्हि किमिति तवैवंविधमाचरणम्?"

चकितस्वरेण नेओयालालेनोक्तम्, आचरणे को वा दोषो वर्तते, आर्य? इति।

अधिकारिणोक्तम्, यस्तावदनलोऽस्माभिर्निर्वापितप्रायः, किमिति त्वया पुनरपि तत्रेन्धनानि समर्पितानीति।

नेओयालालोऽवदत्, सम्यगनलप्रज्वलनमन्तरेण मलानां निष्कासनं न स्यादिति। अङ्गारा अपि जायेरन् मला अप्यवशिष्येरन्। यैस्तावत् पूर्वमनलः प्रज्वलितो न खलु ते विजानन्ति ज्वालयितुमनलम्। यो ह्यनलं प्रज्वलयितुं जानाति सोऽनलं निर्वापयितुमपि जानाति। अहं प्रज्वलयितुमपि जानामि, निर्वापयितुमपि जानामि। इति।

नेओयालालोऽनलं प्रज्वलयितुं जानातीत्यत्राधिकारिणां लेशतोऽपि संशयो नासीत्। निर्वापयितुमपि जानातीति प्रत्ययस्तेषामासीदित्येव तैराहूतोऽसौ।

इत ऊर्ध्वं कियन्तञ्चन कालं वादानुवादेन किमपि फलं न सञ्जातमिति दृष्ट्वा प्रधानाधिकारिणोक्तम्, शृणु, नेओयालाल। त्वं तावत् त्वदीयं नूतनं प्रार्थनापत्रं प्रत्याहर, वयमपि तवाधिकारभ्रंशस्यादेशपत्रं प्रत्याहरामः। आपाततः, तव वेतनं रूप्यकशतेन वर्धयित्वा त्वाम् आसिष्टान्ट् ओआर्कस् म्यानेजारं (सहकारिकार्यपरिचालकं) विदध्मः। इतरानपि कर्मचारिणोऽधिकृत्य विवेचनापूर्वकं वयं कथञ्चित् सौकर्यं विधास्यामः। किं वात्र ब्रवीषि?' इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृताञ्जलिर्नेओयालालोऽवदत्, भवतु, आर्याः। अत्रभवतां प्रसादवार्त्तां सङ्घस्य सविधे वर्णयिष्यामि। ततश्च सङ्घेन यदनुज्ञास्यते तद् भवद्भ्यो निवेदयिष्यामीति।

एकेनाधिकारिणा सविस्मयमुक्तम्, युष्माकं पुनः सङ्घः सम्भूतो ननु? इति।

आर्य, बाढं सम्भूतः। अन्तरेण सङ्घं कम कथं वा सम्यक् प्रचलेत्? न्हिदुस्थानस्य सङ्घो नास्तीत्येवास्माकं दशैदशी वर्तते।

एतेन चाववुद्धमेवाधिकारिभिर्यदन्तरायस्य कण्टकवृक्षः स्थिरतरमेव कर्मारशालाप्राङ्गणे रोपितः, स चायतावन्तरान्तरा दुःखमदत्त्वा न निवर्तिष्यते इति। प्रधानाधिकारिणा पृष्टम्, कदा नु सम्भूतो युष्माकं सङ्घ इति।

ह्यः सन्ध्याया अनन्तरम्, आर्य।

को वा तस्याध्यक्षः?

अध्यक्षस्तावदद्यापि न निर्णीतः।

को वा त्वं सङ्घस्य?

अहं तावदार्य कार्यकर्तैव भवामि।

मुहूर्तमिव विचिन्त्य प्रधानाधिकारिणोक्तम्—पश्य नेओयालाल। न वयं युष्माकं सङ्घादिकं किमपि लेशतोऽपि बुध्यामहे। श्वश्चतुर्वाद्नाभ्यन्तरे युष्माभिः स्वसिद्धान्तो निवेदनीयोऽस्मभ्यम्। स चेदस्मभ्यं रोचेत, सम्यक्, आगामिनो मासात् त्वमस्माकम् अग्रासिस्स्यान्ट् ओयार्कस् म्यानेजारो भविष्यसि। अथास्मांस्तोषयितुं न प्रभवसि तर्हि यथा वत्सरं यावदन्तरान्तरा युष्माकं कारागृहे वासो नियतः स्यात्, विविधेषु च धर्माधिकरणेषु धावनमावश्यकं स्यात्, तस्योपाया व्यवहाराजीवैरस्माकमनुष्ठास्यन्ते इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृताञ्जलिर्नेओयालालोऽवदत्, अत्रभवन्तस्तत्र प्रमाणम्। परं यथा तथा वा कारागृहाद् व्यवहाराजीवेभ्यश्च भयं प्रदर्शयन्तु, आर्यतयां भवतां हस्तात् शक्तिं सम्प्रार्थ्य ग्रहीष्यामः। तत्र चेन्न प्रभविष्यामस्तर्हि वृथैव भवतां लवणमुपभुज्य जीवाम इति।

आनतकायमभिवाद्य नेओयालालो मन्दं मन्दमधिकारिणां कक्षान्निर्जगाम। स च मनसि व्यचिन्तयत्, न खल्वितः परं स्वबुद्ध्यवलम्बनेनैव कार्यं सेत्स्यति, बुद्ध्या साकं व्यवहारविद्यापि योजनीयेति। (क्रमशः)

महाभाष्यरत्नमञ्जूषा

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

पितृव्य-मातुल-मातामह-पितामहाः ॥ ४।२।३५ ॥

पितृव्य-मातुलेति किं निपात्यते ?

पितृमातृभ्यां भ्रातरि व्यड् डुलचौ ॥ १ ॥

पितृमातृभ्यां भ्रातरि व्यड् डुलचौ[1] प्रत्ययौ निपात्येते। पितुर्भ्राता पितृव्यः। मातुर्भ्राता मातुलः।

मातामह-पितामहेति किं निपात्यते ?

मातृपितृभ्यां पितरि डामहच् ॥ २ ॥

मातृपितृभ्यां पितरि डामहच् प्रत्ययो निपात्यते।
मातुः पिता मातामहः। पितुः पिता पितामहः।

मातरि षिच्च ॥ ३ ॥

मातृपितृभ्यां मातरि डामहच्, षिच्च वक्तव्यः।
पितुर्माता पितामही। मातुर्माता मातामही[2]।

---

[1] व्यन्निति नित्, निरनुबन्धकः, तिद्वेति बहुदर्शिभिर्विचार्यम्। उद्द्योतः।
[2] गौरादिगणे मातामहीशब्दपाठोऽनार्ष इति भावः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महो वा छन्दस्यानङोऽवग्रहदर्शनात् ॥ ४ ॥

महो वा[1] पुनरेष भविष्यति, छन्दस्यानङोऽवग्रहदर्शनात् । छन्दस्यानङोऽवग्रहो दृश्यते—माताऽमहः, पिताऽमह इति ।

अवेर्दुग्धे सोढ़-दूस-मरीसचः ॥ ५ ॥

अवे र्दुग्धे सोढ़-दूस-मरीसच इत्येते प्रत्यया वक्तव्याः । अविसोढ़म्[2] । अविदूसम् । अविमरीसम् ।

तिलान्निष्फलात् पिञ्जपेजौ ॥ ६ ॥

तिलान्निष्फलात् पिञ्जपेजौ वक्तव्यौ । तिलपिञ्जः । तिलपेजः[3] ।

पिञ्जश्छन्दसि डिच्च ॥ ७ ॥

पिञ्जश्छन्दसि डिच्च वक्तव्यः । तिल्पिञ्जं दण्डानतम् ।

Pitṛvya, mātula, mātāmaha and *pitāmaha.*

What is irregular in *pitṛvya* and *mātula* ?

To 'pitṛ' and 'mātṛ' vyat (v. l. vyan, vya) and ḍulac to denote 'brother'.

The suffix *vyat* (v. l. *vyan* and *vya*) and *ḍulac* are irregularly added to *pitṛ* and *mātṛ* respectively to denote 'brother.' Thus the father's brother (pitur bhrātā) is pitṛvya, the mother's brother (mātur bhrātā) is mātula.

---

[1] पितृशब्दस्यानङादेशो निपात्यते महच्च प्रत्ययः, तेन पदसंज्ञायां सत्यां पितेत्यवग्रहो भवति, डामहचि तु न स्यात् । प्रदीपः । डामहचि तु । तत्र भत्वात् । उद्द्योतः ।

[2] अविसोढ़मिति । षत्वं सकारोच्चारणसामर्थ्यान्न भवति, अन्यथा षोढ़प्रत्ययं प्रक्रियालाघवार्थं कुर्यात् । एवं दूसमरीसयोरपि षत्वाभावः सकारस्य । प्रदीपः । न च ण्यन्तात् क्विपि अविदूरित्यादौ सकारस्य चारितार्थ्यम्, तेषामभिधाने दृढ़तरमानाभावादिति भावः । उद्द्योतः ।

[3] तिलपिञ्ज इति । तिलो धान्यविशेषः । फलरहित इत्यर्थः । प्रदीपः । लकाले फलरहित इत्यर्थः । उद्द्योतः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[If the suffix be *vya,* then the last syllable of *pitrvya* will be accented, if the suffix be *vyan*, then the first syllable will be accented, if the suffix be *vyat,* then the final syllable will have the svarita accent. As Nāges'a puts it, it is difficult to determine one way or the other, as we do not come across any accented forms of pitṛvya.]

What is the irregularity in *mātāmaha* and *pitāmaha* ?

To 'mātṛ' and 'pitṛ' ḍāmahac to denote 'father'.

The suffix *ḍāmahac* is irregularly added to *mātṛ* and *pitṛ* to denote 'father.' Thus the mother's father is *mātāmaha* and the father's father *pitāmaha.*

To denote 'mother', ḍāmahac with an indicatory ṣ.

To *mātṛ* and *pitṛ ḍāmahac* is added to denote 'mother' and it is regarded as possessing an indicatory *ṣ.* Thus the father's mother is *pitāmaha,* the mother's mother is *mātāmaha.*

Because of the indicatory ṣ, *ṅīṣ* is added in the feminine acc. to "ṣid-gaurādibhyas' ca" iv. I. 41.

Or from 'maha' as we find avagrāha in the Vedas.

Or it may be from *maha* as we find an avagraha after *ānaṅ* in the Vedas. In the Vedas an avagraha is found after ānaṅ, thus mātā-maha, pitā-maha.

To 'avi' in the sense of milk 'soḍha', 'dūsa' and 'marīsac'.

The suffixes *soḍhā*, *dūsa* and *marīsac* are to be prescribed in the case of *avi* to denote *milk,* avisoḍham, avidūsam, avimarīsam.

To 'tila' unproductive, piñja and peja.

The suffixes *piñja* and *peja* are to be prescribed in the case of *tila* (sesamum) which does not bear fruit. Thus *tilapiñja, tilapeja.*

Piñja in the Vedas with an indicatory ḍ."

In the Vedas the suffix *piñja* is to e prescribed and

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

is to be regarded as containing an indicatory *ḍ*, e. g., *til-piñjam daṇḍānatam.*

[The suffix *piñja* alone and not *peja* also is added to *tila* in the Vedas and since the suffix is regarded as containing an indicatory *ḍ*, the final vowel of *tila* is dropped acc. to *ṭeḥ* vi. 4. 143. No doubt *tila* cannot technically be designated *bha* here, still since the indicatory *ḍ* serves no other purpose, the ṭi-portion of *tila* will be dropped, even though the word be not a *bha*.]

सायणभाष्य-पाठविमर्शः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

व्याख्यानान्तरेष्विव सायणभाष्येऽपि लिपिकरप्रमादादन्तरान्तरा पदानां स्थान-विपर्यासः सन्दृश्यते। तथाहि—

दिव्या अङ्गारा इरिणे न्युप्ताः
शीताः सन्तो हृदयं निर्दहन्ति ॥

[१०।३४।९] इत्यर्धर्चस्य भाष्ये दृश्यते—

"दिव्या दिवि भवा अपक्तताः अङ्गाराः अङ्गारसदृशा अक्षा इरिणे इन्धनरहिते आस्फारे न्युप्ताः शीताः शीतस्पर्शाः सन्तोऽपि हृदयं कितवानामन्तःकरणं निर्दहन्ति पराजयजनितसन्तापेन भस्मीकुर्वन्ति" इति।

टिप्पण्यां Max Müller-महोदयेन विलिखितम्—A. CA. B4. C2. B1. अपा क्षताः, CB. इति। मु-ग्रन्थे यद्दृष्टं पु-ग्रन्थेऽत्र तदेव मुद्रितम्, पाठान्तरं पुनरवज्ञयैवोपहतम्।

अत्रेदमवधेयम्। भाष्ये "दिवि भवाः" इत्येतस्मादनन्तरम् "अपक्तताः" इति हस्तलिखितेषु पुस्तकेषूपलभ्यते, क्वचिच्च 'अपा क्षताः' इति सन्दृश्यते। अङ्गारा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यस्याकारे परेऽपि शब्दयोरनयोर्विसर्जनीयस्य लोपो न विहित इत्यपि विशेषतो दृष्टिमाकर्षति। न्युप्ता इति मूलस्थस्य विषमस्यापि शब्दस्य प्रतिशब्दोऽपि भाष्ये नैवोपलभ्यते। हस्तलिखितद्राविड़लिपिमयपुस्तकेषु पवयोर्विशेषोऽध्यवसातुं दुष्कर इति न खल्वेतन्न विदितं लिपिकुशलानाम्। इकारश्च (ि) त्वरया विलिखितो वाऽविस्पष्टोपरिभागो वा आकाररूपं (ा) परिगृह्णातीत्यपि न परोक्षं प्रेक्षावताम्। अत एव यत् साम्प्रतम् "अपक्तताः" इति वा "अपा क्षताः" इति वा दृश्यते तन्मूलतः "अवक्षिप्ताः" इत्येव। तच्च "न्युप्ताः" इत्यस्य प्रतिशब्दत्वेन प्रयुक्तं भाष्यकृद्भिः, तस्य चानन्तरं 'शीताः' इति पदस्य शकारस्य सद्भावात् विसर्जनीयस्य लोपो न विहितः। अस्यैव सूक्तस्य अष्टममन्त्रभाष्ये दृश्यते—"न्युप्ताः कितवैरवक्षिप्ताः" इति। १०।२७।१७ भाष्येऽपि न्युप्ताः–शब्दस्य प्रतिशब्दो दृश्यते 'निक्षिप्ताः' इति। अत एव "दिव्या दिवि भवा अङ्गारा अङ्गारसदृशा अक्षा इरिणे इन्धनरहिते आस्फारे न्युप्ता अवक्षिप्ताः शीताः" इति पठनीयमिति प्रतिभाति।

अत्रास्थानस्थपदत्वे बीजमेतदेव प्रतिभाति यद् भाष्यकृद्भिः पञ्चममन्त्रे न्युप्ताः-पदं व्याख्यातमिति नवममन्त्रे तस्य प्रतिशब्दो न सन्निविष्टः। केनचन वाचकेन अवक्षिप्ता इति पदं हस्तलिखितपुस्तके काकपदसन्निवेशेन संयोजितम्। परवर्त्तिना लेखकेन काकपदं दृष्ट्वा त्वरया शब्दस्य स्थानभ्रंशो विहित इति।

निर्णयसागरयन्त्रे मुद्रितस्याभिज्ञानशकुन्तलस्य टीकायां ४४मपृष्ठे दृश्यते—वाच्यात् प्रतीयमानोऽर्थस्तद्विद्वान् [तद्विदामिति पठनीयम्] स्वदतेऽधिकम्। रूपका-दितरः कप्रकाराः [रूपकादिरतः इति पठनीयम्] इति, कारिकायाश्च शेषः "स्नेहान् [श्रेयान् इति पठनीयम्] अलङ्कारेषु नोपमा" इति एकादशभ्यः पङ्क्तिभ्योऽनन्तरं परस्मिन् पृष्ठे दृश्यते।

(२) नासदासीन्नो सदासीत्तदानीं
नासीद्रजो न व्योमापरो यत्।
किमावरीवः कुह कस्य शर्म-
न्नम्भः किमासीद् गहनं गभीरम् ॥१०।१२९।१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति प्रसिद्धतमस्य मन्त्रस्य भाष्यं म-पुस्तके पु-पुस्तके चेत्थं सन्दृश्यते— तदानीम्… असत्…नासीत्.…तथा नो…सत्…आसीत्। यद्यपि सदसदात्मकं प्रत्येकं विलक्षणं भवति तथापि भावाभावयोः सहावस्थानमपि सम्भवति। कुतस्तयोस्तादात्म्यमित्युभयविलक्षणमनिर्वाच्यमेवासीदित्यर्थः। ननु नो सत् इति पारमार्थिकसत्त्वस्य निषेधः। तर्ह्यात्मनोऽप्यनिर्वाच्यत्वप्रसङ्गः। अथोच्येत। न। आनीदवातमिति तस्य सत्त्वमग्रे वक्ष्यते परिशेषान्मायाया एवात्र सत्त्वं निषिध्यत इति।

म-पुस्तकेऽत्र पाठान्तरस्योल्लेखो नास्ति। पु-पुस्तकेऽप्ययमेव पाठः; केवलं पादटीकायां दृश्यते—"ग-त. १. २. ३. ६. ७. ८—म— न नास्ति" इति। यथास्माभिर्दृश्यते तथा नकारस्य स्थानभ्रंशः सञ्जातः। "भावाभावयोः सहावस्थानमपि न सम्भवति, कुतस्तयोस्तादात्म्यम्?…अथोच्येत आनीदवातमिति" इत्येवं पठनीयम्।

वामं वामं त आदुरे देवो ददात्वर्यमा। वामं पूषा वामं भगो वामं देवः करूलती॥ [ऋ० सं० ४।३०।२४] इति मन्त्रस्य भाष्ये दृश्यते—"ननु करूलतीत्येतत् सन्निहितत्वाद्भग इत्यनेन सम्बन्धनीयम्। अथवाऽर्यमादीनां त्रयाणामपि विशेषणत्वेन भाव्यम्। कथं पूष्णो विशेषणं स्यादिति साकाङ्क्षत्वात्। न। सान्निध्याकाङ्क्षयोः सद्भावेऽपि योग्यतामन्तरेणान्वयायोगात्। तस्मात् 'पूषा प्रपिष्टभागोऽदन्तको हि' [तै० सं० २।६।८।५] इत्यादिश्रुतिषु पूष्ण एवादन्तकत्वेन प्रसिद्धेर्व्यवहितस्यापि तस्यैव विशेषणत्वं युक्तम्।" इति।

अत्र 'साकाङ्क्षत्वात्' इति पदं स्ववाक्यात् परिभ्रष्टमुत्तरवाक्ये संलग्नम् "अश्वत्थामा हत इति गजः' इतिवत् प्रतिभाति। "अथवार्यमादीनां त्रयाणामपि विशेषणत्वेन, साकाङ्क्षत्वात्" इत्येवंजातीयकं किमपि भाष्यकृद्भिर्विलिखितमिति प्रतीयते।

१०।८९।४ मन्त्रस्य भाष्ये दृश्यते—प्रेरयं प्रेरयानि। म-पुस्तकस्योपोद्घाते दृश्यते—प्रेरयानि MSS. प्रेरयामि M I. R. See Pan. VIII. 5, 30." इति। म-पुस्तकप्रामाण्येन पु-पुस्तकेऽपि 'प्रेरयानि' इति मुद्रितम्, पादटिप्पण्यां वा प्रास्ताविके वात्र पाठान्तरं न प्रदर्शितम्, नापि वा पाठस्यास्य साधुत्वसम्पादनाय प्रयतितम्, नापि वास्यासाधुत्वमुद्घोषितम्। एतस्माच्च स्पष्टमेव प्रतीयते यत् Max Müller-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महोदयस्यानुशासनेन पुण्यपत्तनस्थपुस्तकस्य सम्पादकमहोदयाभ्यां प्रेरयानि-पदस्य अशुद्धत्वमध्यवसितम् इति।

अत्रेदमवधेयम्। पाणिनि-व्याकरणे प्रत्यध्यायं पादचतुष्टयस्यैव सद्भावात्, VIII. 5, 30 इति व्यक्तमेव मुद्रणालयपिशाचनर्त्तितम्, VIII. 4, 30 एव म-महोदयस्याभिप्रेतमिति। VIII. 4, 30 सूत्रश्च "णेर्विभाषा" इति। तत्र "कृत्यचः" इत्यनुवर्त्तते। अत एव काशिकायामुक्तम्—"ण्यन्ताद् यो विहितः कृत्प्रत्ययः, तत्स्थस्य नकारस्योपसर्गस्थान्निमित्तादुत्तरस्य विभाषा णकारादेशो भवति" इति। सिद्धान्तकौमुद्यामप्युक्तम्—"उपसर्गस्थान्निमित्तात् परस्य ण्यन्ताद् विहितो यः कृत् तत्स्थस्य नस्य णो वा स्यात्" इति। "प्रेरयानि" इत्यत्र यो नकारस्तस्य कृत्स्थत्वाभावात् तत्र "णेर्विभाषा" इति सूत्रेण वैकल्पिकणत्वं न भवति, प्रत्युत "आनि लोट्" ८।४।१६ इति सूत्रेण नित्यं णत्वं प्रवर्त्तते। अत एवात्र 'प्रेरयानि' इति पाठस्याशुद्धत्वे लेशतोऽपि संशयस्यावकाशो नास्ति। को वात्र शुद्धः पाठ इति विचारे सामवेदभाष्यसंवादेन 'प्रेरयामि' इत्युपतिष्ठते। तथाहि सामवेदे (१।३३९)-मन्त्रे 'प्रेरयम्' इत्यस्य स्थाने 'प्रैरयत्' इति श्रूयते, व्याख्यातश्च भाष्यकृद्भिः प्रैरयत् प्रेरयति वर्षतीत्यर्थः। तैत्तिरीयब्राह्मणभाष्येऽपि [२।४।५।२] अस्मदीयाभिः स्तुतिभिः स्तूयमान इन्द्रो वृष्टिं प्रयच्छतीत्यर्थः इति तात्पर्यव्याख्याने स्फुटेवोपलभ्यते। 'प्रेरयानि'-गतो दन्त्यो नकारोऽपि प्रेरयामीति पाठं निर्दिशति। अत एव 'प्रेरयामि' इति पाठोऽवश्यमेवोपासनीय इति प्रतिभाति।

"कुह स्विद् दोषा कुह वस्तोरश्विना" [१०।४०।२] इति मन्त्रस्य भाष्ये दृश्यते—"कुह स्वित् क्वचित् दोषा रात्रौ भवथ इति शेषः। कुह वस्तोः क्व वा दिवा भवथः" इत्यादि।

अत्र म-पुस्तके वा तदनुसारिणि पु-पुस्तके वा किमपि पाठान्तरं न सन्निविष्टम्। परं चिच्छब्दयोगेन किमः प्रश्नार्थकत्वमपैति, अत एवात्र 'क्वचित्' इत्येतस्य स्थाने क्व स्वित् इति पठनीयमित्यत्र को वा विप्रतिपद्येत ? अत्रैव भाष्ये समुद्धृते निरुक्तेऽपि दृश्यते—"क्व स्विद्रात्रौ भवथः क्व दिवा" इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१०।१७८।१-भाष्ये दृश्यते—"त्यमु तं प्रसिद्धमेव तार्क्ष्यं तृक्षपुत्रं सुपर्णम् ॥ तृक्षाद्यञ्। गर्गादिः" इति।

प्रास्ताविके चोक्तम्—"तार्क्ष्यं···गर्गादिः—म–मु ॥ अत्रापि लिखितपुस्तक-पाठानामबद्धत्वान्म-अभ्यूहो युक्तः" इति।

Max Müller-महोदयेन चतुर्थखण्डस्य cxl पृष्ठे उक्तम्—

"In X. 178, 1, the MSS. give the following readings :

तार्क्ष्यं वृक्ष्यं त्रिष क्षपुत्रं सवर्णं नृ क्ष यद्वा गर्भादिस्वस्तये A.

तार्क्ष्यं वृक्ष्यं त्रिष क्ष पुत्र सुवर्णं तृ क्ष पद्वा गर्भादिष्वस्वस्तये C2.

तार्क्ष्यं नृक्षं नृक्ष पत्रं सुपर्ण नृ क्ष यद्वा गर्भादिस्वस्ताप Ca.

तार्क्ष्यं तृक्षपुत्रं सुपर्णं यद्वा गर्भादिस्वस्तये। B1.

तार्क्ष्यं वृक्षं त्रिष क्ष पुत्र सुवर्त्मं तृक्ष यद्वा गर्भादिष्वस्नथे CB.

तार्क्ष्यं तृक्षपुत्रं सुपर्णं यद्वा गर्भादिस्वस्तये B4.

It is clear that this passage has been misunderstood by all the copyists. The corruptions must have begun at a very early date, for we see that the commentary to the Sama-veda, too, shows signs of it. At first sight that commentary seems quite right. It reads (p. 672) :

तार्क्ष्यं तृक्षपुत्रं सुपर्णं तृक्षपुत्रो गर्गादिः स्वस्तये।

But is there any authority for calling Garga and others the son of Triksha ? The only thing which Garga shares in common with Triksha is that their patronymics, according to Panini IV. 1, 105, are formed by the same suffix, viz. यञ्. I therefore, have little doubt that we must restore the original reading, as I have done, तार्क्ष्यं तृक्षपुत्रं सुपर्णं। तृक्षाद्यञ्। गर्गादिः or गर्गादित्वात् ."

अत्रेदमवधेयम्। सर्वेष्वेव हस्तलिखितेषु पुस्तकेषु 'यद्वा' इति दृश्यते, ततश्चास्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मूलं 'शब्द' इत्यभ्यूह्यते। गर्गादित्वात् इत्येकस्मिन्नपि पुस्तके नास्ति, गर्गादिशब्द-स्यापभ्रंशो गर्भादिरेव सर्वत्र विलसति। 'तृक्षाद्यञ्। गर्गादिः" इत्यतश्च कोऽप्यर्थो न प्रतीयते। अत एव 'तृक्षशब्दो गर्गादिः' इत्येव शुद्धः पाठ इति प्रतिभाति। सामवेदभाष्यस्य विकृतः पाठोऽपीममेव पाठं द्रढ़यति। तत्राप्यादौ 'तृक्षपुत्रं सुपर्ण' दृष्ट्वा लिपिकरैः 'तृक्षशब्दो गर्गादिः' इत्येतस्य स्थाने 'तृक्षपुत्रो गर्गादिः' इति लिखितम्। अथर्ववेदभाष्ये च विस्पष्टमेव दृश्यते—

ताक्ष्यं तृक्षपुत्रं सुपर्णम्। तृक्षशब्दो गर्गादिषु पठ्यते इति।

१०।८८।३ मन्त्रस्य भाष्ये दृश्यते—"अग्निं स्तोषाणि स्तोषामि। पु-पुस्तकस्य पादटिप्पणीतोऽवगम्यते मोहमय्यां मुद्रिते पुस्तकेऽपरस्मिंश्च हस्तलिखितपुस्तके स्तौमीति पाठो विराजत इति। Max Müller-महोदयेन लिखितम्— स्तोषाणि स्तोषामि Ca. स्तोषामि A. C2. CB; lacuna in B4 and B1. Probably something is left out by which Sayana would have traced the theoretical form स्तोषामि back to स्तौमि. The form itself, an imperative of the aorist, was probably unknown to him. R reads स्तोषाणि स्तौमि" इति.

अत्रेदमवधेयम्। यद्यपि स्तोषाणि-पदमृग्वेदेऽत्रैवोपलभ्यते तथापि स्तोषाम इति बहुवचनान्तं पदं त्रिः समुपलभ्यते। अत एव भाष्यकारस्यापरिचितोऽयं शब्द इति कथमपि वक्तुं न शक्यते। तथाहि १।५३।११ भाष्ये दृश्यते—स्तोषाम स्तवाम।...स्तौतेर्लोटि 'सिब्बहुलं लेटि' इति बहुलग्रहणाल्लोटयपि सिप्। तस्य पित्त्वाद् गुणः इति। ६।५५।४-भाष्ये दृश्यते "उपस्तोषाम उपस्तवाम" इति। ७।२।२ भाष्ये दृश्यते—उपस्तोषाम वयमुपस्तुमः इति। अत एव प्रकृते भाष्ये स्तवानि स्तवीमि स्तौमि इति त्रयाणामन्यतमः पाठः सम्भवति। तत्र हस्तलिखितपुस्तकेषु स्तोषामि इति मिप्रत्ययान्तस्य पदस्य दर्शनात् स्तवीमि स्तौमीत्यनयोरन्यतरो ग्राह्यः। अत्रापि स्तौमि-पदस्य भाष्यकृद्भिरन्यत्र प्रयुक्तत्वादेकस्मिंश्च हस्तलिखितपुस्तके सन्दर्शनात् स एव स्वीकार्य इति प्रतिभाति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१०।३१।१० भाष्ये पु-पुस्तके दृश्यते—"शम्याम अश्वत्थगर्भां तां शमीम्। 'सुपां सुलुक्' इति सुपो ड्यादेशः। इति।

प्रास्ताविके दृश्यते—"ड्यादेशः—त-भ१. २. ४. ६—मु। ड्याडागमः—त-३; ङ्याडागमः—भ ५। ङ्यादेशः ग —भ७—म। ड्यादेशे 'शम्या' इति रूपं भवेत्। अतः स्वीकृतपाठो न युक्तः। परं बहुषु पुस्तकेषूपलभ्यमानत्वात् स्वीकृतः। ङ्यादेश इति म-पाठोऽवद्ध एव। 'आ-आदेशः' इति युक्तम्।" इति।

न जानीमः किमिति सम्पादकमहाभागाभ्यामत्र सर्वेष्वेव Max Müller-पुस्तकेषु दृश्यमानस्तेन च विपश्चिता स्वीकृतः पाठः परित्यक्तः। एतस्य पाठस्य विचारार्थं लेशतोऽपि हस्तलिखितानि पुस्तकानि नापेक्षयन्ते। मन्त्रे शमीम् इत्यर्थे शम्याम् इति पदं प्रयुक्तम्। शमीशब्दस्य द्वितीयैकवचने शमीम् इति रूपं भवति, सप्तम्येकवचने च शम्यामिति। सप्तम्येकवचनविभक्तिश्च ङिरिति व्यपदिश्यते। अत एवोक्तं भाष्यकृता—सुपो ङ्यादेश इति, द्वितीयैकवचनलक्षणस्य सुपः स्थाने सप्तम्येकवचनलक्षणो ङिर्विहित इति तदर्थः।

देवनागरलिप्यां डकारङकारयोः सादृश्यातिशयात् कतिपुचिद्धस्तलिखितपुस्तकेषु ङ्यादेशः ड्यादेशरूपेण विपरिणतः। आ—आदेशः इति सर्वथायुक्तमेव तथात्व शम्याम् इति पदस्यानिष्पत्तेः।

"सुपां सुलुगिति" इत्यंशः केनापि निर्विमर्शेन वाचकेन प्रक्षिप्त इति प्रतिभाति।

हओमो यश्त्

[I. J. S. Taraporevala]

आ अत् मे अपम् पइत्यओख्त	**आत् मेऽयं प्रत्यवोचत**
हओमो अषव दूरओषो।	**सोम ऋतावा दुरोषः।**
वीवङ्हाओ माम् पओइर्यो मश्यो	**विवस्वान् मां पूर्व्यो मर्त्यः**
अस्त्वइथ्याइ हुनूत गयेथ्याइ	***अस्थिवत्यै सुनुत गेथायै**

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हा अह्माइ असिस एरेनावि	सा अस्मै आशीर्ऋणावि
तत् अह्माइ जसत् आयप्तेम्,	तदस्मै गच्छदाप्तम्
यत् हे पुथ्रो उस्ज़्यत	यदस्य पुत्र उज्जायत
यो यिमो ख्षएतो ह्वांथ्व्यो	यो यमः क्षेतः सुवन्ता
ख्वरेनङुहस्तेमो ज़ातनाम्।	स्वरणवत्तमो जातानाम्
ह्वरे-दरेसो मश्यानाम्	स्वर्दशो मर्त्यानाम्
यत् केरेनओत् अइङ्हे ख्षथ्राध	यत् कृणोदस्य क्षत्रादा
अमेरेषन्त पसुवीर।	अमरिष्यन्ता पशवीरा
अङ्हओषेम्ने आप उर्वइरे।	अशोष्यमाणे *आपोर्वरे
ख्वइर्यान् ख्वरेथेम् अजयम्नेम् ॥ ४ ॥	अशितवे अशतम् अज्येयम् ॥

Thereupon (*āat*) this (*āem*) Haoma (*Haomo*), the righteous (*aṣava*), of far spreading radiance (*dūraoṣo*) replied (*paityaoxta*) unto me (*me*) : Vīvaṅhat (*Vīvaṅhāo*) [was] the first (*paoiryo*) mortal (*mas'yo*) [who] worshipped (*hunūta*) me (*mām*) for [the sake of] the material (*astvaiθyāi*) world (*gaeθyāi*) ; This (*hā*) blessing (*aṣis*) into him (*ahmāi*) was granted (*ərənāvi*), this (*tat*) profit (*āyəptəm*) unto him (*ahmāi*) accrued (*jasat*) ; namely (*yat*) to him (*he*) a son (*puθro*) was born (*us-zayata*) who (*yo*) [was] Yima (*Yimo*) the king (*Xṣaeto*), the magnificent (*hwāθwo*), the most resplendent (*Xvarenaṅuhastəmo*) of [all] created beings (*Zātanām*), [who shone forth] among mortals (*mas'yānām*) like-unto-the-sun-in-appearance (*hvarədarəso*). Who (*yo*) made (*kərənaot*) during his (*aiṅhe*) rule (*xṣaθrādha*) [both] animals and human beings (*pasu-vīra*) undying (*amərṣənta*), [and] waters [and] vegetation (*āpa-urvaire*) ever fresh (*aṅhaoṣemne*) ; [there was] inexhaustible (*ajayamnəm*) food (*Xvarəθəm*) for feeding (*xvairyān*) [his subjects].

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वीवङ्हाओ—वीवङ्हत् १।१ (सं—विवस्वत्)। स हि यमस्य पिता होशाङश्च पौत्रः। प्रथमस्य मर्त्यस्य गयमरेतनः प्रपौत्रः। वेदेऽपि यमो वैवस्वत इति व्यपदिश्यते।

हा—सा। हे—(प्राकृते से)। सं—अस्य।

उस्-ज़यत—वेदेऽप्यन्तरान्तरा "बहुलं छन्दस्यमाङ्योगेऽपि" [६।४।७५] इति सूत्रेण भूतकरणस्य लोपो दृश्यते, आवेस्तायां प्रायेणैव लोप उपलभ्यते। लौकिके—उदजायत।

यिमो—यमः।

ख़्षएतो—क्षतः। क्षिच्छब्दः संस्कृते अधिक्षित्-विश्वक्षित्-परिक्षिदादिषूपलभ्यत एव। यथा वेदेषु वरुण-शब्दस्य विशेषणं राजेति, तथावेस्तायां यिमस्य विशेषणं क्षएत इति, तस्य च पूर्णं नाम यिमख़्षएतो परवर्तिनि काले 'जम्शीद्' रूपेण परिणतम्।

ह्वांथ्वो—सु-वन्ता। सुपूर्वाद्वनोतेः त्व-(थ्‌भ)-प्रत्ययेन निष्पन्नमिदं पदम्।

ख़्वरेनङ्हस्तेमो—ख़्वरेनङ्हशब्दात् तमप् (तेम)। स्वरणवत्तमः। "सोमानं स्वरणं कृणुहि ब्रह्मणस्पते" [ऋ० सं १।१८।१]। स्वर्, सूर्य, स्वर्ग Lat *sol*, Gk. *helio*s—सर्वे सनाभयः।

(क्रमशः)

प्राचीनानि ख्रिष्टीयस्तोत्राणि

[R. Antoine, S. J.]

ख्रिष्टीयानां मठवासिनां परम्परागतोपासनारीतिः पुरातनी। 'बेनेडिक्त'-नामा मठनियमरचयिता षष्ठ्यां शताब्द्यां जिजीव। तस्यान्तेवासिभिर्बहवो मठाः संविहिताः। मठवासिकर्तव्यानां मध्ये भगवद्-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पासना प्रधाना। दिवसे दिवसे मठवासिनः सप्तकृत्व ईश्वरस्तुतिं-गायन्ति। मध्यरात्रे प्रातःकाले पूर्वाह्णे मध्याह्नेऽपराह्णे प्रदोषे रात्रौ च यैः स्तोत्रैस्तेषां भक्तिरभिव्यज्यते कामं तान्यालङ्कारिक-पक्षेऽल्पमूल्यानि, तथापि सारल्यगाम्भीर्ययोगेनैतानि कामपि कमनीयतां दधते। प्राचीनानि हिन्दुधर्मस्तोत्राणि यथा संस्कृत-भाषायां रचितानि तथा पुराणानि खिष्टीयस्तोत्राणि लाटिन-भाषायां प्रणीतानि।

येन श्लोकेन सर्वाणि स्तोत्राणि समाप्यन्ते तेन ब्रह्मण आन्तरं वर्ण्यते। ब्रह्मणोऽसङ्ग एवैक्ये पिता स्वज्ञानेन सरूपं सूनुं सुनोति। तौ च प्रेमात्मकेन बन्धनेन संयुज्यमानौ परममानन्दं भुञ्जाते।

स्तोत्राणां कतिपयानामनुवादो दीयते।

Ad Matutinum.	मध्यरात्रे।
Somno refectis artubus,	निद्रासञ्जीविते गात्रे
Spreto cubili, surgimus ;	त्यक्त्वा तल्पं स्थिता वयम्।
Nobis, Pater, canentibus	त्वां स्तुन्वतः पिता रक्ष
Adesse te deposcimus.	कातरं प्रार्थयामहे ।।
Te lingua primum concinat,	स्तुवन्तु त्वां गिरोऽस्माकं
Te mentis ardor ambiat,	मनस्त्वामुपगच्छतु।
Ut actuum sequentium	दैनिकानि च कार्याणि
Tu, Sancte, sis exordium.	हे निरञ्जन प्रेरय ।।
Cedant tenebrae lumini	विजीयतां तमो दीप्त्या
Et nox diurno sideri,	दिवाकरेण च क्षपा।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Ut culpa quam nox intulit	निशा सहागतं पापं
Lucis labescat munere.	नाशं व्रजतु शोचिषा ॥
Precamur iidem supplices	तान्‌ शरणागतानस्मान्‌
Noxas ut omnes amputes,	सर्वानर्थादवानतान्‌ ।
Et ore te canentium	तव स्तुतिं च संगीतैः
Lauderis omni tempore.	प्रथयेम दिने दिने ॥
Praesta, Pater püssime	दयां कुरु पितः श्रेष्ठ
Patrique compar Unice,	सूनो सरूप पाहि नः ।
Cum Spiritu Paraclito	परमात्मनि संश्लिष्टौ
Regnans per omne saeculum.	विराजेथे युगे युगे ॥
Amen.	तथास्तु ॥

Ad Primam.	प्रातःकाले ।
Jam lucis orto sidere,	उदिते भास्करे सद्यो
Deum precemur supplices,	याचामहे परेश्वरम्‌ ।
Ut in diurnis actibus	दिवसे व्यापृतानस्मान्‌
Nos servet a nocentibus.	स्खलिताद्रक्ष हे प्रभो ॥
Linguam refrenans temperet,	नियच्छतु तथा जिह्वां
Ne litis horror insonet ;	यथा न स्यात्कलिध्वनिः ।
Visum fovendo contegat	आवृणोतु तथा चक्षुः
Ne vanitates hauriat.	सर्वासारं यथा त्यजेत्‌ ॥
Sint pura cordis intima,	अनाविलं मनस्तिष्ठेत्‌
Absistat et vecordia ;	क्रोधो वक्षो न पीडयेत्‌ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Carnis terat superbiam	उपशाम्यतु लोभाग्नि-
Potus cibique parcibas.	र्मितस्यान्नस्य भोजनात् ॥
Ut, cum dies abscesserit	दिवसेऽवसिते तर्हि
Noctemque sors reduxerit,	तिमिरे प्रतिगच्छति ।
Mundi per abstinentiam	संयमान्निर्मलस्वान्तै-
Ipsi canamus gloriam.	रीशस्तोत्रं प्रगीयताम् ॥
Deo Patri sit gloria	सर्वव्यापि यशः पित्रे
Eiusque soli Filio	सरूपायापि सूनवे ।
Cum Spiritu Paraclito	परमात्मनि युक्ताभ्यां
Nunc et per omne saeculum.	दिवे दिवे युगे युगे ॥
Amen.	तथास्तु ।

(क्रमशः)

At Mattins.

Sleep has refreshed our limbs, we spring
From off our beds and rise ;
Lord, on Thy suppliants while they sing
Look with a Father's eyes.

Be Thou the first on every tongue,
The first in every heart ;
That all our doings all day long
Holiest ! from Thee may start.

Cleanse Thou the gloom, and bid the light
Its healing beams renew ;
The sins, which have crept in with night,
With night shall vanish too.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Our bosoms, Lord, unburthen Thou,
Let nothing there offend ;
That those who hymn Thy praises now
May hymn them to the end.

Grant this, O Father, Only Son,
And Spirit, God of grace,
To whom all worship shall be done
In every time and place.

At Prime.

The star of morn to night succeeds,
We therefore meekly pray,
May God, in all our words and deeds,
Keep us from harm this day.

May he in love restrain us still
From tones of strife and words of ill,
And wrap around and close our eyes
To earth's absorbing vanities.

May wrath and thoughts that gender shame
Ne'er in our breasts abide,
And painful abstinences tame
Of wanton flesh the pride.

So when the weary day is o'er,
And night and stillness come once more,
Blameless and clean from spot of earth
We may repeat with reverent mirth—

To God the Father glory be,
And to His Only Son,
And to the Spirit, One and Three,
While endless ages run. Amen

(Translated by Card. Newman)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

What Scholars think of the Manjusha.

Dr. Suniti Kumar Chatterji, M.A., D.LITT. (London) Professor, Calcutta University, writes :

This little paper is unique in many respects. Sanskrit is said to be a dead language in India, but it is not yet as dead as many people think (or as some people would like to think !)...

We have still about half-a-dozen Sanskrit journals in India, apart from fairly frequent addresses and dissertations which are published independently. Among these journals, the *Manjusha* which is probably the only one of its kind appearing *regularly* month after month, has made quite a unique place of its own.

The *Manjusha* is run by Dr. Kshitish Chandra Chatterjee of the University of Calcutta, who is one of our most erudite authorities on the technical and other niceties of Sanskrit grammar. He is a student of languages and, in addition, he handles Sanskrit with ease. It has been his love of Sanskrit that has made him carry on the work of editing and bringing out this paper since its inception by himself. Financially it has been a thankless task. It has brought other disadvantages also—the editing and financing of a journal without much wide appeal because of its language has been a source of worry which has had its repercussions on his health. But he has not given in, because he is an incorrigible optimist when he is convinced his cause is noble. Prof. Chatterjee is quite an institution in himself. Then, he has been able to enist a number of disinterested colleagues who help him with contributions and who are enthusiasts for Sanskrit like himself. And he himself writes. It is a remarkable thing that although he finds joy in unravelling the intricacies of Sanskrit grammar, he is not in his mental make-up a dry-as dust grammarian. He has a wonderful sense of humour supported by an inexhaustible fund of anecdotes and stories which he brings out in racy Sanskrit. So the pages of the *Manjusha* at times sparkle with laughter. Comparative linguistic he brings in frequently in his articles, and this is a remarkable "special feature" of this little paper. Further, it does not confine itself to Sanskrit alone. Proverbs, *Bon-mots*, wise sayings, *Mahavahyas*, etc. from different languages, English, French, German, Latin, etc., are rendered appropriately into Sanskrit, demonstrating the capacity of the language of the Gods to keep pace with turns of expression peculiar to various languages. One can say also that there is an "English Section" to this magazine, devoted as it is entirely to the culture of Sanskrit. Thus, the editor himself is bringing out through this magazine, in instalments, his English translation and commentary on the *Mahabhashya*

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

of Patañjali which, when completed, will be a valuable contribution to the study of Sanskrit grammar through English.

A journal like this deserves a much wider appreciation which is its due. I think our high school students reading Sanskrit will find much of interest, pleasure and profit in it. I would suggest its being taken in all schools, colleges and universities in India where Sanskrit is taught. Prof. Chatterjee has been able to obtain contributions from eminent Sanskritists not only from all over India but also from abroad and that is no negligible achievement. All power to his elbow for the rehabilitation and the glory of Sanskrit, and for re-establishing its popularity among young Indians of today !

The Madhuravani (Belgaum) says :

अस्याः पत्रिकायाः सम्पादकमहाभागाः नैकशास्त्रपारङ्गताः गद्यपद्यरचनासु सिद्धहस्ततया प्रथितयशसः। प्रायः संस्कृतपत्रिकासम्पादकेषु अनधिगतस्थानमाङ्ग्लभाषाप्रभुत्वं प्रकृतसम्पादकेषु कनके मणिरिव पुष्यति प्रकाशविशेषम्, येन पाश्चात्यविद्याभिनिविष्टचतसामपि संस्कृतानुरागोत्पादनकर्मणि प्रभावमाविष्कुर्युः। इतरसंस्कृतपत्रिकासु अनुपलभ्यमानः कोऽपि पद्धतिविशेषोऽपि समेधयत्येतत्पत्रिकासुषमाम्।··· तदेवं गुणविशिष्टा अमौल्यलेखरत्नमञ्जूषायमाणा यथार्थनाम्ना मञ्जूषा विपुलार्थकामैः व्युत्पन्नैः विद्वद्भिश्च अवश्यं संगृह्य स्वार्थं सम्पाद्य सरत्नमञ्जूषाप्रदायकाः सम्पादकाः प्रोत्साहनीयाः सविशेषकार्यक्षमतायाम्। ईदृशे सर्वतः प्रतिकूलसमयेऽपि नियतवेलं प्रकाशमानायाः यथाप्रतिज्ञं विषयभासुरायाः मञ्जूषायाः सम्पादकान् सश्लाघं समभिनन्दामस्तमाम्।

Printed and published by Sri Jyotish Chandra Chatterjee, B. A. from 81, Shyambazar Street, Calcutta—4. Printed at the Elm Press 63, Beadon Street, Calcutta—6

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Approved by the Directors of Public Instruction,
Madras, Bihar and Mysore.

श्रीशिवः शरणम्

५म-वर्ष March, 1951. ७म-संख्या

मञ्जूषा

सम्पादकः—श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

Principal Contents.

Parityaktā (a long story) by Saubhāgyavatī Kṣamā Rao

The S'iva-sūtras and the Sanskrit Alphabet by Sri Kshitish Chandra Chatterji.

Next Month

Haomo Yasht with notes and translation by Dr. I. J. S. Tarporevala, B.A., Ph. D., Barrister-at-Law.

Usha-hymn with a new commentary.

Christian prayer with Sanskrit equivalent.

The Problem of Demarcation (Serial Story) by Sri Upendranath Ganguly.

Doubtful grammatical forms in the Bhaṭṭi-Kāvya.

Mahabhāṣya with notes and Translation.

Critical Observations on the text of Sayana's Commentary on the Rigveda.

Office : 81 Shyambazar Street, Calcutta—4
Annual Subscription : Rupees Six only.
Foreign—Rupees Nine.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काव्यालङ्कारसूत्रवृत्तिः (वामनविरचिता ५।१

अभिनवविशदविस्तृतटीकोपेता Rs. 2

Convocation Address in Ancient India -8-

स्त्रीप्रशंसा—The original slokas of Varāhamihira with a splendid Sanskrit commentary Re. 1/-

Popular Etymology Re. 1/-

শব্দকথা—সরস সরল ভাষাতত্ত্ব— ২৲

ঊষার আলো—হাসির গল্পের সমষ্টি— ৸০

নক্ষত্রমালা—ধর্মবিষয়ক শ্লোক ও অনুবাদ— ।/০

मञ्जूषाया नियमावली

१। मञ्जूषाया वार्षिकं मूल्यं रूपकषट्कम्। ग्राहकैर्वर्षस्य प्रथमसंख्यात एव ग्रहीतव्यम्।

२। प्रतिसौरमासं दशमदिने (आङ्गलमासस्य चतुर्विंशे दिवसे) 81, Shyambazar Street, Calcutta 4 इत्यतो मञ्जूषा प्रकाश्यते।

३। मञ्जूषायास्तावद् भागत्रितयं वर्तते। तत्र प्रथमे भागे देवभाषां प्रविविक्षूणां कृते सरलाः श्लोकाः, आभाणकाः, कथाः, आख्यानानि च सन्निवेश्यन्ते, द्वितीये भागे दार्शनिकाः प्रबन्धाः, व्याकरणालङ्कारादीनां विमर्शाः, पाठविचारः, जिज्ञासा मीमांसा च, पुस्तकपरिचयादयश्च प्रकाश्यन्ते; तृतीये भागे सानुवादाः पारसीकानां गाथाः, साङ्गलानुवादं महाभाष्यम्, ऋग्वेदश्च सभाष्यो मुद्र्यन्ते।

Several complete sets of Vol. IV of the Manjusha are still available for Rs. 6/- and only a few sets of Vols. I-III are available at Rs. 5/12/- for the lot.

श्रीविश्वनाथ चट्टोपाध्यायः।

८१ श्यामबाजार ष्ट्रीट्, कलिकाता ४।

81, Shyambazar Street, Calcutta 4.

Phone: B. B. 4049.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम् ॥

मञ्जूषा

March, 1951. | १८७२-शकीय-चैत्रस्य पञ्चम-वर्षस्य सप्तम-संख्या | Vol. V. No. 7.

परित्यक्ता

[पण्डिता क्षमा रावः]

इदंप्रथममेव ममागमनमासीत् कश्मीरेषु । उत्तरभारतालङ्कारायमाणा नन्दनवनविडम्बिन्यः कमनीया मरकतोपत्यकाः प्रथममेव मया निभालिताः । आगामिवर्षाकालस्य पारुष्यमधिकृत्य प्रागेव बहुधा बहुभिः प्रबोधितोऽपि कोहालाख्यग्राममारभ्य पञ्चविंशतियोजनानि सृष्टिसौन्दर्यादिदिदृक्षासहकृतकौतुकाक्रान्तचेता अहं मार्गदर्शकद्वितीयः पादचारेणैव गन्तुं प्रावर्तिषि । मार्गदर्शकस्तु कश्मीरदेशपरिचितस्तत्रत्यजनाचारविचारज्ञस्तदितिवृत्तनिष्णातश्चासीत् ।

अथ कोहालाग्रामात्प्रभृति नैकसप्ताहं पर्यटन् चारुग्रामाच्चारुतरं ग्रामं, विशालाद्रेर्विशालतरमद्रिं, रम्योपत्यकाया रम्यतरोपत्यकां, महाजलप्रवाहान्महत्तरजलप्रवाहं पश्यन्तौ चाहिण्डमानौ बारामुल्लानाम्नो ग्रामान्नातिदूरमावां सायं सम्प्राप्तौ । अथ सहसा समुत्थितो झञ्झावातः । तड़ितः कडकडशब्दैरतिभीषणैर्बधिरीकृतं दिङ्मण्डलम् । ज्वालामुखसहोदरमीदृग्विधं विद्युद्विद्योतनं न मयाऽत्र ऽकितपूर्वमासीत्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रभञ्जनस्य प्रलयकालीनस्येव प्रचण्डतायां पतितौ क्षत्रिकौ समुज्ज्वल-ज्वालाविड़म्बिन्या क्षणप्रभया क्षणाच्च क्षणदायां भस्मसात्कृताविति पुरो न गन्तव्यमिदानीमिति मार्गदर्शको मां व्यज्ञापयत्। नेदीयसीं धमशालामन्तरा विविक्तवासिनोऽभिजातस्य महाजनस्य कस्यचन नासीदन्यत्संश्रयस्थलम्। इति विज्ञापितोऽपि मां दोलायमानमान-समालोक्य पुनः साग्रहमभ्यधान्मार्गदर्शकः। भवन्तमातिथ्यपुरःसरं गृहस्वामी संभावयिष्यतीति न सन्देहः। कांश्चन मानुषविशेषानन्तरा सर्वेऽप्यध्वगाः सत्क्रियन्ते सदनेऽस्मिन्। इति कञ्चन पूर्ववृत्तान्तं विस्मृतप्रायं विमृशन्निव समभाषत मत्सहचरः। के ते मानवा इत्यनुयुक्तो मया स प्रोवाच। परिव्राजकाः कषायवस्त्रधारिणः प्रतिषिद्धप्रवेशा इह। जुगुप्सते हि गृहनायकस्तानिति स मन्दस्वरेणा-त्मगतं कथयन्निवागदत्। अथ गत्यन्तराभावान्मयानुमोदिते समाश्रयार्थिनावावां प्रचलितौ नचिराच्च निर्दिष्टधर्मशालां समासन्नौ। विचित्रोऽयं निलयः किल लघुपर्वतोपरि निर्मित आसीत्। तदन्त-र्बृहत्प्राङ्गणं पार्श्वयोश्चानेकभित्तिगतप्रतिमानस्थानं पूर्वकालीनं मठं मामस्मारयत्। प्रवेशद्वारे पलितकूर्चेन स्थविरदौवारिकेण गम्भीरा-कृतिना सादरं प्रवेशितौ प्राङ्गणमारोहाव गृहाभ्यन्तरप्रधणम्। इत उपत्यकायाः प्रफुल्लसान्द्रखस्खसक्षेत्राणामतिमनोहरोऽयमालोको लोचने मे प्रामोदयत्तराम्। सौदामन्या झगझगायमानया दीप्त्या शोणितवर्ण-कौशेयाच्छादितेव सा स्थली पावकदीप्तिरिव प्राचकासीत्। विजने वर्तमानमिदं मन्दिरं कस्याश्चिद् विलक्षणाख्यायिकायाः पृष्ठभूमिरिव प्रत्यभान्मे। अपर्याप्तप्रकाशो निवासोऽयं गृहस्वामिनोऽन्धकाराभि-रुचिमसूचयत्। परितो मन्दिरं हि व्यलसन्नानाविधविटपिनः संफुल्ल-कुसमसौरभ्याढ्या विविधफलभारावनताश्च। बहिःस्थालोके रमणीयेऽपि निवासस्यान्तर्गतनिरानन्दनैराश्यादिवैषम्यात्तत्र प्रविष्टमात्रोऽहं कयापि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

खिन्नतयाभिभूतोऽभवम्। विलीनासीत्क्वचित्कापि गुह्यता क्वचित्कोऽपि विड़म्बनापारुष्यान्वितो विमोहश्च।

अथ तावत्समाप्तस्नानसन्ध्यादिकार्ययोः परिभुक्तसरससुलभभोजनयोर्गृहाभ्यन्तरालिन्दे समुपविष्टयोर्मन्दिरस्वामी अतिक्रान्तनिजाभ्यासिकक्रम आवयोरन्तिकमुपस्थायान्वयुङ्क्त—कच्चिदार्यौ यथाविधि सत्कृताविति। कोणे निवेशिताया दीपिकाया मन्दप्रकाशे तदाननं दग्गोचरो नाभूत्। मदीयमार्गदर्शकस्यापरिचितोऽयं महाभागः किञ्चिन्मया सार्धं समभाषत। ततश्च मां नमस्कृत्य निजशय्यागारमगमत्। तमिस्रायां चाहं सहचरद्वितीयो धूमपानभोगसुखमनुभवन्नवास्थिषि। अथेदानीं प्रभञ्जनस्य प्राथमिकोग्रतायां विरतायां गुटिकास्थूलं वर्षितुमारब्ध मघवा। प्रघणस्याधःस्थं प्राङ्गणं पटलविहीनं जलौघेन समपूर्यत जानुदघ्नम्। आगामिनि दिवसे पर्यटनं दुःसाध्यमिव प्रत्यभात्। अथान्धकारावृते प्रघणेऽस्मिन् घटिकार्धमवस्थाय निद्रासुखमुपभोक्तुं यावत्प्रवर्तावहे तावत्कश्चन दीनदीनः शब्दः श्रुतिसरणिमावयोर्न्यपतत्। तदनु सद्यो घण्टाया झणत्कारोऽश्रावि। किमेतदिति मया कुतूहलात्पृष्टः सहचरो मे प्रत्युवाच। कोऽप्याश्रयार्थीति। गृहाद्बहिःशब्दो नेदिष्ठतां प्रतिपेदे। न चिराच्चोद्घाट्य प्रवेशद्वारं काचन योषित्पञ्चत्रिंशद्वर्षदेशीया हस्तशकटं प्रचालयन्ती प्राङ्गणं छायाकृतिरिव प्राविशत्। शकटस्य पूर्वभागलग्नदीपिकायाः प्रकाशेनालक्ष्यत यत्तस्याः स्विन्नकषायवसनं तदङ्गयष्टिलग्नमासीद् येन शरीरकृशता तस्या विशेषतो लोचनपथमगमत्। हस्तशकटे पिण्डीभताष्टनववर्षीयस्य शिशोरमानुषाकृतिः शयानाऽसीत्। विलोक्य परिव्राजिकां तां मदीयः सहचरः सविस्मयमासनात्सपदि समुत्थायाधःस्थितामङ्गनां मृत्युलोकात्पुनरुत्थापितामिव निरीक्षितवान्। तदेषा परिचिता तस्यति मे स्फुटीभूतम्। प्रविष्टमात्रायाः प्राङ्गणे वृद्ध-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिहारः शरणार्थिन्यास्तस्या असहायतामनादृत्य निष्ठुरं तामपसारयितुं प्रावर्तत। अथ सा हस्तशकटमधिशयानं बालं गोपयितुमिव क्षणं हस्तपल्लवाभ्यामाच्छादयत्ततश्च सद्यो यथागतं निर्गत्य सोत्फालमन्धकारमहोदधौ सह शकटेन न्यमज्जत्। सूचीभेद्यतमिस्रायां तमस्विन्यां निक्षिप्ताया अशरणायाः स्त्रियास्तस्या दीनदीनतामालोक्य दयाविष्टहृदयोऽहं सहचरमब्रवम्। मन्दभागायै तस्यै कियदपि धनं दातुमुत्सहे यन सा क्वाप्याश्रयं प्राप्य निशां सुखं गमयेदिति। मत्सूचनामननुमन्वान इव मार्गदर्शको विनोत्तरं क्षणं जोषमवतस्थे। न चिरात्तु साभिनिवेशं मामधोऽनैषीत्। निःशब्दं च प्रवेशद्वारमुद्घाटयापसर्पावावाम्। गृहाद्बहिःस्थां भित्तिमवलम्बमाना सवेपथुरशरणाबला व्यलोकि। सा च नेदीयसः पुरातनचिनाराख्यतरुविशेषस्याधो निरन्तरपरिश्रमणक्लान्तानना कम्पमानसर्वावयवा कञ्चन दुष्प्रतीकारमाधिप्रधानं व्याधिं स्पष्टयन्ती भस्मरूषिताङ्गी, शकटस्थं बालकं मधुरमधुरगिरा सान्त्वयन्ती स्थितासीत्। नानया जीर्णकषायचीवरवेष्टितविग्रहया बाष्पविन्दुसन्दोहप्रवाहेण कलितकपोलया विकलिताङ्गयष्ट्या सामान्यवनीपकया भाव्यमिति निरचिनवम्। तस्याः पिङ्गलवर्णे वाताहते चानने क्षुत्क्षामवेदनाविच्छाये सद्वंशशंसिनी कापि दिव्यच्छटाऽद्योततराम्। विचिन्तितं च मया यदनया तपस्विन्या कस्मिन्नपि दुःखप्रधानसंसारनाटके दुःखिपात्राभिनेत्र्या भाव्यमिति। अतो यथापूर्वनिश्चितं तस्यै धनविश्राणनं कर्तुं नापारयम्। मत्सहचरो मम दोलायमानचित्तमनुमाय सपदि परिव्राजिकां सम्बोध्याब्रवीत्। अयि भगिनि! कुतः शर्वर्यामीदृश्यां पर्यटितुं भवती प्रवृत्ता भवतीति। सा च सकड़कड़दन्ततततिरनाथापि मूर्तिमती धीरतेव प्रत्युवाच—भ्रातर्व्रतोपदानार्थमवन्तिपुरस्थं देवतालयं प्रति प्रस्थितासमरुणोदय। प्रातरद्य को नु व्यतर्कयद्भाविनं प्रलयमीदृशमिति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुत्र यास्यति भवतीदानीमिति प्रष्टुमधृष्णवम्। सा च प्रत्यभाषत—विधातुरवनी विपुला खलु। अवश्यं कापि कोणिका मयोपलप्स्यते। दयमानोऽखिलेषु दीनदयार्द्रहृदयो दयोदन्वान् दामोदरो दीनायां मयि दयिष्यत एव। अस्त्यद्वारमितो रिक्तमेकं पुरातनं मरुत्पुत्रायतनं पर्याप्तं शकटमिमं धारयितुम्। एतद्विधाय तत्र समीपवर्तिनो वृक्षस्य कोटरे स्थास्यामि सुखम्। इत्यपूर्वधैर्येण नौ समाश्वासयत्सा। पूर्वकृतो धनविश्राणनसंकल्पो मे मार्गदर्शकेन तस्यै निवेदितः, परं कृतज्ञतापूर्वं तमनङ्गीकृत्य व्याजहार सा पुनः। अयि भो भद्रमुखाः! अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभमिति पुराणवचनानुसारेण जन्मान्तरपापस्य फलमनुभूयते मयेदानीम्। अपरिचितजनस्यालयेऽभीक्ष्णमभ्यर्थितो मयाऽश्रयः, परमज्ञातजनान्नाद्यावधि स्वीकृतं धनं मन्दभागिन्या मयेति रुद्धकण्ठं नयने वसनप्रान्तेन प्रमृज्याभ्यधादेषा। तदनु वात्सल्यपूरप्लावितैर्वचनैः सन्त्रस्तामाकृतिं शकटस्थां सान्त्वं सान्त्वं पुरः पङ्किले मार्गे शकटं प्रचालयन्ती पयोदपटलप्रावृततया गगनस्य तमःप्रच्छादितायां भूम्यां शनैः शनैः प्राचलत्। तस्या अद्भुतेन धैर्येण विस्मापितावावां तमिस्रायां मार्गमन्विष्यन्तीमाकृतिमकिंञ्चनाया निरूपयन्तौ क्षणं स्तब्धाववास्थिष्वहि। अथ कम्पितसमस्तान्तरिक्षं सकड़कडं गर्जितं पौनःपुन्येनाकर्णि। अन्तरान्तरा च दुष्टजनसम्पदमिवानुकुर्वती क्षणदृष्टनष्टालोकप्रसारा व्यद्योतत क्षणप्रभा पूर्वतोऽपि प्रचण्डतरेण द्वितीयेन प्रभञ्जनेन सकलधरातलं जलासारैः प्लावयिष्यता प्रलयेन प्रत्यासन्नप्रायेण भाव्यमिति शङ्कितं मया। प्रकृते र्निष्ठुररोषाऽक्रान्तां पङ्गुशिशुद्वितीयां परित्यक्तां वराकीं शोचनीयदशाभिभूतां तां चिन्तयन् करुणोद्रेकवेपमानहृदयः किंकर्तव्यतामूढ इव मुहूर्तं स्थितवानहम्। कषायाम्बरधारिण्यां दीनदीनायां तपस्विन्यामाश्रयार्थिन्यां दयस्वेति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गृहस्वामिनं प्रार्थयितुमिच्छन्तं मां मत्सहचरः सनिषेधं रुन्धानोऽभ्यधात्। परकार्येषु व्यवहारो न साम्प्रतमिति। अथ गत्यन्तराभावात् सुतरां विषण्णः सहचरेण सह प्राङ्गणोपरिस्थमलिन्दं निवृत्तः प्रभञ्जनप्रहतयोर्दैवोपहतयोर्द्वयोः परित्यक्तयोर्मूर्त्ती मच्चेतसो निरासयितुमक्षमोऽवोचं सहचरं कीदृशीयं घटना विधेरि स्वकीयेन कर्मणा निहतास्ति सा। मन्दभागां तां विना न कोऽप्यत्र दोषास्पदं खलु। इति प्रत्यभाषत मार्गदर्शक ईषन्निर्घृणेन स्वरेण। परिव्राजिकायामनुजिघृक्षयाप्राक्षं किमर्थं भवद्भिरुपालम्भपात्रं निश्चितास्ति सेति। भागधेयं मनुजस्यात्मन एवाधीनं खलु। इति मन्द्रस्वरेणोदीरितं सहाध्वगस्य वचनं शोचनीयवार्ताशंसीत्युत्प्रेक्षमाणेन सपदि मयोक्तम्। कच्चिद्भवतामस्या इतिवृत्तं विदितमिति। अथ किम्। अतिशोचनीया खलु वार्तास्याः। इत्यवदत्सहचरो मे दीर्घं निश्वस्य। तदनु स तमाखुपात्रं प्रज्वल्य सौख्यार्थं प्रसारितपादः परिव्राजिकाया वृत्तान्तं कथयितुमुपाक्रमत।

"आसीदेकदा सा निखिलपञ्चाम्वुदेशे श्रीमत्तमस्य श्रेष्ठिनो गहिनीति विश्वस्येत किं भवद्भिः" इत्यनुयुक्तोऽहं क्षणं विमृश्याब्रवं प्रतीतोऽस्मि खलु तद्विषय इति। मत्सहायो मुहूर्तं विचारपरः स्थित्वेतस्ततो निक्षिप्य दृष्टिं नास्ति कोऽपि सन्निधौ निभृतश्चावीत्याश्वास्यात्मानं सहजस्वरेणारब्ध कथाख्यानम्।

"दशभ्यो वत्सरेभ्यः पूर्वं नासीत्किमपि धरातले दुरासदमेतया। श्रीलोऽयं पत्नीप्रणयी पञ्चाम्बुदेशस्यामृतसरनामनि नगरे महत्तमसौधानामनकफलवृक्षवाटिकानां निखिलभारतदेशपर्याप्तफलोत्पादनीनां स्वामी देवतामिवैतां समभावयत्। आसंश्च बह्व्यो विपण्योऽप्यस्मिन्नायत्ताः। प्रतिवर्षं ग्रीष्मसमये जायापती शीतानिलसुखोपभोगार्थं कश्मीरेषु भूस्वर्गायमाणेषु श्रीनगरवर्तिनि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रमणीयभवने दलनाम्नः सरसस्तटे कमलदलाख्ये निजालये कतिपय-मासान् कृतावासावास्ताम् ।"

"केनापि दुष्टकामुकेन दम्पत्योः सुखं विध्वंसितम् ।" इति सहसानुयुक्तं मया—एवमेव प्रत्यभात्तदानीम् इति । क्षणं विरम्य पुनराख्यातुमारब्ध सहचरः ।

"मुग्धाया अतिश्रद्धालुत्वादेव विनाशस्तस्याः समजनि । निखिल-वैभवद्युत्या समुद्भासितमपि सर्वभूषाभिर्भूषितमपि मृष्टान्नफलादि-वैपुल्यमपि रजतपात्रसंभृतमपि प्रत्यग्रपुष्पसौरभ्यसुरभितप्रमदवनेन समीप-वर्तिना सुखसागरायितमपि जितेन्द्रभवनमपि गृहभूषणभूतस्यापत्यस्य विरहेण शून्यमेवासीत्सदनं तयोः । दम्पत्योः पारस्परिकप्रेमबद्धयोः कौबेरसम्पद्विडम्बिनोर्गेहे सन्ततेरभावात्प्रापञ्चिकसुखरसो मक्षिका-पतनात्क्षीरमिव दूषितो बभूव । नन्दनानन्दाभिलाषिण्यानया सन्नार्या धार्मिकवृत्तिसंपन्नया सह भर्त्रा नानाविधानि व्रतानि समाचरितानि भारतवर्षस्य भूयिष्ठानि पुण्यानि तीर्थानि च समासेवितानि । प्रत्यहं तया जप्ता जपाः । अनुष्ठिताः महारुद्रादियज्ञाः प्रतिवत्सरम् । प्रतिसायं पण्डितप्रकाण्डेभ्यः पावनतमानि श्रीभागवतादिपुराणानि श्रुतानि सपरिवाराभ्यां दम्पतिभ्याम् । आसेव्यन्त तया च नानाविध-भेषजानि । परं नैकोऽप्यभ्युपायः फलोन्मुखत्वमापेदे । निराशा-पिशाचिकया कवलितचित्तायास्तस्या जीवनं शून्यशन्यमभूत् । अथ गच्छत्सु कतिषुचन वर्षेषु तस्या अनुत्साहः प्रतिदिनं वृद्धिं गतः । पञ्चविंशतिवर्षदेशीयाप्यात्मानं वृद्धामाकलयत् । तथा वराकीयमपि भर्तृबान्धवानां तिरस्कारभाजनमभूद्यथा वन्ध्याः प्रायेण जनधिक्कारपात्रं भवन्ति । अधिक्षिप्ता च तैर्भृशं कटुशब्दैः कवलीकृता च मानस-व्यथयाऽवसन्नप्रायाऽवतस्थे । अथ तस्मिन् समये सर्वतः पञ्चाम्बुदेशमण्डले पूजितस्य कस्यचन योगिनोऽलौकिकप्रभावजन्याद्भुतवार्तास्तदीय-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रुतिपथे न्यपतन् । नानादिग्भ्यो यात्रिकाः समाययुस्तदुपकण्ठम्— केचिन्निरुपायव्याधिग्रस्ताः, अन्ये दुर्भाग्यपरम्पराप्रहताः, केचिदितरे जन्मनः प्रभृति विकृताङ्गानामपत्यानां चिकित्सार्थिनः, केचित्पुनर्मुने-दर्शनकुतूहलादेव । प्राहुर्जना यत्स प्रतिवर्षं हेमन्तकाले यदा श्रीमद-मरनाथस्य हमदेवायतनान्निर्गत्यावारुक्षत्तदा सहस्रशो यात्रिका आ हिमालयादा कन्याकुमारीत आमुक्तमुक्तामाणिक्यवैडूर्यहीरकमरकत-पद्मरागादिच्छुरिताभरणादिभिर्बोखारादेशीयरुचिरदुकूलाम्बराणां रजत-हाटकमयपात्रैर्विरलविरलफलपुष्पपूरितमञ्जूषाभिरमूल्योपहारैः सार्धम-हमहमिकया समुपययुः । योगीन्द्रमेनं निरतिशयप्रभावबद्धादरो मुग्धजनो बहुतिथं कालं पूजयामास । सद्यः साक्षीकृता भवद्भिरियं तपस्विनी चापि तस्य दिव्यशक्तौ सञ्जातकुतूहलादौ ततस्तद्विमोहजाले न्यपतत् । व्यवहारकुशलस्य शङ्काशीलस्य भर्तुः परिव्राजककुलं सर्वथा तिरस्कुर्वा-णस्य विनानुमत्या स्वाभीष्टसिद्ध्यर्थं सा प्राकृतजनस्य देवताभूतमेनं मनिं दिदृक्षुमहाशापूर्णमानसा कश्माराणामतिरमणीयोपत्यकाभ्यन्तर-निवेशिते पहेलगावनामनि ग्रामे कृतावासमाससाद । तस्मिन् रमणीया-वसरे ग्रीष्मर्तुप्रसङ्गतः सरोजदलास्तीर्णस्य दलाख्यसरोवरस्य तदे श्रीलः सभार्यः कमलदलनामनि निजालये निवसति स्म । अथ तापसस्याश्रमान्निवृत्ताया अपत्याकाङ्क्षिण्याश्चेतसि दृढाशाङ्कुरः समारुक्षत् । तदनु रत्नखचितहिरण्यभूषणानि हरिणीनयना सा द्रविणापूरिताः कन्थाश्च तस्मै सानन्दमुपायनीकृत्य तस्यापारप्रभावे क्रमेण जातप्रत्ययाभूत् । प्रतिदिनं किंचन पानीयं तस्यै व्यतरन्मुनिः । अनेन जह्नुकन्यायाः पूतसलिलेनाभिलाषो भवत्या ध्रुवं पूरयिष्यत इति तेनाश्वासिता वरवधूः प्रतिरात्रं मन्दानिलान्दोलिता लतेव महाशापूर्णमानसा नवोढेव कम्पमानाङ्गयष्टिर्भर्तुः समागमात्पूर्वं पावनोदकं तत् सेवते स्म । सप्ताहद्वयान्ते च स्वप्रकृतौ विकृतिं कामपि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वीक्ष्य परमानन्दतुन्दिला विकसितमुखाम्भोजा स्वशरीरजनितविकार-विषयेण तापसस्य कर्णौ सनाथीकृतवती सा, न पुनः श्रुती स्वनाथस्य। भवत्या मनोरथसिद्धिसूचकमिदं परिवर्तनं खलु परं परिपूर्णफल-निष्पत्तिर्जपध्यानतपोभिरेव संपाद्यते तस्मादस्मदाश्रमे कञ्चित्काल-मवस्थातुमर्हति भवती। स्वार्थत्यागः स्वकीयवस्तुजातोत्सर्गश्चापक्ष्येते-तराम्। वरदाया देवतायाश्चरणारविन्दयोः पुरो भवत्या सर्वस्वमर्प-णीयम्। प्रसादप्राप्तौ सर्वमपि भवत्यै पुनः समर्पयिष्यते। इति तस्यादेशं श्रद्धालुः सिद्धवाक्यविश्वासादिवमुकुलितकरकमला प्रमोदाश्रु-पूर्णा प्रत्यपद्यत सा। समये तस्मिन् तदीयदयितः कार्यवशात्पञ्चाम्बु-देशं गतवानासीत्। पत्युरनुपस्थित्या प्रत्यूहपरिहारेण समभूत्सुकरं तस्या निष्क्रमणं गृहतः। अथैकस्यां निशीथिन्यां परिजनेषु सुप्तेषु संचित्य निःशेषमाभरणजातं स्वहस्तगतं भूरिद्रविणं च निभृतमवि-चारयन्ती दुर्भागधेयं सन्तत्यकतानहृदया स्वसंकल्पितार्थसंफुल्लवदना-रविन्दा दयितस्य प्रत्यागमनात् पूर्वमेव निवर्तिष्य ति निर्धार्य सवैभवं सदनं विसृज्य निःशङ्कं सचीभेद्यतमस्ततायां तमिस्रायां पूर्वं निश्चितस्थानं प्रत्येकाकिनी प्रतस्थे। द्वित्रसप्ताहोत्तरं प्रायेण समाप्तकार्यः श्रीलो निवर्तते स्म। परमतिवृष्टिवशात्फलवृक्षवाटिकासु कार्यनिवृत्तौ संजातायां सप्ताहाभ्यन्तरेऽकस्मादेव गेहिनीशून्यतया शून्यमिवालयं न्यवतत।

विनोदाभिलाषिण्या रमण्या क्वापि गुप्तया भाव्यमिति तां भूयो भूयः समाहूयापि यदा तत्प्रतिवचनं नाप्नोत्तदा सर्वानपि परिजनानाकार्यान्व-युङ्क्त तान् गृहिण्या वृत्तम्। परं स्वामिन्यां विश्वासघातं कर्तु-मनिच्छन्तस्ते प्रत्युत्तरमदत्त्वा तूष्णीं तस्थुः। ततश्च स्वामिना निर्बन्धातिशयेन प्रणोदितास्ते स्वामिन्या निष्क्रमणवृत्तं खण्डश एव न्यवेदयन्। हन्त ! खण्डशो निवेदनेन महाननर्थो व्यधायि। यदि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सविस्तरं तस्मै वृत्तान्तस्तैर्न्यवेदयिष्यत तदा न्यवारयिष्यत प्रायः शोचनीयोदर्कस्तस्या निरागसः साहसिकस्य कर्मणोऽपि। संशय-पिशाचेन श्रेष्ठिनश्चेतसि नैककुत्सिततर्कवितर्काणां तुमुले व्यतिकरे समुत्थापिते केनाप्यज्ञातेन पुरुषेण सार्धं भार्यायाः पलायनं व्यभिचार-हेतुकमेवेति शङ्कितवानसौ। अपि चाभरणजातद्रव्यापहरणात्संशयोऽस्य दृढ़ीभूतः। योगीशमान्येषु कपटपरिव्राजकेषु विश्वासातिशयजन्या अनर्था विदिता एवासंस्तस्य, तथापि मन्दभागां गेहिनीमनुरक्तसंकेतस्थानां परपुरुषमोहितां मन्यमानः परित्रातुं नोदसहत। विनैव दोषं मात्सर्य-पूरितैर्निन्दिता पत्या च कोपविषयीकृता मृतप्रायेवाजायत सा। कुलकलङ्किनीं तामाकलयतस्तस्य विवेकशून्यमतेः पलायनद्रव्यापहरणादि-दुष्कृतिजातमसह्यमभूत्। वरं तस्याः कालवशान्मरणं न तु कामुक-परवशतया पलायिताया जीवनमिति मुहुर्मुहुर्विचिन्तयन् विध्वस्तस्य कुलस्यात्मनो दुःखदविचारं स्मरणसरण्या कण्टकमिव निष्कासयितु-मिच्छन् क्वचिद् दूरदेशं प्रति पर्यटितुं श्रीलोऽयं मतिमकरोत्। अथ कतिपयदिवसाभ्यन्तरे निःशेषपरिजनगणमपास्य सदनस्य सर्वोपकरण-जातं विक्रीय पिहितद्वारं तच्च विसृज्य श्रीनगरान्निर्ययौ।" इत्युक्त्वा मत्सहचरः पुनः प्रज्वलयितुं तमाखुपात्रं क्षणं व्यरमत्। प्रशान्तायां रजन्यां क्वापि नेदिष्ठप्रदेशाद्दीर्घोच्छ्वासः समाकर्णि। अवशिष्ट-कथाश्रवणकुतूहलोद्वेगमात्मनो निरोद्धुमक्षमेण मया ततः किं संभूतं तस्या हतभागधेयाया इति सौत्सुक्यं पृष्टः स पुनरुपन्यसितुमारेभे।

"अथ निर्दिष्टस्थानमजानती सा सह तापसेन प्राचलद् यावत् काञ्चन ग्रामटिकामज्ञातपूर्वां निशीथिन्यां समासदत्। ततश्च तेन सा प्रापिता कञ्चन भयानकं कारागृहसहोदरमुच्चभित्तिपरिवेष्टितं निलयं निलीनं सान्द्रविटपिगुल्मेषु कस्मिंश्चिदधित्यकोपकण्ठस्थेऽरण्ये। प्रविष्टमात्रा सा प्राङ्गणं यावन्न किमपि चिह्नमाश्रमपदसूचकमवलोकयति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तावच्छङ्काग्रस्ता स्विन्नगात्री क्षणं कम्पमाना तस्थौ। वृद्धमकं सेवकं विना न कोऽप्यन्यो विशालालयेऽस्मिन् व्यलोक्यत। नासन् वामतो न वा दक्षिणतः प्रतिवेशिनः। नेदिष्ठं पुररक्षास्थानं सार्धयोजन आसीत्। दुर्गसदृशं भीषणगृहमभितो विरचितभित्तिचतुष्टयादपसर्पण-मशक्यप्रायमेवाभूत्। अथ तमिस्रायां समाप्य स्नानसन्ध्याभोजनादि-कार्याणि तापसस्तामनास्वादिताहारामाहूय गम्भीरस्वरेणाभ्यधात्। अयि चारुमुखि! अलमिदानीं जपानुष्ठानादिभिः। न खलु ते बकुलकुसुमकोमला तनुस्तीव्रतपसे विनिर्मिता विधात्रा। तवाभीष्ट-प्रदातारं मामेव विद्धि। मय्येव सर्वं निक्षिप्य मत्पूतचरणयोरन्तिके सर्वस्वं विसृज्य ममैव ध्यानं कुरु न पुनरन्यस्य कस्यापि। इत्याकर्ण्य वचस्तस्य मुग्धेयं बद्धवाक् संत्रासविषमविषज्वालावलीढावयवा दुराचारस्य दुष्टसंकल्पं झटिति व्यभावयत्। उदरवेदनाव्याजेन वक्तुमक्षमेति निःशब्दमिङ्गितेनैव निर्दिश्य, स्वकल्पितप्रकोष्ठस्य द्वाराणि दृढं पिधायोन्निद्रनेत्रा भयाक्रान्ता सवेपथुः स्थण्डिलशायिनी निशां निखिलां कथमपि निनाय सा। बहुलपक्षशशिकलेव क्षामक्षामा निराहारा चिन्तयन्ती निजमौर्ख्यं किंकर्तव्यतामूढा घोरकारावासात्त-स्मात्कथमात्मनो विमुक्तिर्भवेदिति ध्यायं ध्यायं नेत्रजलबिन्दुप्रवाहा-र्द्रीकृतोपधाना पिपासाशुष्ककण्ठी मृगीव व्याघ्राघ्राता व्याधिव्याजेन सन्ततं शयाना कतिपयदिवसान् कथमप्यगमयत्। वरं प्राणत्यागो न तु कलङ्कमलीमसं जीवनमिति सा मुहुर्मुहुरात्मानं वदन्त्यधिकाधिक-मतप्यत। तत्कटिबन्धगोपितमङ्गुलीयकद्वयं महार्हहीरकमणिखचित-मन्तरा तत्समस्ताभरणजातमात्मसात्कृतं धर्मकञ्चुकिना तेनाधर्मिणा।

अथ सप्ताहाभ्यन्तरे कार्यवशात्स पिशुनोऽकस्मात्केनापि कारणेन संभ्रान्त इव द्वित्रदिवसोत्तरमिह निवर्तिष्ये रुग्णामिमां सावधानमुपचरेति स्थविरपरिजनमादिश्य वेश्म निःशङ्कं व्यसृजत्। सुयोगोऽयं दैवेनैव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परित्राणाय स्वपथे प्रापित इति सपद्यपसरणाय बद्धपरिकरा साऽभूत्। प्रवयाः परिचरस्तस्याः शोकपारावारेण द्रुतान्तःकरणः प्रवेशद्वारमुद्घाट्य तन्निर्गममसाधयत्। कृतज्ञताभारभुग्नायास्तस्या निजकटिबन्धादुद्धृत्याङ्गुलीयकमेकं तस्मै प्रदातुमिच्छन्त्याः सप्रश्रयं तद्दानं निराकृत्य बद्धाञ्जलिर्भद्रं भूयाद्भवत्या इत्यभिधायाभिरिरक्षिषुरेकाकिनीमेनां क्रोशपञ्चकं वनमार्गेणान्वगच्छत्। अक्षतपातिव्रत्येयं कृतज्ञतार्णवपूरप्लावितहृदया प्रहर्षनयनाम्बुप्रवाहेण क्षालितकपोला मुहुर्मुहुर्विभोः स्तवं विदधाना सर्वात्मना च महिमानं तस्य गायन्ती महार्हभूषणनिकरविनाशं तृणमिव विगणय्य सायासं प्राचलत्। पापिष्ठो मुनिम्मन्यो मामवलोकयेत्क्वाप्यध्वनीति प्रतिक्षणं संत्रासात्कम्पमाना च क्वचिद् गुल्मेष्वन्तर्हिताभूत्, क्वचिच्च कस्यापि क्षेत्रिणः कुटग्रामाश्रयमभ्यार्थयत। ज्येष्ठमासेऽस्मिन् जलदपटलच्छन्ने क्वचिद्विलोकयन्ती मयूरनृत्यानि, क्वचित्सान्द्रद्रुमेषु टिट्टवीपक्षिकुलानामारावं शृण्वती दूराध्वन्यचलत्। अजिरेऽपि या नाचलत्पूर्वं सेदानीं पद्भ्यां मासमेकं पर्यट्य पर्यट्य भर्तुगृहं समासदत्। दूरतो गगनचुम्बिनीं सुराख्यद्रुमश्रेणीं वीक्ष्य नानाविधदुर्निवारचिन्तागृहीतचित्ता घडघडायमानेन चेतसा बाष्पोद्गारेण सक्तपक्ष्मपङ्क्तियुगला वेपमानविकलाङ्गयष्टिः क्षुत्पिपासाकुला मुहुर्मुहुरात्मनि व्यचिन्तयदविचारिणी—अहो कथमहं विश्वासघातिनी क्षम्येय स्वामिना। तथापि शरणान्तरहीना मन्दभागा दयितस्य पादपद्मयोः शिरो निधाय नेत्राम्बुभिस्तदङ्घ्रियुगलं प्रक्षाल्य सप्रश्रयं क्षमां याचिष्ये। न खलु मे पातिव्रत्यं दूषितमिति वेत्ति परमात्मैव। करुणानिधेस्तस्य प्रसादादक्षता स्थितास्ति स्वविशुद्धिरिति पुनः पुनस्तुष्टाव सा परेशम्। अथ यावत्पत्युः प्रासादोपकण्ठमुपैति तावदद्राक्षीत्सा शून्यशून्यतां सर्वत्र। मन्दिरं पिहितद्वारमासीत्। न कोऽपि जनो दृग्गोचरः क्रीडावनेऽभत्। क्व गतः स्वामी? किं संभूतं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्येति न कोऽप्यासीत्सविध तां विज्ञापयितुम् । एवं सा निजालयाद बहिः स्थिता पूर्वं सुस्थिताप्यद्य निराश्रितम्, आदौ सर्वैः संभाविताप्यधुना जनापवादकलङ्कितम्, अनपराधापि दूषितमद्य, पुरा प्रफुल्लवदनाप्यधुना शोकज्वालावलीढ़ाननं, सनाथापि संप्रत्यनाथमात्मानमपश्यत् । पर्यन्ते दीर्घाध्वश्रमेणावसन्नगात्री सदनाद् बहिरेकस्य तरोः प्रच्छायशीतले तले शोकपारावारनिमग्ना दुर्निवारनैराश्यझंझावातप्रहतेव समुपविश्य सोरस्ताडं व्यलपत् । तत्क्षणे च मन्दिरस्य पार्श्वप्राङ्गणात्कश्चित्तदपरिचितो मनुष्यो रक्षापुरुषपदे नियोजितो गृहस्वामिना तां समुपेत्याप्राक्षीत्कोऽन्विष्यते भवत्येति । सपदि पटान्तेन विमृष्टनयनया तया नाथस्य प्रवृत्तिं पृष्टे न तेन प्रोक्तम्—मासो व्यतीतो गृहिण्या दुराचाराद्विरक्तचेतसः स्वामिनः सपरिवारस्येतो निर्गतस्य । इत्याकर्ण्य शङ्कुनिशिताग्रविद्धहृदयेव क्षणं मूर्च्छितेव भतले न्यपतत् । अविदिततदितिवृत्तेन रक्षकेण समाहूय स्वगेहिनीं निजकुटीरं सदनस्य पृष्ठभागवर्तिनमनाथेयमानायायाञ्चक्रे । क्रमेण लब्धसंज्ञा सा दम्पती सव्रीडमापृच्छ्य सत्वरं तौ व्यसृजत् । तदारभ्यात्मरंगेण प्रेरितेव दैववेद्याः पुरो नित्यशः शोकानले देहधूपं प्रज्वलयन्तीव ग्रामाद् ग्रामं पर्यभ्राम्यत् । असहाया परित्यक्ता च शोकपारावारमपारमुत्तरीतुमपारयन्ती कस्यचिच्चिनारतरुविशेषस्य शाखायामुत्तरीयार्धेन मृतिसाधनं बन्धनं विरचय्य मर्तुकामा सा प्रायततात्मानं व्यापादयितुम् । परं द्वित्रवारान् विजनेऽपि स्थले दैवेन प्रतिरुद्धेव घोरकर्मणो निवृत्ताऽभूत् । नचिरादात्मानमन्तर्वत्नीमपश्यत्तदा सर्ववैकल्यमवगणय्य क्षणं क्षणहीनापि सा प्रामोदत । चिराद्विधृताभिलाषस्यं सन्निहितपरिपूर्त्येकहृदया जन्मतः सुखोपभोगभाक् सेदानीं कृषीवलस्य कस्यचित्क्षेत्रे प्रायस्यद् यावत्तत्र प्रासूत सुतम ।"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति कथयित्वा मत्सहचरो मुहूर्तं यावद् विरमति तावत्क्वापि मन्दिरेऽस्मिन्नार्तवादः श्रवणपथमावयोः समारुक्षत् । पर्यन्ते फलितोऽभून्मनोरथस्तस्या इत्युक्ते मया सहचरोऽब्रवीत्—सिद्ध-मनोरथया तया साध्व्या बालोऽयं जन्मतः पङ्गुर्भारभूतो व्यतीताष्टनव-वर्षेषु पोषितः परिसेवितश्च सप्रयत्नम् । तदधिष्ठितं हस्तशकट-माकर्षन्ती पर्यटन्तीदानीं हतभागेयं प्रत्यक्षीकृता भवद्भिः । वरं यदि विकलाङ्गोऽयं नन्दनस्तन्नयनानन्दनोऽपि नाजीविष्यत् । अथ तस्याः पतिर्बहुतिथं कालमुषित्वा विदेशे, निवृत्तः स्वदेशं विरक्तो विस्मृतप्रायो जनेन, क्वापि विजने निलयेऽवशिष्टमायुर्यापयति । यदतिशोचनीयं तदद्यावधि स गेहिन्याः सतीत्वं न वेत्तीति । कदाचिद्दैववशाच्चेन्मिथो-ऽवालोकयिष्यतस्ततः परस्परं नाभिज्ञास्यत इति विशङ्के खलु ।

अत्र सहचरस्य स्वरो मन्दीभूतः प्रशान्तरजन्यां कर्णजल्पितस्य प्रतिध्वनिं विडम्बमान इवाश्रावि । क्वास्ति तस्यावासस्थानमिति मया कुतूहलपरवशेनानुयुक्तः स प्रत्युवाच—निवसत्येष नातिदूरमित इति ।

अथ कतिपयक्षणोत्तरमश्रावि कश्चिदस्फुटो नादः समीवर्तिन्यां सोपानपङ्क्तौ । अधःस्थप्राङ्गणं सकृन्निरीक्ष्यावाभ्यामेका च्छायामय्या-कृतिः प्रवेशद्वारं प्रति निभृतं त्वरया प्रचलन्ती व्यलोक्यत । तत्त्वरित-निष्क्रमणोदर्कस्य चिन्तया संक्षुब्धो मत्सहाध्वगः प्राङ्गणे बद्धदृष्टिः क्षणं तूष्णीकः स्थितवान् । मन्दप्रकाशे दीपस्य मां प्रति साकूतं दृष्टिमक्षिपदिति विभावितं मया । क्षणेऽस्मिन्मज्जिह्वाग्रे प्रश्नजातं समुत्तस्थौ, परमेकमपि समुदीरयितुं न प्राभवम् । मदीयसहचरः सपदि सोपानमेवारुक्षत् अहमपि कुतूहलाकुलस्तमन्वगच्छम् । प्रभञ्जनस्य तीव्रवेगः सतडित्कडकडशब्दो भीषणो नाद्यापि ह्रसितोऽभत् । तमिस्रा च सूचीभेद्यान्धतमसेव मसीपटलेनेव लिप्तासीत् । गृहाद्बहिः कस्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चिच्छायाचित्रं धृतमन्ददीपहस्तस्य विजनेन मार्गेण गच्छदवालोकि। गुह्यनिष्क्रमणस्योद्देशं तमस्विन्यामीदृश्यामवगन्तुमक्षमः सहचरमपृच्छम्-अप्यस्ति मन्दिरेऽस्मिन् कोऽपि निद्राचारी रुग्ण इति। स च विधूय शिरः प्रत्युवाच। नहि नहि। महाभागोऽयमनामयः सर्वथा। बहुतिथं समयं मूर्च्छानिद्राभिभूतः प्रबोधमगमदिदानीम्। इति तस्यास्फुटेन सगूढ़ार्थेन च प्रत्युत्तरेणाधिकाधिकसञ्जातकुतूहलो यावत्तं प्रष्टुं प्रावर्ते तावन्नैपुण्येन प्रस्तुतविषयं परिहृत्य स व्याहरत्। सर्वमेव श्वो ज्ञास्यते भवता। आगम्यतामिदानीम्। भयावहा हि स्थितिरत्र। इत्युक्त्वा सदनान्तः पुनर्मामनैषीत्। निशीथप्राये समये तस्मिन् तन्निकेतन-कृतावासानामन्येषां निद्राभङ्गो मा भूदिति प्रस्तुतप्रसङ्गस्य विशदीकरण न मयाऽकारि निर्बन्धः। तदनु न चिरादध्वश्रमखिन्नेन मया निरवेशि निद्रासुखम्। परेद्यवि प्रातस्तरामुत्थाय प्रातस्तनविधिव्यापृतः पूर्वरात्रौ सहचरेण प्रोक्तस्य गूढ़ार्थं प्रष्टुमवकाशं न प्राप्नवम्। अथ समाप्तप्रातरशनौ प्रतिष्ठासू यावदूर्ध्वप्रकोष्ठादवरोहावस्तावन्मुख्य-द्वारात्प्रविशन्तं प्राङ्गणं परिव्राजिकायाः शोकानन्दमध्यवर्तिन्या धृतवन्तं करं, मधुरमधुरगिरा गाम्भीर्येण प्रेम्णा च मुहुर्मुहुः सान्त्वयन्तं च तां निरुद्धबाष्पां विनष्टापत्यदुःखितामपि दीर्घविरहोत्तरसङ्गमात्प्रहर्षनय-नाम्बुस्विन्नकपोलां गृहस्वामिनं चावालोकयाव। तस्य विनताननस्य शोकहर्षरसवैषम्यान्नानाभावभङ्गतुङ्गप्रवाहसंयमनपरस्य पृष्ठतः शिबिकाधारि पुरुषद्वयमन्वयात्। शिबिकामध्यास्त शयितोऽङ्गारीभूतोऽ-नभिज्ञेयपूर्वाकारो विगतासुः स शिशुः। वाहकयोः पश्चात्प्राविशन्मा-णवकः कश्चिच्चालयन् हस्तशकटं रिक्तम्।

अथ श्रीनगरं प्रतिगामिना पोप्लराख्यद्रुमविशेषपङ्क्तिमण्डितेन सुदीर्घपथेन प्रयातयोरावयोर्मार्गदर्शकोऽब्रवीत्। किमित्यस्मद्गृहस्वामी विद्वेष्टि कषायाम्बरधारिणं परिव्राजकवर्गमिति न स्यादिदानीं विस्मयावहं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवताम् । दिवाकरः प्रत्यगुदियाद्, अम्बरतलमिन्दीवरमण्डलमण्डितं स्यात्, परं न भवेत्कदापि तस्य विश्वासो योगिम्मन्येषु कषायाम्बरधारिषु ।

किन्तु हतभागिन्या अनपराधायाश्चिरत्यक्तायास्तस्या उपचिकीर्षयैव मत्सहचरण व्यतीतायां रात्रौ गृहस्वामिकर्णगोचरतया तदितिवृत्तमाख्यातं स्यादित्यसकृदात्मानं पृष्टवानहम् । हन्त ! विरहिजनसंगमं निपुणं साधयितुं प्रयत्नस्तस्य चिरादपि सफलीभूत इति तं प्रशंसाततिभिर्दीर्घाध्वप्रवाससमयमगमयम् ।

प्राचीनानि ख्रिष्टीयस्तोत्राणि

[R. Antoine, S. J.]

Ad Tertiam.	पूर्वाह्णे ।
Nunc, Sancte, nobis, spiritus, Unum Patri cum Filio, Dignare promptus ingeri Nostro refusus pectore.	पित्रा च सूनुना चैकः परमात्मा प्रसीदतु । अन्तःकरणमाविश्या- श्वासयितुं स्वतेजसा ।।
Os, lingua, mens, sensus, oigor Confessionem personent ; Flammescat igne caritas, Accendat ardor proximos.	वाङ्मनसोः प्रवृत्त्या नः परनिष्ठा प्रदर्श्यताम् । प्रेमाग्निस्पर्शसन्दीप्तं निर्वैरमस्तु जीवितम् ।।
Praesta, Pater püssime, Patrique compar Unice, Cum spiritu Paraclito, Regnans per omne saeculum. Amen.	दयां कुरु पितः श्रेष्ठ सूनो सरूप पाहि नः । परमात्मनि संश्लिष्टौ विराजथे युगे युगे ।। तथास्तु ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

The S'iva-Sūtras and the Sanskrit Alphabet.

[Kshitish Chandra Chatterji]

The fourteen rules found at the very beginning of Pāṇini's S'abdānus'āsana immediately after the heading अथ शब्दानुशासनम् are known as S'iva-sūtras, as their authorship is ascribed to S'iva. They are :

अ इ उ ण् ॥ १ ॥
ऋ ऌ क् ॥ २ ॥
ए ओ ङ् ॥ ३ ॥
ऐ औ च् ॥ ४ ॥
ह य व र ट् ॥ ५ ॥
ल ण् ॥ ६ ॥
ञ म ङ ण न म् ॥ ७ ॥
झ भ ञ् ॥ ८ ॥
घ ढ ध ष् ॥ ९ ॥
ज ब ग ड द श् ॥ १० ॥
ख फ छ ठ थ च ट त व् ॥ ११ ॥
क प य् ॥ १२ ॥
श ष स र् ॥ १३ ॥
ह ल् ॥ १४ ॥

The generally accepted Sanskrit alphabet is as follows :

अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ। क ख ग घ ङ। च छ ज झ ञ। ट ठ ड ढ ण। त थ द ध न। प फ ब भ म। य र ल व। श ष स ह।

It will be noticed that we have here first the vowels and then the consonants. In the list of vowels again, first

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

come the simple vowels (समानाक्षर or सिम्, cf. the *sim* of the English word *sim*-ple) and then the diphthongs (सन्ध्यक्षर). Among the simple vowels, we have the gutturals, short and long (अ, आ), first, because they have their place of articulation at the root of the tongue nearest the glottis, then the palatals (इ ई) and then the labials (उ, ऊ) because they are pronounced farther and farther away from the glottis. Then come the sonants, short and long, because they are, so to say, consonants turned vowels. Of the sonants the cerebrals naturally precede the dentals as being pronounced with the *upāgra* of the tongue and thus being nearer to the glottis. Then come the diphthongs, the labio-gutturals preceding the labio-dentals, because the throat is nearer the glottis than the teeth. As in the case of the simple vowels the short preceded the long, so in the case of the diphthongs the less open (विवृत) vowels preceded the more open (विवृततर) ones.

Coming now to the consonants we have first of all the mutes, because of the contrast they present to the vowels. As in the case of the vowels, here also the five series of mutes are arranged according to the distance of their place of articulation from the glottis—determined by the root, middle, near-tip and tip of the tongue,* the gutturals coming

---

* अन्येषां [= व्यञ्जनानां] यत्र स्पर्शनं तत् स्थानम् ।
येन स्पर्शयति तत् करणम् ।
हनुमूले जिह्वामूलेन कवर्गं स्पर्शयति ।
तालौ जिह्वामध्येन चवर्गं ।
जिह्वाग्रेण तवर्गं दन्तमूलेषु ।
ओष्ठाभ्यां पवर्गं ॥ तैत्तिरीय-प्रातिशाख्य १ । ३३-३९

जिह्वामूलीयानां हनुमूलम् । तालव्यानां मध्यजिह्वम् । मूर्धन्यानां जिह्वा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

first, then the palatals, then the cerebrals, then the dentals and last of all the labials as being farthest removed in respect of seat of utterance from the glottis. In each series again the breath (अघोष) consonants come first, because there is no obstruction of the outgoing breath in the larynx by the narrowing of the glottis and then the voiced (घोषवत्) ones. Of the breath consonants the unaspirates (अल्पप्राण) naturally precede the aspirates (महाप्राण) where there is the addition of a breath to the stop. Of the voiced consonants, first come the unaspirates, then the aspirates and last of all the nasals as having an additional place of articulation viz. the nose. After the mutes come the semi-vowels, because they are not consonants proper, but vowels turned consonants. Here also the order is acc. to the distance of the place of articulation from the glottis—the palatal य coming first, then the cerebral र, then the dental ल and last of all the labial व. Next come the sibilants in order—palatal, cerebral and dental. Last of all comes the breathing *h*.

The introductory chapter of the Ṛktantra Vyākaraṇa and treatises like the Soḍas'as'lokī S'ikṣā would lead one to suppose that even in very early times there existed, side by side with the ordinary enumeration of letters or Varṇa-samāmnāya known as *Uddes'a*, another phonetically classified Varṇa-samāmnāya known as *Upades'a**. In the latter the sounds were arranged in the order of the

---

प्रतिवेष्टितम् । दन्त्यानां जिह्वाग्रं प्रस्तीर्णम् । ओष्ठ्यानामधरौष्ठम् । चतुरध्यायिका १।१९-२५ ।

जिह्वग्रतालव्यमूर्धन्यदन्त्यानां जिह्वा करणम् । जिह्वामूलेन जिह्वग्रानाम् । जिह्वामध्येन तालव्यानाम् । जिह्वोपाग्रेण मूर्धन्यानाम् । जिह्वाग्राधः करणं वा । जिह्वाग्रेण दन्त्यानाम् । आपिशलीया शिक्षा ।

* कः समवायः ? वर्णानामानुपूर्व्येण सन्निवेशः । महाभाष्य १।१।१।१५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

short, long [and prolated] simple vowels and sonants, the long [and prolated] diphthongs, the breathing *h*, the semi-vowels (*y*, *r*, *l*, *v*) nasals (*ṅ*, *ñ*, *ṇ*, *n*, *m*), voiced aspirates (*gh*, *jh*, *ḍh*, *dh*, *bh*), voiced unaspirates (*g*, *j*, *ḍ*, *d*, *b*), unvoiced aspirates (*kh*, *ch*, *ṭh*, *th*, *ph*), unvoiced unaspirates (*k*, *c*, *ṭ*, *t*, *p*), and sibilants (*s′*, ṣ, *s*). At first there were no anubandhas in the later sense of the word and consequently no pratyāhāra could be used to denote the vowels or some of them. The vowels were evidently denoted by "svara", the simple vowels by *sim*, the abbreviated form of "samānākṣara," and the vowels except अ (short or long) by "bhāvin" or "nāmin", because they induced the mutation of dental *s* into cerebral ṣ. For the consonants the last letter of the group was tagged on to the first letter and was known as Anubandha and the two together denoted both themselves and the intervening letters.

Later the consonants technically known as anubandhas were found necessary for vowel pratyāhāras and for the sake of symmetry they were added after each group of vowels and consonants. Because the rule for the formation of the pratyāhāras was आदिरन्त्येन सहेता I. 1. 71, the anubandhas were the first and last letters of the vargas and then the sibilants which come at the end of the alphabet and then the semi-vowels which are known as "antaḥsthā" the first element (antaḥ) of which contains the sound "anta" 'end'. It would appear that at first there was only one pratyāhāra for all the simple vowels (including the sonants) *viz.* अक् and consequently there was no confusion caused by the use of *ṇ* twice as anubandha.

As already pointed out the first rule was अ इ उ ऋ ऌ क् with indicatory क. In the next rule ए ओ ङ् we find the indicatory ङ, in the next rule ऐ औ च् we find च in the next two rules ञ and ट were expected but that would have

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

given rise to लट् which would cause confusion with the well-known technical term for the present indicative, so ट is used in ह्व य व र ट* and the corresponding fifth letter in लण्. The dentals are passed over, probably under the impression that they would bring ill luck or loss of prosperity, because Pūṣan, the God of prosperity, is without teeth. It is fit and proper that the last nasal म should be used as an anubandha for the nasal in ञ म ङ ण न म्. The palatal nasal which has been held over is used in the next rule झ भ ञ् †. The nasals being exhausted we come to the sibilants which stand at the *end* of the alphabet, and since the dental sibilant is excluded, the palatal is used to form a pratyāhāra with the palatal *j* and the cerebral with the others. The cerebral is used first, because it is nearest to the end. Next are used the semi-vowels which come immediately before these and व is used first because it stands nearest to the sibilants in the ordinary alphabet. य is used next, but in the pratyāhāra found in the Phiṭ sūtras *y* comes last. And then come the remaining semi-vowels र and ल.

Again the spars'as or contact consonants were read in the order of the gutturals, palatals, cerebrals, dentals, and labials, according to the distance of the particular position of the tongue from the pharynx. Later on Pāṇini or his predecessors added an anubandha after उ, and changed the order of the contact consonants for convenience in the matter of grouping for the rules of grammar.

---

* The कण्ठ्य ह् like the कण्ठ्य अ comes first, then comes the तालव्य य like the तालव्य इ, then the ओष्ठ्य व like the ओष्ठ्य उ, then the मूर्धन्य र like the मूर्धन्य ऋ and then the दन्त्य ल like the दन्त्य लृ.

† Because it begins with a palatal.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

In the S'iva-sūtras the voiced consonants must be placed near the vowels. And in some cases it is necessary to mention the vowels or some of them and the semi-vowels and *h* together (e. g. इण्कोः 8. 3. 57, अट्कु 8. 4. 2, etc.), so *h* and the semi-vowels must be placed immediately after the vowels, and the voiced consonants after them. Of the voiced consonants the nasals come first, because it is necessary to have a *pratyāhāra* for the vowels, *h*, semi-vowels and nasals (पुमः खय्यम्परे 8. 3. 6).

Of the nasals ञ and म are placed first so that they may be excluded from the pratyāhāra ङम् used in ङमो ह्रस्वादचि ङमुण् नित्यम् 8. 3. 32. After the nasals come the voiced aspirates *jh* and *bh*, because it is necessary to combine them for the rule अतो दीर्घो यञि 7. 3. 101. Of *jh* and *bh*, *jh* being a palatal is placed before *bh* which is a labial; moreover it is necessary to exclude *jh* from the voiced aspirates for the purposes of the rule एकाचो बशो भष् झषन्तस्य स्ध्वोः 8. 2. 37. Then come the three remaining voiced aspirates—the guttural (*gh*) naturally coming first, then the cerebral and then the dental. Now come the remaining voiced consonants and here also *j* is placed first and *b* next for the pratyāhāra *bas'*. Then come *g*, *ḍ* and *d* as before. Now come the breath consonants and of these the aspirates are placed first with *kh* at their head, because *kh* has to be excluded from the pratyāhāra *chab* (नश्छव्यप्रशान् 8. 3. 7). Then comes the palatal *ch*, then the cerebral *ṭh*, then the dental *th* and lastly the labial *ph*. Next come the unaspirate breath consonants and of these *c*, *ṭ* and *t* have to be separated from *k* and *p* for purposes of नश्छव्यप्रशान् etc. Last of all come the sibilants in their order.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तैत्तिरीय-प्रातिशाख्यम्

अथ वर्णसमाम्नायः । १।१

अथ* नवादितः समानाक्षराणि ।१।२

द्वेद्वे सवर्णे ह्रस्वदीर्घे ।१।३

न प्लुतपूर्वम् ।१।४

षोडशादितः स्वराः ।१।५

[अ आ आ३, इ ई ई३, उ ऊ ऊ३, ऋ ॠ, लृ, ए, ऐ, ओ, औ ।]

शेषा व्यञ्जनानि ।१।६

आद्याः पञ्चविंशतिः स्पर्शाः ।१।७

परश्चतस्रोऽन्तस्थाः ।१।८

परे षडूष्माणः ।१।९

स्पर्शानामानुपूर्व्येण पञ्चपञ्च वर्गाः ।१।१०

प्रथमद्वितीयतृतीयचतुर्थोत्तमाः ।१।११

वाजसनेयि-प्रातिशाख्यम

उपदिष्टा वर्णाः ।१।३४

सिमादितोऽष्टौ स्वराणाम् ।१।४४

सन्ध्यक्षरं परम् ।१।४५

अकण्ठ्यो भावी ।१।४६

व्यञ्जनं कादि १।४७

द्वौ द्वौ प्रथमौ जित् ।१।५०

ऊष्माणश्च हवर्जम् ॥१।५२

धि शेषः ॥१।५३

द्वितीयचतुर्थाः सोष्माणः ।१।५४

अथातो वर्णसमाम्नायं व्याख्यास्यामः ।८।१

तत्र स्वराः प्रथमम् ८।२

अ इति आ इति आ ३ इति इ इति ई इति ई ३ इति उ इति ऊ इति ऊ ३ इति ऋ इति ॠ ति ॠ३ इति लृ इति ॡ इति ॡ ३ इति ॥३

---

* One feels inclined to read "tatra" for "atha".

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[याज्ञवल्क्यशिक्षायां तु दृश्यते—"लृकारस्य तु दीर्घत्वं नास्ति वाजसनेयिनः" इति ।]

अथ सन्ध्यक्षराणि ॥४॥

ए इति ए३ इति ऐ इति ऐ३ इति ओ इति ओ३ इति औ इति औ३ इति ॥५॥

इति स्वराः ।६॥

अथ व्यञ्जनानि ॥७॥

किति खिति गिति घिति ङिति कवर्गः ॥८॥

चिति छिति जिति झिति ञिति चवर्गः ॥९॥

टिति ठिति डिति ढिति णिति टवर्गः ॥१०॥

तिति थिति दिति धिति निति तवर्गः ॥११

पिति फिति बिति भिति मिति पवर्गः ॥१२॥

इति स्पर्शाः ॥ १३ ॥

अथान्तस्थाः ॥ १४ ॥

यिति रिति लिति विति ॥ १५ ॥

अथोष्माणः ॥ १६ ॥

शिति षिति सिति हिति ॥ १७ ॥

अथ (ा) योगवाहाः । १८

≍ क इति जिह्वामूलीयः ॥ १९ ॥

≍ प इत्युपध्मानीयः ॥ २० ॥

अं इत्यनुस्वारः ॥ २१ ॥

अः इति विसर्जनीयः ॥ २२ ॥

हुँ इति नासिक्यः ॥ २४ ॥

कुँ खुँ गुँ घुँ इति यमाः ॥ २४ ॥

एते पञ्चषष्टिवर्णा ब्रह्मराशिरात्मा वाचः ।

यत् किञ्चिद्वाङ्मयं लोके सर्वमत्र प्रतिष्ठितम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋक्तन्त्रव्याकरणम्

एवमुत्पन्नानां वर्णानामुपदेशोद्देशाः। उद्देशे संज्ञाकरणम्, उपदेशे प्रत्याहारः सिद्धः। तद् यथाध्वर्योरुपदेशं वक्ष्यामः। अथ वर्णाः संज्ञाप्रत्याहारसमाः।

अ इति आ इति इ इति ई इति उ इति ऊ इति ऋ इति ॠ इति ऌ इति ॡ इति समानानि, ए इति ऐ इति ओ इति औ इति सन्ध्यक्षराणि।.... इति स्वराः। अथ व्यञ्जनानि। किति खिति गिति घिति ङिति कवर्गः। चिति छिति जिति झिति ञिति चवर्गः। टिति ठिति डिति ढिति णिति टवर्गः। पिति फिति बिति भिति मिति पवर्गः। इति स्पर्शाः। यिति रिति लिति वित्यन्तस्थाः। अथोष्माणो हिति * शिति षिति सिति योगवाहाः।...

सन्निवेशोऽन्यः प्रत्याहारार्थः। वर्णोऽनुबन्धो व्यञ्जनं यावतिथस्तावतां तदादीनां ततः पराणाम्।

ए ओ ऐ औ आ ॠ ॡ ई ऊ ऋ ऌ इ उ आः। र य व लाः। ङ ञ ण न माः। घ झ ढ ध भाः। ग ज ड द बाः। ख छ ठ थ फाः। क च ट त पाः। ह श ष साः।...

इदमक्षरं छन्दोवर्णशः समनुक्रान्तम्। यथाचार्या ऊचुः। ब्रह्मा बृहस्पतये प्रोवाच। बृहस्पतिरिन्द्रायेन्द्रो भरद्वाजाय भरद्वाज ऋषिभ्य ऋषयो ब्राह्मणेभ्यस्तं खल्विममक्षरसमाम्नायमित्याचक्षते। न भुक्त्वा न नक्तं प्रब्रूयाद् ब्रह्मराशिरिति च ब्रह्मराशिरिति च॥

वर्गद्वयवृत्तिः (ऋक्प्रातिशाख्यभूमिका)

अकारर्कारावि उ ए ओ ऐ औ॥
पदाद्यन्तयो र्न ऌकारः स्वरेषु।
आकारादीन् दीर्घरूपान् द्वितीयान् ह्रस्वेषु।

---

*. In some MSS. is found शिति षिति सिति हिति.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्चस्वपि तानि सन्ति ।
कखौ गघौ ङः ।
चछौ जझौ ञः ।
टठौ डढौ णः ।
तथौ दधौ नः ।
पफौ बभौ मः ।
यरलवाः ।
हशषसाः ।
अ⌒क⌒प अं ॥ इति वर्णराशिक्रमश्च ।

ऋक्प्रातिशाख्यम्

अष्टौ समानाक्षराण्यादितः ।१।१।
ततश्चत्वारि सन्ध्यक्षराण्युत्तराणि ।२॥
एते स्वराः ।३॥
सर्वः शेषो व्यञ्जनान्येव ॥६॥
तेषामाद्याः स्पर्शाः ॥७॥
पञ्च ते पञ्च वर्गाः ॥८॥
चतस्रोऽन्तस्थास्ततः ॥९॥
उत्तरेऽष्टा ऊष्माणः ॥१०॥
अन्त्याः सप्त तेषामघोषाः ॥११॥
वर्गेवर्गे च प्रथमावघोषौ ॥१२॥
युग्मौ सोष्माणौ ॥१३॥
अनुनासिकोऽन्त्यः ॥१४॥
ओजा ह्रस्वाः सप्तम्यन्ताः स्वराणाम् ॥१७॥
अन्ये दीर्घाः ॥१८॥
ऋकारादयो दश नामिनः स्वराः ॥१।६५ ॥

ननु यदि लौकिकोऽत्र वर्णसमाम्नायो गृह्यते एवं तर्हि तयानुपूर्व्या भवितव्यम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्र च ऊकारात् परौ ऋकार-ॠकारौ समामनन्ति—उ ऊ ऋ ॠ इति। तथा ऐकारात् पूर्वम् एकारम् औकारात् पूर्वमोकारम्—ए ऐ ओ औ इति। सकारात् परं हकारं समामनन्ति—श ष स ह इति॥ सत्यम्। आचार्यप्रवृत्त्या क्रमोऽन्यथानुमीयते। तद्यथा—ऋकारादयो दश नामिनः स्वराः [१।६५] इति। यद्याकारात् परौ पठ्येते तदानीं दश नामिनः स्वराः सम्पद्यन्ते। तथा "सन्ध्यक्षरेष्वकारोऽर्धमिकार उत्तरं युजोरुकारः" [१३।३९] इति। यदि ए ओ ऐ औ एवं पाठो भवति तदानीं युजोरुत्तरमर्धमुकारः सम्पद्यते। तथा यदि शकारात् पूर्वो हः पठ्यते तदानीं "दुस्पृष्टं तु प्राग् घकाराच्चतुर्णाम्" [१३।१०] अयं पाठक्रम उपपद्यते इति। सोऽयमाचार्यप्रवृत्त्या पाठक्रमोऽनुमीयमानो लौकिकवर्णसमाम्नायस्य द्विधा पाठं गमयति। अतोऽयं लौकिको वर्णसमाम्नायो गृह्यते। तथा तयानुपूर्व्या तन्न दुरुक्तमिति। उभे अप्येते आनुपूर्व्यौ लौकिकस्य वर्णसमाम्नायस्य द्रष्टव्ये। उवटः।

The enumeration of the letters in the Rkprātis'ākhya differs from the generally accepted alphabet in four points: (1) ऋ is placed here immediately after अ instead of being placed after उ; (2) ओ follows ए instead of ऐ; (3) ह is mentioned *before* the sibilants instead of being placed *after* them; and (4) ऌ is not mentioned.

Because ऋ is the most prominent of the Nāmin vowels, it is placed at their head and so we find ṛ immediately after *a* in the alphabet. Again ṛ often takes guṇa and becomes *ar* where the first element is *a*. The other sonant ḷ is passed over as being of very rare occurrence.

The open sandhyakṣaras ए and ओ come first and then the more open ones ऐ and औ. This is conducive to brevity also, because for purposes of the rules of sandhi we have to take ए and ओ together. ह being pronounced nearer the glottis is placed first, then comes the palatal sibilant, then the cerebral and lastly the dental, exactly as

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

in the case of the mutes. The Ayogavāhas naturally come last in all enumerations. Sköld says: "The eight *ūṣmans* of 1, 10 are *anusavāra, visarga, h*, s', ṣ, s, x, ɸ, of which only the *anusvāra* is not *aghoṣa*; this seems to imply that, in the system of the Rigveda *prātis'ākhya anusvāra*, and *visarga* were placed after the semi-vowels and before the *ūṣmans* proper." Nothing of the kind is implied in the sūtras. उत्तरेऽष्टावूष्माण: means the eight (letters) following the Antasthās are ūṣmans and अन्त्या: सप्त तेषामघोषा: means the last seven of these are Aghoṣa. We can see from this that ह came first immediately after the Antāsthās and then the other Uṣmans including *anusvāra* and *visarga*. It cannot therefore be said that *anusvāra* and *visarga* were placed after the semi-vowels.

कातन्त्र-व्याकरणम्

सिद्धो वर्णसमाम्नाय: ।१।१।०

वृत्तिः । सिद्धः खलु वर्णानां समाम्नायो वेदितव्यो न पुनरन्यथोपदेष्टव्य इत्यर्थः । सिद्धशब्दोऽत्र नित्यार्थो निष्पन्नार्थः प्रसिद्धार्थो वा । यथा सिद्धमाकाशम्, सिद्धमन्नम्, काम्पिल्यः सिद्ध इति । वर्णा अकारादयः, तेषां समाम्नायः पाठक्रमः ।

कविराजः । कुलचन्द्र उद्देशसूत्रमिदमित्याह । तदुक्तम्—
उद्देशोऽथ विभागश्च लक्षणञ्च त्रिधा मतम् ।
परीक्षा च चतुर्धेति क्वचित् केचित् प्रचक्षते ॥

प्रतिपादयितुमिष्टस्य विभागाद्यर्थस्य नाममात्रेण संकीर्तनमुद्देशः । उद्देशस्य संज्ञाभिर्विभजनं विभागः । इतरव्यावृत्त्या येन स्वरूपं लक्ष्यते तल्लक्षणम्, संशये स्वरूपं परीक्ष्यते यया सा परीक्षा इति ।

तत्र चतुर्दशादौ स्वरा: ॥२॥

वृत्तिः । तस्मिन् वर्णसमाम्नायविषये आदौ ये चतुर्दश वर्णास्ते स्वरसंज्ञा भवन्ति । अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दश समानाः ॥३॥

तेषां द्वौद्वावन्योन्यस्य सवर्णौ ।

पूर्वो ह्रस्वः। परो दीर्घः ॥४-६ ॥

स्वरोऽवर्णवर्जं नामी ॥७।

एकारादीनि सन्ध्यक्षराणि ॥८॥

कादीनि व्यञ्जनानि ॥९॥

ते वर्गाः पञ्च पञ्च पञ्च ॥१०॥

ते कादयो मावसाना वर्णाः पञ्च पञ्च भूत्वा पञ्चैव ते वर्गसंज्ञा भवन्ति।

क ख ग घ ङ, च छ ज झ ञ, ट ठ ड ढ ण, त थ द ध न, प फ ब भ म।

अनुनासिका ङ ञ ण न माः ॥१३॥

अन्तस्था य र ल वाः ॥१४॥

उष्माणः श ष स हाः ॥१५॥

शिडिति शादयः ॥४।४।३२।

धुड् व्यञ्जनमनन्तस्थानुनासिकम् ॥२।१।१३।

षोडशश्लोकीशिक्षा

अथ शिक्षां प्रवक्ष्यामि वाच उच्चारणे विधिम् ।

यथा संव्यवहारेषु स्वयं प्रोक्ता स्वयम्भुवा ॥१॥

त्रयस्त्रिंशद्धसा वर्णाः स्वरा द्वाविंशतिर्यमाः।

चत्वारश्च विसर्गोऽनुस्वार≍ क≍पस्त्रिषष्टिकाः ॥२॥

समास्तेऽदिदुतो ज्ञया ऋच्चादीर्घं लृ पञ्चमः ।

एदैदोदौ तु चत्वारोऽह्रस्वाः सन्ध्यक्षराणि च ॥३॥

ह्रस्वदीर्घप्लुता भेदास्त उदात्तानुदत्तकाः ।

स्वरिताश्चापि ते सानुनासिकाननुनासिकाः ॥४॥

इत्यष्टादशधा भेदा व्यवर्णा नामिनः स्वराः ।

कुचुटुतुपुवर्गास्त उत्पञ्चवर्णसंग्रहः ॥५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुप्वन्त्यच्वादिवर्गाणां व्युत्क्रमात् पञ्चमादितः ।
खफाद्याश्छठथा ज्ञेया रलान्त्या ह्यवाः स्मृताः ॥६॥
अतश्चतः स्वराः पूर्वा हलो ञमो झभो जबः ।
खथश्चपः शषश्चैते प्रत्याहारास्त्वसंख्यकाः ॥७॥
कादयो मान्तिकाः स्पर्शा यमा झपञमान्तरे ।
शषसहाः स्युरूष्माणोऽन्तस्था यरलवाः स्मृताः ॥८॥
कखत≍ पफत≍ पूर्वः क्रमादर्धविसर्गकः ।
जिह्वामूलीयको ज्ञेय उपध्मानीयसंज्ञकः ॥९॥

I shall now discourse on S'ikṣā or the science of the pronunciation of speech, exactly as it was delivered by the Self-born (Brahman) himself for mutual intercourse*. The *hasā*-letters are thirty-three (in number), the vowels twenty-two, the Yamas four, Visarga, Anusvāra, Jihvāmūlīya and Upadhmānīya—sixty-three (in all). Of these *a*, *i*, *u*, ṛ and ḷ—the last without the long variety—these are known as *sama* ; *e*, *ai*, *o*, *au*—these four have no corresponding short vowels and are known as Sandhyakṣaras. These *i.e.* the vowels have three varieties—short, long and prolated ; these again may be Udātta, Anudātta or Svarita and all these may be either Anunāsika or Ananunāsika. These are the eighteen varieties of vowels which with the exception of *a* (short or long) are known as *nāmin*. *Ku*, *cu*, *ṭu*, *tu* and *pu* represent the five groups of mutes. By means of the (indicatory) *u* five consonants are denoted in each case. Generally the fifth letters come at the beginning, then the fourth and so on in the reverse order. And first we get the letter of the ca-varga and last of all of the ka-varga and pa-varga (ñ, ṇ, *n*, ṅ *m*, etc.) ; *ch*, *ṭh* and *th* are

* संव्यवहारेषु means संव्यवहारेषु निमित्तभूतेषु for mutual dealings —an archaic use.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

preceded by *kh* and *ph*. Again *h*, *y* and *v* end with *r* and *l*. Thus first we get the vowels, then the pratyāhāras hala (*h* and semi-vowels), ñama (nasals), jhabha (voiced aspirates), jaba (voiced unaspirates), khatha (unvoiced aspirates) capa (unvoiced unaspirates), s'asa (sibilants)—there are innumerable pratyāhāras. The letters beginning with *k* and ending with *m* are contact letters. The Yamas come between the first four letters (of each varga) and the fifth. *S'*, ṣ, *s* and *h* are Uṣmans and *y*, *r*, *l*, *v* are Antasthā. The semi-visargas found before *k*, *kh* and *p*, *ph* are known as Upadhmānīya and Jihvāmūlīya respectively.

अभिनवशाकटायन-व्याकरणम्

अ इ उ ण् ॥१॥
ऋ क् ॥२॥
ए ओ ङ् ॥३॥
ऐ औ च् ॥
ह य व र ल ञ् ॥५॥
ञ म ङ ण न म् ॥६॥
ज ब ग ड द श् ॥७॥
झ भ घ ढ ध ष् ॥८॥
ख फ छ ठ थ ट् ॥९॥
च ट त व् ॥१०॥
क प य् ॥११॥
श ष स अं अः ≍क ≍प र् ॥१२॥
हल् ॥१३॥

It will be noticed that S'ākaṭāyana's Pratyāhārasūtras are vast improvements on those of Pāṇini. In the first place he removes the anomaly of the two ण's. Secondly he enumerates the unvoiced apirates in one rule. Thirdly by reversing the order of the voiced aspirates and unaspirates he gets a convenient pratyāhāra झट् for all the aspirate mutes. Fourthly,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

the voiced unaspirates are placed immediately after the nasals with which they are closely connected. Thus the Bhāṣyakāra says : यथा तृतीयास्तथा पञ्चमा आनुनासिक्यवर्जम् । आनुनासिक्यं तेषामधिको गुणः . Thus Moses, the name of Dickens's favourite younger brother, pronounced with the nasal passage blocked, became Bozes the corruption of which is Boz—the pen-name adopted by Dickens in his *Sketches by Boz.* Cf. also "cub id" for "come in" in Oliver Twist.

मुग्धबोधव्याकरणम्

अ इ उ ऋ ऌ क, ए ओ ङ, ऐ औ च, ह य व र ल, ञ ण न ङ म, झ ढ ध घ भ, ज ड द ग ब, ख फ छ ठ थ, च ट त क प, श ष साद्यन्ताख्याः ।

एषां मध्ये य वर्णास्त आदिवर्णान्त्यवर्णसमाहारसंज्ञाः स्युः ।

Vopadeva prefers the term "samāhāra" to "pratyāhāra". Like the earlier grammarians he found that an indicatory letter was necessary in the case of pratyāhāras with vowels to avoid the hiatus caused by two vowels coming together, but in the case of consonants or vowels and consonants no such indicatory letter was needed. The first and last sounds placed in juxtaposition might easily imply these as well as the intervening ones by what is known as the *Sandaṃs'a nyāya* or the maxim of the forceps and he has therefore no hesitation in dispensing with the *anubandhas* in these cases. It is worthy of note that Vopadeva, probably the last Sanskrit grammarian with any claims to orginality, follows the very early Upades'a in this matter, even as Paṇḍitarāja Jagannātha, the last great rhetorician of note follows the very early rhetorician Daṇḍin (who defines Kāvya thus—शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावलिः) in the matter of his definiton of Kāvya (रमणीया प्रतिपादकः शब्दः काव्यम्)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

What Scholars think of the Manjusha.

Dr. Suniti Kumar Chatterji, M.A., D.LITT. (London) Professor, Calcutta University, writes :

This little paper is unique in many respects. Sanskrit is said to be a dead language in India, but it is not yet as dead as many people think (or as some people would like to think !)...

We have still about half-a-dozen Sanskrit journals in India, apart from fairly frequent addresses and dissertations which are published independently. Among these journals, the *Manjusha* which is probably the only one of its kind appearing *regularly* month after month, has made quite a unique place of its own.

The *Manjusha* is run by Dr. Kshitish Chandra Chatterjee of the University of Calcutta, who is one of our most erudite authorities on the technical and other niceties of Sanskrit grammar. He is a student of languages and, in addition, he handles Sanskrit with ease. It has been his love of Sanskrit that has made him carry on the work of editing and bringing out this paper since its inception by himself. Financially it has been a thankless task. It has brought other disadvantages also—the editing and financing of a journal without much wide appeal because of its language has been a source of worry which has had its repercussions on his health. But he has not given in, because he is an incorrigible optimist when he is convinced his cause is noble. Prof. Chatterjee is quite an institution in himself. Then, he has been able to enist a number of disinterested colleagues who help him with contributions and who are enthusiasts for Sanskrit like himself. And he himself writes. It is a remarkable thing that although he finds joy in unravelling the intricacies of Sanskrit grammar, he is not in his mental make-up a dry-as dust grammarian. He has a wonderful sense of humour supported by an inexhaustible fund of anecdotes and stories which he brings out in racy Sanskrit. So the pages of the *Manjusha* at times sparkle with laughter. Comparative linguistic he brings in frequently in his articles, and this is a remarkable "special feature" of this little paper. Further, it does not confine itself to Sanskrit alone. Proverbs, *Bon-mots*, wise sayings, *Mahavakyas*, etc. from different languages, English, French, German, Latin, etc., are rendered appropriately into Sanskrit, demonstrating the capacity of the language of the Gods to keep pace with turns of expression peculiar to various languages. One can say also that there is an "English Section" to this magazine, devoted as it is entirely to the culture of Sanskrit. Thus, the editor himself is bringing out through this magazine, in instalments, his English translation and commentary on the *Mahabhashya*

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

of Patañjali which, when completed, will be a valuable contribution to the study of Sanskrit grammar through English.

A journal like this deserves a much wider appreciation which is its due. I think our high school students reading Sanskrit will find much of interest, pleasure and profit in it. I would suggest its being taken in all schools, colleges and universities in India where Sanskrit is taught. Prof. Chatterjee has been able to obtain contributions from eminent Sanskritists not only from all over India but also from abroad and that is no negligible achievement. All power to his elbow for the rehabilitation and the glory of Sanskrit, and for re-establishing its popularity among young Indians of today !

TECHNICAL TERMS AND TECHNIQUE OF

SANSKRIT GRAMMAR

A Critical, Comparative and Historical Study

By

KSHITISH CHANDRA CHATTERJI, SASTRI, M. A., D. LITT.

Lecturer, Calcutta University ;
Formerly Editor, Calcutta Oriental Journal,
Surabharati, Oriental Literary Digest, etc., etc.

"We have nothing but admiration for this masterpiece of scholarship." *Modern Review.*

Price Rupees Ten only. *Foreign Rs. 12/-*
Postage Extra.

VISVANATH CHATTERJI
81, Shyambazar Street,
CALCUTTA—4
Phone : B. B. 4049

Printed and published by Sri Jyotish Chandra Chatterjee, B. A. from 81, Shyambazar Street, Calcutta—4. Printed at the Elm Press 63, Beadon Street, Calcutta—6.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Special New Year Number.

Approved by the Directors of Public Instruction, Madras, Bihar and Mysore.

श्रीशिवः शरणम्

५म-वर्षं April, 1951. ८म-संख्या

मञ्जूषा

सम्पादकः—श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

Principal Contents.

जामातृ-संशोधनम् or milk-cow emendation.

नूनं द्राक्षा रुक्षा

Vedic Hymn in Classical Sanskrit.

Haoma Yasht with notes and translation by Dr. I. J. S. Taraporevala, B.A., Ph. D., Barrister-at-Law.

Christian prayer with Sanskrit equivalent.

The S'iva-sūtras and the Sanskrit Alphabet by Sri Kshitish Chandra Chatterji.

Critical Observations on the text of Sayana's Commentary on the Rigveda.

The Problem of Demarcation (Serial Story) by Sri Upendranath Ganguly.

Next Month

Doubtful grammatical forms in the Bhaṭṭi-Kāvya.

Mahābhāṣya with notes and Translation.

Office : 81 Shyambazar Street, Calcutta—4

Annual Subscription : Rupees Six only.

Foreign—Rupees Nine.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काव्यालङ्कारसूत्रवृत्तिः (वामनविरचिता ५।१
अभिनवविशदविस्तृतटीकोपेता Rs. 2

Convocation Address in Ancient India -8-

स्त्रीप्रशंसा—The original slokas of Varāhamihira with a splendid Sanskrit commentary Re. 1/-

Popular Etymology Re. 1/-

শব্দকথা—সরস সরল ভাষাতত্ত্ব— ২৲

ঊষার আলো—হাসির গল্পের সমষ্টি— ৸০

নক্ষত্রমালা—ধর্মবিষয়ক শ্লোক ও অনুবাদ— ।৵০

मञ्जूषाया नियमावली

१। मञ्जूषाया वार्षिकं मूल्यं रूपकषट्कम्। ग्राहकैर्वर्षस्य प्रथमसंख्यात एव ग्रहीतव्यम्।

२। प्रतिसौरमासं दशमदिने (आङ्‌लमासस्य चतुर्विंशे दिवसे) 81, Shyambazar Street, Calcutta 4 इत्यतो मञ्जूषा प्रकाश्यते।

३। मञ्जूषायास्तावद् भागत्रितयं वर्तते। तत्र प्रथमे भागे देवभाषां प्रविविक्षूणां कृते सरलाः श्लोकाः, आभाणकाः, कथाः, आख्यानानि च सन्निवेश्यन्ते, द्वितीये भागे दार्शनिकाः प्रबन्धाः, व्याकरणालङ्कारादीनां विमर्शाः, पाठविचारः, जिज्ञासा मीमांसा च, पुस्तकपरिचयादयश्च प्रकाश्यन्ते; तृतीये भागे सानुवादाः पारसीकानां गाथाः, साङ्‌लानुवादं महाभाष्यम्, ऋग्वेदश्च सभाष्यो मुद्र्यन्ते।

Several complete sets of Vol. IV of the Manjusha are still available for Rs. 6/- and only a few sets of Vols. I-III are available at Rs. 5/12/- for the lot.

श्रीविश्वनाथ चट्टोपाध्यायः।
८१ श्यामबाजार ष्ट्रीट्, कलिकाता ४।
81, Shyambazar Street, Calcutta 4.
Phone : B. B. 4049.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम् ॥

मञ्जूषा

April, 1951.	१८७२-शकीय-वैशाखस्य पञ्चम-वर्षस्याष्टम-संख्या	Vol. V. No 8.

आभाणकादि

1. It is the truth the counts.

सत्यमेव सम्मन्यते ।

2. It is not the truth that counts, but what people think is the truth.

न खलु सत्यमेव सम्मन्यते, परं यत् खलु जनाः सत्यमिति मन्यन्ते तदेव ।

3. It is the unforeseen (unexpected) that always happens.

यच्चिन्तितं तदिह दूरतरं प्रयाति
यच्चेतसा न गणितं तदिहाभ्युपैति ।
प्रातर्भवामि वसुधातलचक्रवर्ती
सायं स एव विपिने जटिलस्तपस्वी ॥

4. Fly in the ointment.

मधुनि मक्षिका ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

5. Fie upon hens! quoth the fox, because he could not reach them.

शृगालेनोक्तम्, धिक् कुक्कुटीः, स हि ता नासादितवतीति।

The grapes are sour.

अम्लरसानि हि द्राक्षाफलानि।

नूनं द्राक्षा रुक्षा

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

एकदा जम्बुकः कश्चिद् भ्रामं भ्रामं वने वने।
ददर्श गोस्तनीगुच्छं बहिरन्तःस्फुटद्रसम्॥
पक्वद्राक्षाप्रलुब्धोऽसौ बहुधा प्लुतिमाचरत्।
फलानां पुनरुच्चैस्त्वान्नासीत्तद्ग्रहणे प्रभुः॥
अन्ततश्च परिश्रान्तोऽवदद्धूर्तशिरोमणिः।
अम्ला हि सुतरां द्राक्षा कस्तामत्तुमिहार्हति॥
सर्वथा यत्नमास्थाय यो यन्नैवाधिगच्छति।
स तस्यापगुणत्वं हि कीर्तयत्येव सर्वदा॥

सुभाषितम्

यथा वृक्षस्य संपुष्पितस्य दूराद् गन्धो वाति, एवं पुण्यस्य कर्मणो दूराद् गन्धो वाति, यथाऽसिधारां कर्तेऽवहितामवक्रामेद् यद् युवे हुवे ह वा विह्लदिष्यामि कर्तं पतिष्यामि, इत्येवम् अनृताद् आत्मानं जुगुप्सेत्। तैत्तिरीयारण्यकम् १०।९।

सायणभाष्यम्। अथ विहितानुष्ठानरूपं पुण्यं ज्ञानसाधनतया प्रशंसति, निषिद्धाचरणं ज्ञानप्रतिबन्धकतया निन्दति—यथा वृक्षस्येति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लोके 'यथा वृक्षस्य' उद्यानादौ स्थितस्य 'संपुष्पितस्य' सम्यग्विकसित-पुष्पोपेतस्य यो 'गन्धः' सुरभिरस्ति सोऽयं 'दूराद्' देशाद् 'वाति' वायुना सहाऽऽगच्छति 'एवं पुण्यस्य कर्मणः' ज्योतिष्टोमादेः सत्कीर्तिः सुगन्धसमाना 'दूराद् वाति' मनुष्यलोकात् स्वर्गं गच्छति। तस्मात् पुण्यम् अनुष्ठेयम्। अथ पापस्य दृष्टान्त उच्यते—यथा लोके राजामात्यादीनां विनोदाय प्रवृत्तो वंशाग्रवृत्तादिदुर्घटव्यापारेष्वत्यन्त-कुशलमनाः कश्चित् 'कर्ते' कूपादावगाधे कस्मिंश्चिद् गर्तविशेषे 'अवहितां' प्रसारिताम् 'असिधारां' खड्गधाराम् 'अवक्रामेत्' पादाभ्यां धाराया उपरि गन्तुं प्रवर्तते। तदानीमसौ मनस्येवं विचारयति। 'यद्' यदि 'युवे' 'हुवे'। हकारो व्यत्ययेन यकारस्थाने पठितः। अत एव केचिद् युवे युवे इति पठन्ति। यौमि यौमि पुनः पुनः पादमसिधारया मिश्रयामीत्यर्थः। तदाहं 'विह्लदिष्यामि' 'कर्ते' वा 'पतिष्यामि'। अहमित्येतमर्थं हशब्दो ब्रूते। लकारस्थाने व्यत्ययेन दकारः। असिधारायां पादस्य दृढस्पर्शे पादच्छेदेनाहं विह्वलितो विवशो भविष्यामि, दृढस्पर्शाभावे त्वधोवर्तिन्यगाध गर्ते पतिष्यामि 'इति'। 'एवं' पापे वर्तमानः पुरुषो विचारयेत्। यद्यहं पापं प्रकटं कुर्यां तदानीमिह लोके निन्दितो भविष्यामि, तत्परिहाराय अप्रकटं कुर्यां तदापि नरके पतिष्यामीति। ईदृग्विचारयुक्तः पुरुषः 'अनृतात्' पापात् 'आत्मानं 'जुगुप्सेत्' धिङ् मां लोकद्वयभ्रंशहेतुम् इति निन्दित्वा पापान्निवारयेत्।

महाभाष्यविमर्शः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

"नच्छन्दस्यपुत्रस्य" [७।४।३५] इति सूत्रस्य भाष्ये दृश्यते—"अत्यल्पमिदमुच्यतेऽपुत्रस्येति। अपुत्रादीनामिति वक्तव्यम्। इहापि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा स्यात् । "जनीयन्तो न्वग्रवः पुत्रीयन्तः सुदानवः" [ऋ० स० ७।९६।४] इति ।। अत्र कैयटः । "जनमिच्छन्तीति क्यच् । लटः शत्रादेशः ।" इति ।। अत्रोद्द्योतः । "जनीमिच्छन्तीति व्याख्यानं तु भाष्यविरुद्धम् ।" इति ।

काशिकायामपि दृश्यते—"अपुत्रादीनामिति वक्तव्यम् । जनीयन्तो न्वग्रवः ।" इति । अत्र पदमञ्जरी । जनमिच्छन्तो जनीयन्तः । लटः शत्रादेशः । उगिदचामिति नुम् । अपरे त्वाहुः । 'जनीमिच्छन्तः जनीयन्तः । जनीति वधूरुच्यते ।' इति । तत्रादिग्रहणस्य प्रयोजनान्तरं मृग्यम् ।" इति ।

सिद्धान्तकौमुद्यां दृश्यते "जनीयन्तो न्वग्रवः । जनमिच्छन्त इत्यर्थः ।" इति । अत्र लघुशब्देन्दुशेखरः—"आदिग्रहणस्य प्रयोजनान्तरं मृग्यम् इति हरदत्तः ।" इति ।

अत्रेदमवधेयम् । छन्दसि जनिशब्दः* सुप्रसिद्ध एव, तत एव जनीयन्तः-पदस्योद्भवो वेदभाष्यकृतामभिमतः । इदं तावदुद्धृतमन्त्र-शरीरम्—

जनीयन्तो न्वग्रवः पुत्रीयन्तः सुदानवः ।
सरस्वन्तं हवामहे ।।

इति । अत्र सायणभाष्यम् । जायन्ते आस्वपत्यानीति जनयः जायाः । ता इच्छन्तः । पुत्रीयन्तः पुत्रान् कामयमानाः । सुदानवः शोभनदानाः अग्रवः उपगन्तारो वयं नु अद्य सरस्वन्तं देवं हवामहे स्तुमहे ।

पदपाठे जनिशब्दादनन्तरमवग्रहो दृश्यते—जनिऽयन्तः इति । अतो व्याख्यानमिदं पदपाठानुसार्येव ।

मन्त्रान्तरेऽपि जनीयन्तः-पदमुपलभ्यते । तत्र जनिशब्दादेव जनीयन्तः पदस्योत्पत्तिर्विस्पष्टतरा । स च मन्त्रो यथा—

* Sanskrit *jani-h*, Av. *jani*, Modern Persian *Zan*.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गव्यन्त इन्द्रं सख्याय विप्रा
अश्वायन्तो वृषणं वाजयन्तः ।
जनीयन्तो जनिदामक्षितोति-
मा च्यावयामोऽवते न कोशम् ॥ [ऋ० सं० ४।१७।१६]

इति । अत्र सायणभाष्यम्—गव्यन्तः गा इच्छन्तः अश्वायन्तः अश्वानिच्छन्तः वाजयन्तः वाजम् अन्नम् इच्छन्तः जनीयन्तः जायाश्च इच्छन्तः विप्रा मेधाविनः स्तोतारः वयं सख्याय इन्द्रसम्बन्धिने सखित्वाय वृषणं कामानां वर्षितारं जनिदां जायाप्रदाम् अक्षितोतिम् अक्षीणरक्षम् । सर्वदा रक्षाकरमित्यर्थः । एवम्भूतमिन्द्रमा च्यावयामः आगमयामः । तत दृष्टान्तः । अवते कूप । अवत इति कूपनाम, "अवतः अवटः क्रिविः" इति कूपनामसु पाठात् । कोशं न जलोद्धरणपात्रमिव । पुरुषः जलोद्धरणपात्रं जलेन पूरयितुं कूपे यथाच्यावयन्ति तथा वयमाच्यावयाम इत्यर्थः ।

अत्र प्रयोजनान्तरं मृग्यमिति हरदत्तमिश्राः । प्रयोजनान्तरं तु वर्तत एव । चरण-रथ-शपथान्नानामीत्वं प्रयोजनम् । अजिरऋततिल्विलादीनां दीर्घत्वं च प्रयोजनम् । तथाच मन्त्रवर्णाः—

समानमर्थं चरणीयमाना चक्रमिव नव्यस्या ववृत्स्व
[ऋ० सं० ३।६१।३]

विश्वो वो अज्मन् भयते वनस्पती रथीयन्तीव प्र जिहीत ओषधीः
[ऋ० सं ११६६।५]

अपामूर्मिर्मदन्निव स्तोम इन्द्राजिरायते [ऋ० सं० ८।१४।१०]
मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः [ऋ० सं० ११९०।६]

इत्यादयः ।

वैदिकशिरोमणिना पतञ्जलिना दीर्घत्वोत्वयोरुभयोरपि प्रतिषेधाभाव इति प्रदर्शनायोदाहरणमुपन्यस्तम्—"जनीयन्तो न्वग्रवः पुत्रीयन्तः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुदानवः" इति, अन्यथा 'जनीयन्तो न्वग्रवः' इति पादमेवोदाहरेत् इति प्रतिभाति ।

कण्वचरितम्

प्राचीनम्

कण्वो वै नार्षदो बकस्यासुरस्य दुहितरमविन्दत । तस्यां हास्य त्रिशोकनभाकौ जज्ञाते । सा ह क्रुद्धा ज्ञातीनाययौ । तां हान्वाजगाम । तां हासुरावलेपेनावलिम्पन्त ऊचुः—अत्र व्युष्टां विजानीहि यदि ब्राह्मणोऽसीति । तदु हाश्विनावनुबुबुधाते । अश्विनौ हि देवानां बद्धमुचौ । तौ हैनमदृश्यमाना उपेत्योचतुर्यदैव त्वावं वीणां समाघ्नन्तावुपरिपताव, अथ व्युष्टां विजानीतात् । इत्युक्त्वा हाथ हैतौ वीणां समाघ्नन्तावुपर्युपर्यतिपेततुः । स होवाचापहरतेदम् । एतर्हि यावद् युङ्ग्ध्वं सीराणीति । ते होचुः—ब्राह्मणो वायमृषिरास, उप ह वास्य जाया । हन्तास्मा इमां ददामेति । तां हास्मै ददुः ।

अर्वाचीनम्

ब्राह्मण्यस्य परीक्षार्थमसुराः कण्वमृषिं गूढे तमसि निदधुः । अत्रैव स्थितः सन् व्युष्टामुषसं विजानीहि यदि त्वं ब्राह्मणोऽसीति । तमश्विनावागत्योचतुः—व्युष्टायां हर्म्यस्योपरि वीणां वादयन्तावावामागमिष्यावः । तं शब्दं श्रुत्वा व्युष्टामुषसं ब्रूहि । इति ।

प्राचीनानि खृष्टीयस्तोत्राणि

[R. Antoine, S. J.]

At Terce.

Come, Holy Ghost, Who ever One,
Reignest with Father and with Son,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

It is the hour, our souls possess
With Thy full flood of holiness.

Let flesh, and heart, and lips, and mind,
Sound forth our witness to mankind;
And love light up our mortal frame
Till others catch the divine flame.

Grant this, O Father, Only Son,
And Holy Spirit, God of grace,
To Whom all glory, Three in One,
Be given in every time and place. Amen

Ad Sextam. — मध्याह्ने ।

Rector potens, verax Deus, Qui temporas rerum vices, Splendore mane illuminas Et ignibus meridiem.	हे अमोघविधे धातः प्रशास्सि त्वं चराचरम् । प्रभातस्य प्रभाऽसि त्वं मध्याह्नस्य त्वमातपः ॥
Exstingue flammas litium, Aufer calorem noxium, Confer salutem corporum Veramque pacem cordium.	शमय त्वं कलिज्वालं क्रोधोष्माणं च घातुकम् । आरोग्यं देहि गात्रेषु शान्तिं मनसि धेहि नः ॥
Praesta, Pater püssime, Patrique compar Unice, Cum spiritu Paraclito Regnans per omne saeculum.	दयां कुरु पितः श्रेष्ठ सूनो सरूप पाहि नः । परमात्मनि संश्लिष्टौ विराजेथे युगे युगे ॥
Amen.	तथास्तु ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Ad Nonam

Rerum, Deus, tenax vigor,
Immotus in te permanens,
Lucis diurnae tempora
Successibus determinans.

Largire lumen vespere
Quo vita nusquam decidat,
Sed praemium mortis sacrae
Perennis instet gloria.

Praesta, Pater püssime,
Patrique compar Unice,
Cum spiritu Paraclito,
Regnans per omne saeculum.

Amen.

विकाह्ने

अभूर्बिभर्षि भूतानि
नित्योऽनित्यानि मुञ्चसि ।
प्रतियामं गतिर्भानो-
रानुपूर्व्यं त्वया मिता ॥

अवसाने गतप्राणा
लभेमह्यक्षरां रुचिम् ।
त्वयि संन्यस्तसर्वस्वा
मृता जीवेम शाश्वतम् ॥

दयां कुरु पितः श्रेष्ठ
सूनो सरूप पाहि नः ।
परमात्मनि संश्लिष्टौ
विराजेथे युगे युगे ॥

तथास्तु ।

At Sext.

O God, Who canst not change nor fail,
Guiding the hours, as they roll by,
Brightening with beams the morning pale,
And burning in the mid-day sky ;

Quench Thou the fires of hate and strife,
The wasting fever of the heart ;
From perils guard our feeble life,
And to our souls Thy peace impart.

Grant this, O Father, Only Son,
And Holy Spirit, God of grace,
To Whom all glory, Three in One,
Be given in every time and space.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

At None.

O God, Unchangeable and True,
Of all the Light and Power,
Dispensing light in silence through
Every successive hour.

Lord, brighten our declining day,
That it may never wane,
Till death, when all things round decay,
Brings back the morn again.

Grant this, O Father, Only Son,
And Spirit, God of grace,
To Whom all worship shall be done
In every time and place. Amen.

पाठ-विमर्शः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

विदितमेवैतद्वाचकमहाभागानां यन्मञ्जूषायाश्चतुर्थवर्षस्य द्वादश-संख्यायां (पृ: ३८८) "शिरो मे शीर्यते मुखे" इति महाभाष्यगतस्य [६।१।६०] पाठस्य प्रामादिकत्वं प्रतिपादितम्। कातन्त्रपरिशिष्टे कारकप्रकरणस्य ८८-तमे सूत्रे दृश्यते—"औपचारिकेऽपि क्वचित् स्वलिङ्गं—कुन्तेन स्त्रिया, यष्ट्या पुरुषेण, गौः कलत्रम्। क्वचिदन्यथा। क्रोष्टुने अरण्याय। 'शिरो मे श्रि यशो मुखम्' इति भाष्यम्। अतो हि स्मरन्ति लिङ्गस्य लोकाश्रयत्वादिति" इति। अत्र नपुंसकलिङ्गशब्दत्रितयसान्निध्यतः पाठभ्रंशात् परिशिष्टकारसन्दृष्टे महाभाष्यपुस्तके श्रीशब्दस्यापि क्लीबत्वं सञ्जातम्। "शिरो मे श्रीर्यशो मुखम्" इत्यव पारमार्थिकः पाठः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सीमा-समस्या

[श्रीउपेन्द्रनाथ-गङ्गोपाध्यायः]

(५)

अचिरादेव सङ्घस्य सभापतिं स्थिरीकृत्य तस्मिन्नेव दिने सन्ध्यामनु नेओयालालः समरेशस्य गृहमनुप्राप्तः। तत्र च समरेशेन पत्रशरीरं विनिर्माप्य परद्यवि चतुर्वादनतः पूर्वमेव सङ्घस्य सभापतेः स्वहस्ताक्षरेण नाम निवेश्याधिकारिभ्यः पत्रं प्रायच्छत्। तस्य चातिसंक्षिप्तस्य पत्रस्य मर्म—परिशोधितायां प्रार्थनतालिकायां यानि तावत् प्रार्थनानि समुल्लिखितानि ततः सूच्यग्रमप्यपसर्तुं न प्रभवति सङ्घ इति।

प्रोक्तपूर्वस्य पत्रस्य विनिर्मापनदिवस एव समरेशेन साकं नेओयालालस्य प्राथमिकः परिचयः। तत ऊर्ध्वं यदैव धर्माधिकरणगतं वा व्यवहारसम्पृक्तं वा किमपि प्रयोजनं समुपनतं समरेशमेकं वर्जयित्वा कस्याप्यन्यस्य साहाय्यं तेन नैव स्वीकृतम्। न केवलं स्वीय एव प्रयोजने, स्वजनानां बान्धवानां च यस्य यदैव व्यवहाराजीवेन प्रयोजनं सञ्जातं तदैव प्रबन्धं कृत्वा तेनासौ समरेशस्य सविधे सम्प्रेषितः।

करणालये (अफिसगृहे) बृहतः काष्ठमञ्चस्य (सेक्रेटारियाट् टेबिलस्य) पुरतो नेओयालालो निषण्ण आसीत्। प्रविष्ट एव समरेशे स ससम्भ्रमं समुत्थायानतकायमभिवाद्यावदत्, राम राम, बाबुजी। नमामि ते चरणयोः। अपि कुशलं सर्वत्र ? इति।

समरेशनोक्तम्, राम राम। उपविश्यताम्, नेओयालाल, उपविश्यताम्। अथ किम्, कुशलं सर्वत्र। को वा तव वृत्तान्तः ? उच्यताम्। कच्चित् सुखेन ते दिनान्यर्तियन्ति ? इति।

समरेशस्य समुपवेशनानन्तरं काष्ठासने समुपविश्य नेओयालालोऽवदत्,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवतः कृपया सुखनैवातियन्ति स्म, परं नैव दत्तमेवमत्येतुमार्य । सर्वथा विकृतं सञ्जातं जगत्, असुराणामेवाशेषाणां राज्यं सञ्जातम् इति ।

"केन वा त्वय्यासुर्यं प्रकटीकृतम् ?"

"नित्यमेव य आसुर्यं प्रकटयन्ति तान् वर्जयित्वा को वापरः कुर्य्यादार्य । ये तावन्मदीयमेव खाद्यं खादित्वा मदीयमेव परिधानीयं परिधाय वृद्धिं समुपागतास्त एव । सर्वमेव निवेदयामि भवते ।" इत्युक्त्वा नेओयालालः कञ्चुककोषाद्धातुमयान् पञ्चविंशतिं रूपकान् पत्रावृतान् विनिष्कास्य पत्रमपसार्य समरेशस्य पुरतः स्थापितवान् ।

"कस्य कृतेऽयमर्थः ?"

कृताञ्जलिर्नेओयालालोऽवदत्, "अनेन तावदार्यं प्रणमामि । न खल्वार्यः केवलं मे व्यवहाराजीवः, दैवतमपि ।"

न खल्वीदृशो व्यतिकरः प्रथममेवाद्य सञ्जातः । इतः पूर्वमपि यदैव नेओयालालो व्यवहारकर्मणे समरेशस्य सविधं समुपागतस्तदैव प्रथममेव कांश्चन रूपकान् दर्शनीरूपेण प्रायच्छत् । परं दर्शन्यास्तस्याः परिमाणं पञ्चस्वेव रूपकेषु नियन्त्रितमासीत्, एकद्वान् वारांश्च वर्जयित्वा दशरूपकपर्यन्तोऽपि तस्य प्रसारो नादृश्यत । साम्प्रतिकं रूप्यकपरिमाणमवलोक्य समरेशेनानुमितं दर्शन्यनुरूपं कार्यस्यापि गुरुत्वं समधिकं स्यादिति । परं नेओयालालमुखात् तस्याशान्तिकारणं सविस्तरं समाकर्ण्य तेनाववुद्धं कार्यस्य गुरुत्वं समधिकं भवतु वा मा वा, वारेऽस्मिंश्चक्रस्य परिपूर्णं परिवर्तनं सञ्जातम्, यस्तावन्नीचैरासीत् स सर्वथा उच्चैरेवारूढ़ः । यदि वारेऽस्मिंस्तेन व्यवहारकर्म कर्तव्यं स्यात्, तर्हि सर्पस्य पक्षतो भेकस्य प्रातिकूल्यं कर्तव्यं स्यात् । अस्यार्थस्त्वयमेव, न खल्विदानीं नेओयालालः पूर्ववच्छ्रमिको

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्तते, इदानीं स वणिगेव। अधिकारी भूत्वा स कर्मकराणां स्कन्धमारूढः। इति।

केन्सिङ्टन् आयरन् ओयार्कस् इत्यस्य कर्मकरत्वं परिहृत्य स्वसञ्चितेनार्थेन व्यवसायसामर्थ्यस्य च साहायकेन कर्मारशालां प्रतिष्ठापितवतस्तस्य त्रीणि वर्षाणि व्यतीतानि। स्वजन्मभूमेर्नाम्ना तेन कर्मारशालाया नाम विहितं कक्रौली आयरन् ओयार्कस् इति। विश्वविध्वंसिनो रक्तस्राविणः सम्परायस्य प्रसादेन वर्षत्रयणैव तेन सर्वथा श्रेयसो मुखं सन्दृष्टम्। परं साम्प्रतमस्य श्रेयसः सौवर्णे वर्त्मनि परिपन्थिरूपेणावतिष्ठते देवनन्दनसहायः। न खलु कक्रौलि आयरन् ओयार्कस् इत्यस्य समुद्भववृत्तान्तोऽपरिज्ञातः समरेशस्य, परं देवनन्दन-सहायस्य परिपन्थितया समुत्थानं सर्वथाभिनवमेव।

केनसिङ्टन् आयरन् ओयार्कस् इत्यतः प्रयाणावसरे नेओयालालेन ये तावत् कतिपये कर्मिणस्ततः संस्राव्यानीतास्तेषु योग्यतम एवासीद्देव-नन्दनसहायः। अधुनासौ कक्रौली आयरन् ओयार्कस् इत्यस्य चीफ् ओयार्कस् म्यानेजार् (प्रधानकार्यपरिचालकः)। तस्य सुनिपुण-परिदर्शनप्रभावेण कक्रौली आयरन् ओयार्कस्-संस्थेयं केनसिङ्टन् आयरन् ओयार्कस्-संस्थां क्रोधेन तापयितुमुपक्रमते।

धूर्तो नेओयालालो देवनन्दनस्यास्रावणावसरे तस्य मासिकं वेतनं समधिकं वर्धयित्वा पञ्चभ्यो वर्षेभ्यः स्वीकृतिपत्रं तेन लेखितवान्। तत्पत्रानुसारेणेतः परमपि किञ्चिदधिकंवर्षद्वितयं देवनन्दनो वेतन-वृद्ध्यर्थं निर्बन्धं कर्तुं न प्रभवति, परं कक्रौलि आयरन् ओयार्कस् इत्यस्याचिन्त्यपूर्वार्थागमसन्दर्शनेन तस्य नयनदाहः समुद्भूतः। तेनोच्यते, स्वीकृतिपत्रानुसारेण वेतनवर्धनं न सम्भवेच्चेत् कियतश्चनां-शस्य पार्टनारम् (अंशिनं) विधाय मां प्रशमयितुमर्हसि, अन्यथावरतः पञ्चाशतं कर्मिणः संस्राव्य जन्मग्रामस्य स्मृतिरक्षार्थं काल्कापुर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आयरन् ओयार्कस्नाम्ना कर्मारशाला मया प्रतिष्ठापयिष्यते। स्वीकृतिं-भङ्गापराधाद् धर्माधिकरणनिर्णयेन यदि एकान्तत एव किञ्चिद्धनं क्षतिपूरणार्थं प्रदेयं स्यात्, तथापि सर्वथा लाभवानेवाहं भविष्यामि।"

समरेशोऽवदत्, येषामसुराणां वृत्तान्तस्त्वयोपवर्णितः देवनन्दनस्तर्हि तेषामन्यतमः? इति।

नयने विस्फार्य नेओयालालेनोक्तम्, आर्य! अन्यतम इति किमुच्यते स खल्वसुराणामग्रणीर्वर्तते, अन्यथा कथं वा ब्रूयात् यदि वर्षपञ्चकं वेतनवृद्धिकल्पः स्वीकृतिपत्र न वर्तते तर्ह्यधिकारिणामन्यतमं विधाय लभ्यस्यांशो दीयतामिति। शाटकप्रदानस्य कल्पो नास्तीति पात्लुन (pantaloons) प्रदेय इति को वा हठात्कारनयः? किञ्च पञ्चवार्षिकं तत् स्वीकृतिपत्रं तेन स्वेनैव हस्तेन लिखितम्, तत्र च स्वस्या एव लेखन्याः स्वनामाक्षराणि वर्तन्त एव।" इत्युक्त्वा प्रगाढेन विस्मयेनापरागेण च निर्निमेषाभ्यां नयनाभ्यां समरेशमवलोकयन् स्थितः।

मनसि विहस्य समरेशोऽवदत्, "केनसिङ्टन् आयरन् ओयार्कस्"-प्रातिकूल्येन यदा युष्माभिर्धर्मघटो विहितस्तदापि युष्माकं प्रभूणां सविधे सार्भिस्-बुक् (कार्यपुस्तक)-स्वीकृतिपत्र-प्रभृतीनि सुबहूनि पत्रादिकान्यासन्, परं तदानीं युष्माकं मन्त्र आसीत्—छिन्धि भिन्धि मुषाण गृहाणेति। युष्माकमेव सकाशात् तांस्तान् मन्त्रानधिगत्य यदि साम्प्रतं देवनन्दनः स्वीयं स्वीकृतिपत्रं छेत्तुमिच्छेत्, तर्हि वद त्वं किं कर्तुं प्रभवेः। किञ्च, यथा त्वं देवनन्दनादीनादाय विनिष्क्रम्य केनसिङ्गटनं पराभूतवान्, यदि देवनन्दनोऽपि त्वत्तोऽधीतविद्यः सर्वथा तथैव कक्रौलिं पराभवेत्, तर्ह्यपि त्वं किं वा कर्तुं प्रभवेः। शृणोमि तावत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नेओयालालोऽवदत्, वयं तावदधिकारिणां सविधे कृताञ्जलिपुटेन भिक्षां प्रार्थितवन्तः, देवनन्दनो मुष्टिं सन्नह्याहन्तुमागच्छति।

मृदु विहस्य समरेशेनोक्तम्, "कृताञ्जलिपुटेन त्वं तावद् यथा स्वप्रभून् पराभूतवान् न खलु मुष्टिसन्नाहेन देवनन्दनस्ततोऽप्यर्धं पराभवितुं प्रभविष्यतीति मे प्रत्ययः।"

नेओयालालः। नहि, नह्यार्य। स हि सर्वथोत्पीड़क एव। एतादृशः कृतघ्नः समग्रे भारतवर्षे द्वितीयो वर्तते वा न वेति न जानीमः। अन्तरान्तरा मम मनसि किं वा समुदेति, ज्ञायते वार्य ? मनस्युदेति—मया प्रभूणां यत् क्लेशो विहितस्तेनैव पापेन देवनन्दनोऽपि मम क्लेशं विदधाति। अधिकारी, धनाढ्यः, भूस्वामी—सर्वः सोपानश्रेणीन्यायेन वर्तते, आर्य। मत्कुणो मम रुधिरं पिबति, अहं छागस्य रुधिरं पिबामि, छागस्तृणस्य रुधिरं पिबति। इयमेव रीतिः संसारस्य, आर्य।

समरेशस्तूष्णीं स्थितः। तेनावबुद्धं केन् सिङ्टनत आगमनावसरे नेओयालालेनाधिकारिणां सकाशान्नीलमुपनेत्रमेकं याचित्वानीतम्। साम्प्रतं स चतुर्दिशं नीलमेव सम्पश्येत्।

आटाशिकेसतः रेजिष्टारी-पत्रपिधानमेकं निष्कास्य समरेशस्य पुरो निधाय नेओयालालेनोक्तम्, "पत्रमिदं देवनन्दनेन प्रेषितम्। एतद् द्रष्टव्यम्। परश्वः प्रातरागत्य भवतोऽभिमतं ग्रहीष्यामि।"

पत्रापिधानं नेओयालालस्याभिमुखेऽपसार्य समरेशोऽवदत्, "तत्तु न भविष्यति, नेओयालाल।"

चिन्तितवदनेन नेओयालालेनोक्तम्, "कथम् आर्य ?"

"त्वं तावदद्य व्याघ्रः सञ्जातः। जानास्येव त्वं न खल्वहं व्याघ्रस्य पक्षं परिगृह्णामीति। गावः, मेषाः, छागाः—एषामेवाहं व्यवहाराजीवः।"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृताञ्जलिना नेओयालालेनोक्तम्, "अहं सर्वदैवार्यस्यच्छाग एव भवामि।"

शिरः कम्पयित्वा समरेशेनोक्तम्, "नहि नहि, एतद्वचनस्य कोऽप्यर्थो नास्ति। देवनन्दनमन्तरा त्वं व्याघ्र एव, न तु छागः।"

नेओयालालेन बहुधा निर्बद्धोऽपि समरेशः कथमपि न सम्मतोऽभूत्। अगतिकतया पत्रं भस्त्रिकायां रक्षित्वोत्थाय दण्डायमानोऽसाववदत्, "परश्वोऽहं सकृदेवागमिष्यामि। मनसा कथञ्चित् करुणां कृत्वावस्थेयम्।"

समरेशोऽवदत्, "किमिति परश्वः, श्व एवागन्तव्यम्।" अभिवादन-पूर्वकं प्रतिष्ठत इति दृष्ट्वा ससम्भ्रममवदत्, "श्रूयतां नेओयालाल। अर्थं तावत् परित्यज्य प्रस्थितोऽसि। अर्थं त्वदीयं गृहीत्वा गच्छ।"

प्रत्यावृत्य नेओयालालोऽवदत्, "आर्य, अर्थस्तावन्निवेद्य दत्तः, एतस्य पुनर्ग्रहणेन पापमेव स्यात्।"

समरेशोऽवदत्, "एतेनार्थेन तेऽस्या देवताया भोगः कथमपि न सम्पद्येत। त्वमिमं प्रत्यादाय गच्छ।"

व्याकुलवदनो नेओयालालः कृताञ्जलिरभाषत, "न खल्वीदृशम-न्याय्यमादेशं कर्तुमर्हत्यार्यः।"

समरेशोऽवदत्, "भवतु। त्वं तावद्बहूनर्थिनो मत्सविधे प्रेषयसि, तेष्वेव कस्यचिद्धस्तेनार्थमिमं प्रेषय।" ततश्च सपदि किञ्चित् स्मरन् सहासमवदत्, "अन्यः कोऽपि न लभ्यते चेद् देवनन्दनस्यैव हस्तेन प्रेष्यताम्, तव प्रातिकूल्येन तस्यैव व्यवहाराजीवेन मया भवितव्यम्।"

समरेशस्य वचनश्रवणेन नेओयालालस्य वदनमण्डलं हर्षोत्फुल्लं सञ्जातम्। स सोत्साहकण्ठमवदत्, "आर्य, अतीव समीचीनं वचनम्। व्यवहाराजीववरणाय भवत एव सविधे देवनन्दनं प्रेषयिष्यामि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अवश्यं चेन्मर्तव्यं रामस्यैव हस्तेन मरिष्यामि, रावणस्य हस्तेन मृत्युश्चेत् क्लेशोऽपि भविष्यति सम्मानहानिरपि ।"

स्मितमुखेन समरेशेनोक्तम्, "का तर्हि बाधा वर्तते ? अद्य त्वं रूपकान् गृहीत्वा गच्छ ।"

किमप्यनुक्त्वा सम्पुटितकरयुगलो नेओयालालस्तथा सकरुणं दृष्टिपातमकरोद् यथा समरेशः किमपि वक्तुं न प्रबभूव ।

प्रस्थिते नेओयालाले समरेशो मञ्जूषामुद्घाट्य दिनपत्रिकापुस्तकं विनिष्कास्य किमप्यलिखत्, ततश्च रूपकान् कञ्चुककोषे निक्षिप्य प्रदीपं निर्वापितवान् ।

यदा तावत् समरेशोऽभ्यन्तरं प्राविशत् तदा वनलता रेडिओयन्त्रं समुद्घाट्य चेयारासने समुपविष्टासीत् । समरेशं दृष्ट्वा रेडिओयन्त्रं निरुध्य गम्भीरवदनावदत्, "गतो नेओयालशार्दूलः ?"

वनलताया वचनमाकर्ण्य समरेश उच्चैर्हसित्वावदत्, "सर्वमेव श्रुतमिति पश्यामि ।"

"दृष्टं तावत् कथं लीलयैव नेओयालालच्छागो नेओयालालशार्दूले विपरिणमते । उक्तमेव मया यावद् वंशो वंश एव स्थास्यति दूर्वा च दूर्वैव तावत् संसारे नेओयालालच्छागो नेओयालालशार्दूलश्चोभावेवावतिष्ठेयाताम् ।"

समरेशोऽवदत्, "किञ्च तावदेव नेओयालालच्छागानां व्यवहारादीनां कृते धर्माधिकरणे सँइयालालचतुर्धुरीणा अप्यवतिष्ठेरन् ।"

उभयोर्हास्यरवेण कक्षश्चकित इवाभवत् ।

वनलतावदत्, "किमिति छागानां व्यवहाराजीवेन सता व्याघ्रस्यार्थस्त्वया स्वीकृतः । अमुमर्थं मह्यं देहि ।"

कञ्चुककोषाद् रूपकान् विनिष्कास्य वनलतायै प्रयच्छन् समरेशोऽवदत्, "सम्यक्, व्याघ्रस्यार्थो व्याघ्री गृह्णातु ।"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भ्रूभङ्गमाधाय वनलतावदत्, "किमिति व्याघ्रीत्युच्यते ? अहं तावद् वनलता मृगी एव ।"

सहास्यवदनः समरेशोऽवदत्, "सा हि मम मनोवनस्य मृगी ।"

वनलतावदत्, "मनोवनस्य हरिणी वा भवामि, यत्किमपि वा भवामि, कियंताप्यंशेनाहं व्याघ्रयपीति नात्र सन्देहः ।"

सकौतूहलं समरेशोऽवदत्, "कथमिव ? उच्यताम् ।"

"उच्यते । ततः पूर्वमपरं किञ्चिदुच्यते ।"

"किं वा ?"

"तेन तु त्वं प्रीत एव भविष्यसि । आकलुमहत्तरः सार्द्धं रूप्यकं याचते ।"

सहासं समरेशोऽवदत्, "नूनमेतत् प्रीतिकरमेव । तर्हि मासादस्मादारभ्य तस्मै सार्धमेव रूप्यकं प्रदीयताम् ।"

"त्वं तावत् त्रीनपि रूपकान् दातुं सन्नद्ध आसीः ।"

"तत्तु तेन रूप्यकपञ्चकं प्रार्थितमिति श्रुत्वा ।"

"तर्हि रूप्यकपञ्चकं प्रार्थ्यते चेदगत्या त्वं रूप्यकत्रितयं प्रयच्छसि, गत्यन्तरं चेत्, नैव प्रयच्छसि । नैवम् ? तर्हि तवाप्यभ्यन्तर सँइयालालशार्दूलोऽंशतो विराजते इति वक्तव्यम् ।"

सहास्यास्यः समरेशोऽवदत्, बुद्धम्, न खल्वपरं किमपि वक्तव्यम् । यदा तावदहमंशतः सँइयालालशार्दूलः, तदा त्वमप्यंशतो वनलताशार्दूली ? अपि नेदमेवम् ?

वनलतावदत्, सम्यक् । अत एवोच्यते सर्वेषामेवास्माकमभ्यन्तर कियताप्यंशेन छागः कियताप्यंशेन च शार्दूल उभयमपि वर्तते । परं यस्याः सीमायाः प्रान्ते वयं छागरूपेण विषाणाघातं परिहृत्य शार्दूलरूपेण दंशनमारभामहे तस्या रेखाया निर्देशो न खलु सर्वत्र सुशकः । इत्युक्त्वा सा रेडिओयन्त्रं प्रवर्तितवती ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विष्णुसूक्तम् १।१५४

[श्रीमहालिङ्ग-शास्त्री]

य: पृथ्वीपरिकलितान् ममौ हि लोकान्
आक्रामन् विततगतिस्त्रिधा, प्रकृष्टम् ।
य: स्थानं शरणयतामतिष्ठिपच्च
प्रब्रूम: किल महिमानमद्य विष्णो: ॥

यस्योरुष्वपि निवसन्ति विक्रमेषु
त्रिष्वेतान्यपि भुवनानि गीयतेऽसौ ।
वीर्येण ह्यतिमहता मृगो महीयान्
स्वच्छन्दं गिरिषु चरन्निवातिभीम: ॥२॥

सूक्तं न: शुभमुपयातु विष्णुमद्रि-
स्थास्नुं विस्तृतपदविक्रमं महोक्षम् ।
यो लोकत्रयमिदमेक एव पादै-
र्विस्तीर्णं त्रिभिरभिमीत सर्वदिक्कम् ॥३॥

यस्य त्रीण्यमृतनिरन्तराणि नित्या-
न्यन्नेनाखिलमुदमावहन् पदानि ।
यश्चक: समुपहितत्रिधातुवृद्धिं
द्यामुर्वीमपि च दधार भूतजातै: ॥४॥

इष्टं यद् विकटपरिक्रमस्य विष्णो -
रात्मीयं परमपदे स्रवत्सुधाढ्यम् ।
भक्तानामपहितमोदभूम नृणां
तन्न: स्यादभिगमनार्हमन्तरिक्षम ॥५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इच्छामः किल युवयो र्गृहाणि गन्तुं
गावो यान्युपनिपतन्ति भूरिशृङ्गाः ।
यत्रोरुक्रमगमनस्य तस्य चोक्षणः
तद्भूरिद्युति परमं पदं विभाति ॥६॥

जामातृसंशोधनम्

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

प्रियपाठकमहाभागाः, हस्तलिखितानि मुद्रितानि च पुस्तकानि वाचयद्भिर्भवद्भिर्बहुत्र संशोधिताः पाठाः प्रत्यक्षीकृता भवेयुर्ये संशोधयितृणामपाटवमेव प्रकटयन्ति । ईदृशं संशोधनं जामातृसंशोधनमिति व्यपदिश्यते । तद्गता चाख्यायिकेयमेव । आसीत् कस्यचित् पण्डितप्रकाण्डस्य कश्चन मृत्पिण्डबुद्धिर्जामाता । स एकदा श्वशुरालयमागतः श्वशुरं हस्तलिखितं पुस्तकं शोधयन्तमपश्यत् । स हि क्वचिदधिकान्यक्षराणि हरितालेन लिम्पति, क्वचित् पतितानि वर्णानि काकपदसन्निवेशपुरःसरं पार्श्वे विलिखति । अवसरे चास्मिन् केनचन यजमानेनाहूतः श्वशुरमहोदयः पुस्तकं हरितालपिण्डं लेखनीं मस्याधारं च परित्यज्य गृहान्निर्गतः । जामात्रा चिन्तितम्, मयापि श्वशुरस्य कथञ्चन साहाय्यं विधेयम् । एतत्त्वतीव सुकरं कर्म पुस्तकसंशोधनं नाम । इति । एवं विचिन्त्यासौ मूर्खः स्वमनीषिकया पुस्तकं संशोधयितुं प्रवृत्तः । तथाहि नितरामावश्यकानपि भागान् हरितालेनालिम्पत्, सर्वथानपेक्षितानेव शब्दान् काकपदसन्निवेशेन योजयामास, यत्रच्छेदो नापेक्ष्यते तत्र छेदचिह्नं निवेशितवान्, यत्र च च्छेदस्य सन्निवेश एकान्तत एव युक्तस्ततश्छदो निष्कासितवान् । व्यतीते च कियतिचित् काले श्वशुरो गृहं प्रत्यावृत्य जामातुः कापेयकल्पमाचरितमवलोक्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षोभेणाश्रूण्यमुञ्चत् । ततः प्रभृति यदा केनचन पण्डितम्मन्येन संशुद्धस्य विकृतिः क्रियते तदा जामातृसंशोधनमित्युच्यते । मुग्धानल-महोदयेन चैतत् milk-cow emendation इति वर्णितम् । आङ्लभाषायां milk इत्यस्यार्थः दुग्धम् । cow इत्यस्य चार्थो गौः । यदा तावन्मुग्धानल-महोदयः शर्मण्यविश्वविद्यालयेऽधीयन्नासीत् , तदा कस्माच्चन पुस्तकालयादाङ्लभाषामयं पुस्तकमेकं वाचयन् तत्रत्यस्य milch cow-शब्दस्य संशोधितं milk-cow रूपं वीक्ष्य नितरां विस्मितोऽभवत् । आङ्लभाषायां milch cow शब्दस्यार्थः—पयस्विनी गौरिति । एतद-जानता केनचन प्राज्ञमानिना शार्मण्येन संशोध्य milk-cow विहितम् ।

"When a student at the University of Göttingen— I was one day reading an English author, borrowed from the lending library, in the Tauchnitz edition. Here occurred the expression 'milch cow', which was corrected on the margin to 'milk-cow' written in a German hand. The lesson conveyed by this correction I have never forgotten. My hand has often been stayed by the reflexion, "Is this a milk-cow emendation ?' *The Bṛhaddevatā ed. by A. A. Macdonell, Introduction p. xxv.*

पाणिनेर्महत्त्वम्

वारेन्द् फादेह्गोन् (Barend Faddegon) महोदयो हलन्दाभिजनः संस्कृतज्ञो विपश्चिद्वरीयः । तेन खलु तस्य पाणिनिव्याकरणचर्चा-समाख्यस्य सुधीजन-स्वादनीयस्य ग्रन्थस्य प्रारम्भे विलिखितम्—

Goldstücker has admirably attacked Böhtlingk, but for Böhtlingk we forget Goldstücker ;

and Whitney has admirably attacked Pāṇini, but for Pāṇini we forget Whitney.

I adore Böhtlingk because he reveals to us the spirit of Pāṇini.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

I adore Pāṇini because he reveals to us the spirit of India.

I adore India because it reveals to us the Spirit, the Spirit.

साधु खलु गोल्डष्टिकारेण वेटलिङ्कोऽभियुक्तः। परं वेटलिङ्केन वयं गोल्डष्टिकारं विस्मरामः।

साधु खलु हुइटनिना पाणिनिरभियुक्तः, परं पाणिनिना वयं हुइटनिं विस्मरामः।

वेटलिङ्कमहं पूजयामि, स हि नः पाणिनेरात्मानं विवृणोतीति।

पाणिनिमहं पूजयामि स हि नो भारतवर्षस्यात्मानं विवृणोतीति।

भारतवर्षमहं पूजयामि, तद्धि नो विवृणोति आत्मानम्—आत्मानमिति।

सायणभाष्य-पाठविमर्शः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

सहृदयाः, विदितमेव भवतां यत् केचन धातवः प्रायण छन्दस्येवोपलभ्यन्त इति। वेदमुद्रणकाले धातूनिमानधिकृत्य विशेषतः सावधानैर्भवितव्यम्। दहनकर्मा क्षायतिः क्षामशब्दस्य प्रकृतिः, अत एव भगवता पाणिनिना सूत्रितं—क्षायो मः [८।२।५४] इति*। एतस्य च कर्मणि क्षायते इति रूपं न पुनः क्षीयते इति, "घुमास्थागापाजहातिसां हलि" [६।४।६६] इति सूत्रेऽस्यानुपादानात्। अतएव "**क्षीयन्ते** दह्यन्तेऽस्यामोषधिवनस्पतय इति क्षायतेरधिकरणे क्तिन्" इति भाष्यपाठः [ऋ० सं० ६।६।५] अशुद्ध एव। "**क्षायन्ते** दह्यन्तेऽस्यामोषधिवनस्पतय इति क्षायतेरधिकरणे क्तिन्" इति पठनीयम् इति प्रतिभाति।

---

* पुरोडाशे क्षामे [का० श्रौ० सू० २५।८।१७]=पुरोडाशे दग्धे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(२) ८।२४।८-भाष्य दृश्यते—"विद्याम लभेमहि। विद्लृ लाभे। **आदादिकः।** छान्दसो विकरणस्य लुक्" इति। न खलु विद्लृ लाभे इति धातुरदादिषु पठ्यते, नापि वा द्वितीयगणे विकरणस्य लुक् छान्दसो भवितुमर्हति। अत एव "**आदादिकः**" इत्यस्य स्थाने "**तौदादिकः**" इति पठनीयम्।

(३) ८।२१।१८-भाष्ये दृश्यते—"अन्यके यके। अल्प इत्यर्थे कः।" इति "अल्प **इत्यर्थे** कः" इत्यस्य को वार्थः, कथं वात्र निपातस्योपनिपातः। "अल्पे" [५।३।८५] इति कविधायकं सूत्रं जागर्त्येव। अत एवात्र ' "अल्पे" [५।३।८५] **इत्युभयत्र** कः' इति मुद्रणीयम्।

(४) ८।२२।२-भाष्ये दृश्यते—"अनेहसं कैश्चिदप्यनुपद्रवं पापरहितं वा" इति। पुण्यपत्तनस्थपुस्तकस्य प्रास्ताविकतो विज्ञायते सर्वेष्वेव हस्तलिखितेषु मुद्रितेषु च पुस्तकेष्वयमेव पाठो विलसतीति।

अत्रेदमवधेयम्। पाठस्यास्य प्रामादिकत्वे संशयस्यावकाश एव नास्ति। कस्तावदत्र शुद्धः पाठ इति विचारे त्रयः पक्षाः प्रादुर्भवन्ति। (१) प्रथममण्डलगतसायणभाष्येऽनेहः-शब्दप्रतिशब्दतयाऽहिंस्याहिंसनीयेति कृत्यप्रत्ययान्तौ दृश्येते। अत एवात्र 'अनुपद्रव्याः' इति पठनीयम्। (२) अष्टम एव मण्डले सूक्तद्वितयात् पूर्वम् 'अहिंसितः' इति निष्ठान्तः प्रतिशब्द उपलभ्यते। निष्ठाप्यन्तरान्तरा कृत्यार्थे प्रयुज्यते, "संक्रीड़न्ते मणिभिरमरप्रार्थिता यत्र कन्याः" इत्यादिषु यथा। अत एवात्र "अनुपद्रुतम्" इत्येव पाठः समीचीनः। (३) भाष्ये बहुत्र 'उपद्रवरहिताः' इति 'अपापाः' इति च व्याख्यानमवलोक्यते। ८।४७।१ भाष्ये 'अपापान्यनुपद्रवाणि च' इति सन्दृश्यते। अत एव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाष्यकृद्भिरत्रापि 'अनपद्रवं पापरहितं वा' इति विलिखितं पश्चात् केनापि लिपिकरेण कैश्चिदिति पदं प्रक्षिप्तम्।

पक्षाणामेषां कतमस्तावच्छ्रेष्ठ इति विचारे द्वैतीयीक एवेति प्रतिभाति। अनुपद्रव्यशब्दस्तावत् सुविरलप्रयोग एव, अतो नात्रोपादेयः, कैश्चिदपीति च सर्वेष्वपि हस्तलिखितेषु पुस्तकेषूपलभ्यते, अतोऽनयोः संरक्षणसम्भवे परिहारो न समीचीनः। अत एवात्र 'कैश्चिदप्यनुपद्रुतं पापरहितं वा' इति पठनीयमिति प्रतिभाति।

पाणिनिसूत्राणां वैज्ञानिकी व्याख्या

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

आदेशविषये महर्षिणा पाणिनिना चत्वारि सूत्राणि प्रणीतानि, तानि च यथा अलोऽन्त्यस्य, ङिच्च, आदेः परस्य, अनेकाल्शित् सर्वस्य [१।१।५२-५५] इति। प्रायेण प्रकृतेरन्तिम एव वर्णो विकृतिमापद्यते इति सामान्यतोऽन्त्यवर्णस्यैव स्थाने आदेशो भवतीत्युत्सर्गः। ततश्च प्रथमोपस्थितस्य कवर्गस्यान्तिमो वर्णो ङकारोऽन्त्यादेशार्थमनुबन्धरूपेणोपात्तः। ततश्च परस्य यद्विहितं तद् यदपेक्षया परं तस्यैव सन्निकृष्टं यथा स्यात् तदर्थं तत्रादेरेवादेशो विहितः। ततश्च योऽनकाल् आदेशस्तेनानेकाल एव स्थाने भवितव्यम् इत्यतोऽनेकालादेशः सर्वस्यैव स्थाने विहितः। सर्वपर्यायस्य विश्वशब्दस्यैकदेशः शकारः, अत एव सर्वादेशार्थं शकार एवानुबन्धतया विनियुक्तः।

Acc. to Sanskrit grammarians a substitute is, as a rule, the substitute for the final of a stem etc. But when the substitute consists of more letters than one, then it is the substitute for the whole of the stem etc. The reason is that since it consists of more letters than one, it should be the

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

substitute for more letters than one, i.e. the whole (cf. स्थानेऽन्तरतमः) i.e. सर्वादेश. The letter श is utilised as an Anubandha for सर्वादेश because it is a a part of विश्व which is a synonym of सर्व. Similarly ङ is an Anubandha indicating अन्तादेश, because it stands at the end of the first varga.

प्रतिज्ञापूरणम्

[स्वर्गतस्य-प्रभातकुमार-मुखोपाध्यायस्य]

प्रथमः परिच्छेदः

कामं भवतोषो महापाठशालायामाङ्लभाषामधीते तथापि तत्र तस्य मनो न लगति, बलवत्याऽनिच्छया तेन तद्विधीयते। आङ्लविद्यायां तस्य लेशतोऽपि श्रद्धा नास्ति, आङ्लभाषाया एव निरन्तरानुशीलनन विनष्टप्रायोऽस्माकं देश इत्येव तस्याभिमतम्। अनुदिनमेव ह्रासमुपैत्यस्मद्देशे आर्यभावः, न खलु पुनरपि तेषां प्राचीनानां शुभदिनानां प्रत्यावर्त्तनोपायोऽवशिष्यते इति प्रायेण परिदेवयते भवतोषः। स्वजनबान्धवानां प्ररोचनयाऽनिच्छताऽपि तेनाऽऽङ्लभाषा पठ्यते, अन्यथा नवद्वीपं भट्टपल्लीं वा गत्वा कस्याञ्चिच्चतुष्पाठ्यामेव प्रवेशनीयमित्येव तस्य मनोरथः। यथा तथा वा भवतु आङ्लभाषामधीयानेनापि भवतोषेण यथा प्राचीनसमाचाराः संरक्षिताः प्राचीना च चिन्ताप्रणाली समनुसृता तथाऽद्यत्वे नैव दृष्टिपथमुपयाति।

भवतोषस्तावत् कलिकातायामट्टशूले समवस्थाय पाठानधीते स्म। क्रमेण च पूजावकाशः समागतः। भवतोषो गेहार्थमभिनववस्त्रादिकं क्रीत्वा मञ्जूषापेटकादीनि संबध्य गृहाय प्रस्थितः। तेषां ग्रामः कलिकातातो नातिदूरेऽवस्थितः।

विनिर्वृत्तं पूजानुष्ठानम्। समागता पौर्णमासी, तस्यां च तिथौ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महत्येव प्रत्यूषे भवतोषस्य जननी गङ्गास्नानाय गतवती। गङ्गातीर्थं च ग्रामात् किञ्चिद्दूरे आसीत्। तत्र च बहूनां पुरस्त्रीणां समागमः समजनि। यावन्निर्वर्तितस्नानविधिर्भवतोषजननी तीर्थमारोहति तावत् तस्या एव बाल्यसखी उपेन्द्रनाथवन्द्योपाध्यायस्य पत्नी तयाऽवलोकिता।

"अपि कुशलं तेऽन्तिके" इति सम्भाष्योपेन्द्रमहोदयस्य सहधर्मिणी भवतोषस्य मातुः समीपमागच्छत्। सख्योः कुशलानुयोगानन्तरमुपेन्द्र-महोदयस्य पत्न्या पृष्टम्—अपि गृहमागतो भवतोषः? इति।

आगतः। तस्यावकाशोऽप्यवसितप्रायः। पुनरपि कलिकातां गमिष्यति।

उपेन्द्रमहोदयस्य तावत् काचन रूपवती त्रयोदशवर्षीया दुहिता वर्त्तते पुलिना नाम। अद्यापि तस्या विवाहो न संवृत्तः। उपेन्द्र-महोदयस्य पत्न्योक्तम्, पुलिनया साकं तव भवतोषस्य विवाह-श्चच्छोभनं स्यात्। इति।

भवतोषस्य जनन्यवदत्, ममापि स एव चिरान्मनोरथः। परं पुत्रो मे नेच्छति परिणेतुम्। किं वा मया क्रियताम्, कति वा सम्बन्धा न प्रत्याख्याताः। इति।

भवतु, पुनरप्युक्त्वा दृश्यतां तेन किं प्रतिपद्येत। स एव ते ज्येष्ठः पुत्रः। वधूर्गृहे समागमिष्यति। कियती वा ते प्रीतिर्न स्यात्। कथं वा नोद्वहति?

भवतोषस्य माताऽवदत्, भवतु वक्ष्यामि। पुत्रस्य सम्मतिश्चेद् वर्त्तमानेऽग्रहायणमासेऽपि विवाहः सम्भवति। इति।

यदा माता गृहं प्रत्यायाता तदा भवतोषो बहिष्प्रकोष्ठे समुपविश्य "वङ्गवासि"पत्रस्योपहाररूपेणाधिगतं पराशरसंहिताया वङ्गभाषामय-मनुवादमेकाग्रेण मनसाऽधीयन्नासीत्। सविधमुपसृप्य मात्रोक्तम्, वत्स, प्रविशाभ्यन्तरम्। अस्ति कश्चिद्वाग्विशेष इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकं परित्यज्य भवतोषः शनैः शनैर्मातरमन्वसरत्।

स्वकक्षमुपनीय माता पुत्रमवदत्, वत्स, इदानीमनुष्ठीयतां विवाहः। त्वमेव मे ज्यष्ठः पुत्रः। चिरादेव वधूमुखसन्दर्शनवाञ्छया कृतं मे हृदि पदम्। त्वं तावत् पूरय मे तदीप्सितम्।

इतः पूर्वं भवतोषस्य विद्वेष एवाऽऽसीद्विवाहे इत्युक्तमेव। पाठमपरिसमाप्य न परिणयम्, यावद्वित्तोपार्जनक्षमता नाऽऽसाद्यते तावन्न परिणेयम् एवंविधा वैदेशिक्यो विप्रतिपत्तयः कदाऽपि नाविन्दन्तोदयं भवतोषस्य मानसे, श्रुतं खलु तेन (वाचितञ्च वृत्तान्तपत्रिकासु) अद्यत्वे किल नव्यस्त्रियः परमार्थतो गृहलक्ष्मीरूपेण नैव प्रादुर्भवन्तीति। ताः खल्वतिमात्रं सुखपरायणा विलासिन्यश्च सञ्जाताः। न खलु ताः शास्त्रविधिना पत्यौ भक्तिश्रद्धादिकं प्रदर्शयन्ति, प्रत्युत पतिं सखीयितुमेवेहन्ते। इतरेऽप्युच्चावचाः स्त्रीजनगता दोषास्तेन समाकर्णिताः।

तथाऽपि विधवाया मातुर्निबन्धः—किं वा क्रियतां तपस्विनाऽनेन ? मात्रादेशलङ्घनजनितं पातकमपि नार्जयितुमिच्छत्यसौ। अत एव कियद्भ्यश्चिद्दिवसेभ्यः पूर्वं तेन निर्धारितम्—पुनरपि मात्राऽनुरुध्यते चेत् तदात्व एवोद्वहेयमिति। परं स्वादर्शानुसारिणीमेव कन्यकामुद्वहेदसौ।

अत्र च विषये भवतोषस्य केचन स्वतन्त्रा मतविशेषा आसन्, ते च तदट्टशूलस्थानां सर्वेषामेव सतीर्थ्यानां सुविदिता एव। यदा तावद्रात्रौ भोजनत ऊर्ध्वं भवनवलभ्यां छात्त्राणां दण्डायमानानां गोष्ठी समवैति स्म, यदा बहूनामेव धूमपानवर्त्तिकानामग्राणि युगपदेव प्रदीप्यन्ते स्म, तदानीमसकृद् विषयोऽयमालोच्यते स्म, एवञ्च वादनिरतेन भवतोषेणासकृदेवोक्तम्, यदि कदाचित् परिणयेय—यदि परिणयेय तर्हि कृष्णवर्णां कुरूपामेव कन्यकां परिणयेय। रूपवत्यो हि कन्यकाः प्रायेण दृप्ता एव भवन्ति। न खलु तासां श्वश्रूश्वशुरयोर्भक्तिर्न वा पत्यौ दैवत-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बुद्धिः। न खलु ताः कदापि सहधर्मिण्यो भवन्ति प्रत्युत सहविलासिन्य एव सञ्जायन्ते। किञ्च ता अतीवाहार्यशोभाप्रिया भवन्ति। रूप-लेशो वर्त्तत इति तद् रूपं सम्यक्तया विभूषयितुमतीवोत्कण्ठन्ते। फनकान्यपेक्षन्ते,सुरभितैलान्यपेक्ष्यन्ते, विलासचूर्णान्यपेक्ष्यन्ते, सुरम्याणि शाटकान्यपेक्ष्यन्ते, वरकञ्चुकान्यपेक्ष्यन्ते—तपस्विनः पत्युः प्राणाः कण्ठगता एव सम्पद्यन्ते। अपरञ्च, विदुषीमपि बालां नैवाहं परिणेष्ये। विदुष्यो हि अहर्निशमाख्यानानि पठन्ति (काश्चन पुन-राख्यानानि विरचयन्ति) संक्रीडन्ते च क्रीडापत्रैः। पत्यै पद्यमय-पत्रसंप्रेषणेनैव दिनमतिवहति, गृहकार्य्याणि नैव सम्पद्यन्ते, व्रतनियमा-दीनां त्ववसर एव नास्ति, पुत्रश्च भूमौ निपतितो रोदिति इत्यादि।

इत्थमोजस्विनीं वाचोयुक्तिं समाकर्ण्य छात्रेषु च कैश्चिदुच्यते स्म, भवतु भवतु भवतोषमहोदय, कार्यकाले किं करिष्यति भवांस्तद् द्रष्टव्यम्। एवमुच्यते तु बहुभिः। वचनकर्मणोस्तावद् महदन्तरम्। इति।

संशयख्यापनेन चानेनानलकल्पतामुपगतो भवतोषो ब्रूते स्म, "भवतु, द्रक्ष्यन्ति भवन्तः, अवश्यमेव द्रक्ष्यन्ति। मया यदेवोच्यते तदेव क्रियते" इति।

मात्रा मुहुर्निर्बध्यमानो भवतोषोऽन्ततः प्रकटयामास सम्मतिं विवाहे। उवाच च, "भवतु मातः, विवाहं करिष्ये, परं स्वयमेव कन्यकां संप्रेक्ष्योद्वाहयिष्ये।"

तच्छ्रुत्वा माता हर्षस्य परां काष्ठामधिरूढाऽवदत्, त्वं तावत् स्वयं परीक्ष्योद्वोढुमिच्छसि ? सम्यक्। कान्ततरा काचन वर्त्तते कन्यका त्रयोदशवर्षीया।

एतदाकर्ण्य चकितेन भवतोषेणोक्तम्, परमरमणीया किल ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पंचदस फ्रचरोइथे	पञ्चदश प्रचरेते
पित-पुथ्रस्-च रओधएष्व (कतरस्-चित्)	पिता पुत्रश्च* रोहेषु आ (कतरश्चित्)
यवत-क्षयोइत् ह्वाँथ्भो	यावत् [अ] क्षयेत् सुवन्ता
यिमो वीवङ्हतो पुथ्रो ॥	यमो विवस्वतः पुत्रः ॥

During the rule (xṣa9re) of the illustrious (*aurvahe*) Yima (*Yimahe*) [there] was (*āoṅha*) neither (*noit*) (excessive) cold (*aotəm*) nor (noit) [excessive] heat (*garəməm*), neither (*noit*) was (*āoṅha*) [there] old-age (*Zaurva*) nor (*noit*) death (*mərəθyus*), nor (*noit*) [was there] envy (*arasko*) created of-the-Daeva (*daevo-dāto*). Father and son (*pitā-puθras-ca*) moved about (*fracaroiθe*) each (*katarascit*) [seeming only] fifteen (*pancadasa*) in appearance (*raodhaeṣva*) as long as (*yavata*) Yima (*Yimo*) the magnificent (*hwāθwo*), the son (*putro*) of Vivaṅhvat (*Vivaṅuhato*) reigned (*xṣayoit*).

यिमहे—यमस्य । मकारनकारयोः पूर्वोऽकार ए भावमापद्यते । तालव्यात् परोऽसौ प्रायेणेकारो भवति । अत एव संस्कृत-यमशब्द आवेस्तायां यिमः सञ्जातः । एवं सं यम् = आवे यिम्; सं वाचम्, आवे वाचिम् । अनेकाक्षरस्य शब्दस्यान्तिमो यकार आवेस्तायामेकारो भवति । गाथायां पुनर्या इति भवति । सकारश्च प्रायेणावेस्तायां हकाररूपं परिगृह्णाति । अत एव षष्ठ्येकवचनीयः सकारो हे भवत्यावेस्तायाम् ! यमस्य = यिमहे । पुत्रस्य = पुथ्रहे । (क्रमशः)

पुस्तक-परिचयः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

संस्कृत-व्याकरण-शास्त्रका इतिहास (संस्कृत-व्याकरणशास्त्रस्येतिवृत्तम्) श्रीयुधिष्ठिरमीमांसकेन विरचितम् । प्राप्तिस्थानम्—भारतीयसाहित्यभवनम्, नवावगञ्ज-लाइब्रेरी रोड्, देहली । पृ: ४५७ । मूल्यं रूप्यकदशकम् ।

अहो ! परममिदं हर्षस्थानं भारतीयानामस्माकं यत् तेषां तेषां तन्त्राणामितिवृत्तविषय विहाय पाश्चात्यविपश्चित्स्वेकान्ततो निर्भरं स्वयमेवास्मद्देशीयैः प्रयस्यते प्रकाश्यते च सुसमीचीनं पुस्तकजातम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रायण वत्सरदशकात् पूर्वं पारावार इव पाण्डित्यस्य विहार-भवनमिव वैदग्ध्यस्य प्रकाशितं सर्वतन्त्रस्वतन्त्रधिषणेन श्रीमता गुरुपदहालदारमहोदयेन "व्याकरणदर्शनेर इतिहास"-समाख्यं वङ्गभाषामयमतिवृहत् पुस्तकम् । इदानीं पण्डितप्रकाण्डेन युधिष्ठिर-मीमांसकमहोदयेन "संस्कृतव्याकरणशास्त्रका इतिहास"-शीर्षकं नाति-वृहद्धिन्दीभाषामयं पुस्तकं संग्रथितम् । उभयमपि पुस्तकं संस्कृत-बहुलया भाषयोपनिबद्धमिति तत्तद्देशीयभाषानभिज्ञैरपि विनैवायासं बोद्धं सुशकम् । अस्मिंश्च संस्कृतव्याकरणशास्त्रस्येतिवृत्तसमाह्वे परमोपादेये प्रबन्धे युधिष्ठिरमीमांसकमहोदयेन संस्कृतभाषायाः प्रवृत्तिर्विकासो ह्रासश्च, व्याकरणशास्त्रस्योत्पत्तिः प्राचीनत्वञ्च, पाणिनीयाष्टकेऽनु-ल्लिखितास्त्रयोदश प्राचीनाचार्याः, पाणिनिस्तस्य शब्दानुशासनञ्च, आचार्यपाणिनिकालिकं संस्कृतवाङ्मयम्, संग्रहकारो व्याडिः, अष्टाध्याय्या वार्त्तिककाराः, वार्त्तिककारश्च भाष्यकारश्च, महाभाष्य-प्रदीपस्य पञ्चदश व्याख्यातारः, पतञ्जलिः, महाभाष्यस्य विंशतिष्टीकाः, महाभाष्यप्रदीपस्य पञ्चदश व्याख्यातारः, अनुपदकारश्च पदशेषकारश्च, अष्टाध्याय्या एकचत्वारिंशद्वृत्तिकृतः, काशिकाया अष्ट व्याख्यातारः, पाणिनीयव्याकरणप्रक्रियाविरचयितारः, पाणिनितोऽर्वाचीनाः पञ्चदश वैयाकरणाः इति सप्तदशस्वध्यायेषु सरलया सुबोधया च हिन्दीभाषया संस्कृतव्याकरणशास्त्रगतानि सुबहूनि तथ्यानि सन्निविष्टानि । यद्यपि सर्वत्रास्माकं ग्रन्थकृता साकमैकमत्यं नास्ति तथापि ग्रन्थस्य गरीयस्त्वेऽ-तीवोपादेयत्वे समीचीनत्वे समादरणीयत्वे च लेशतोऽपि संशयो नास्ति । अवश्यं संग्राह्यमिदं ग्रन्थरत्नं संस्कृतभाषानुरागिभिः ।

जाम्बवतीविजयकारस्य पाणिनेरष्टाध्यायीकारपाणिनितो विभिन्नत्वं प्रतिपादितमेवास्माभिः Calcutta Oriental Journal-पत्रस्य प्रथम-संख्यायाम् । महाभाष्यकृतः पतञ्जलेर्योगसूत्रकारतोऽन्यत्वं च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थापितमस्माभिर्मञ्जूषायामेव। आपिशलिपदशेषकारानुपदकारादीनां मतान्तराण्यप्युपलभ्यन्ते, वारान्तरे तानि विचारयिष्यामः। अद्य केवलमनुपदकारस्य कतिचिन्मतानि प्रदर्श्य विरमामः।

संक्षिप्तसारव्याकरणे सन्धिपादे सूत्रम्—शषसे वर्गाद्यात्तद्द्वितीय इत्यनुपदकार इति। महाभाष्यगतात् तु वार्त्तिकात् मतमिदं पौष्करसादेरित्यवगम्यते। तथाहि "नादिन्याक्रोशे पुत्रस्य" [८।४।४८] इति सूत्रे तृतीयं वार्त्तिकम् "चयो द्वितीयाः शरि पौष्करसादेः" इति।

तस्यैव व्याकरणस्य कृदन्तपादीय—"लङ्लृङत् कृच्छतृशानौ" इति सूत्रस्य वृत्तौ दृश्यते—पवमानोऽवर्तमानकाले, यजमानोऽवर्तमानकालेऽकर्त्रर्थे क्रियाफलेऽपीत्यनुपदकार इति।

तस्यैव व्याकरणस्य सुबन्तपादीयस्य "द्वितीयाटौसन्तस्य समासे" इति सूत्रस्य गोयीचन्द्रव्याख्यायां दृश्यते "एनमतिक्रान्तमत्येनदिति केचित्। अन्ये वदन्ति समास इति समासावयवे समासशब्दः, समासावयवे परे भवति। अमो लुप्तस्य लुप्तवत्त्वात् पूर्वसूत्रेण एनदादेश कृते अत्येनदिति भवितव्यमिति चन्द्रवर्धमानमिश्रौ। जयादित्यादीनान्तु व्यवस्थया यद्यप्येनच्छ्रित इति लक्ष्यते अत्येनदिति च, तथापि न तदिहेष्टं भाष्यानुपदकारादीनां मतेन विरोधात्। इति।

तस्यैव व्याकरणस्य समासपादे "जरत्पलितखलतिवलिनैर्यूनः" इति सूत्रस्य गोयीचन्द्रव्याख्याने दृश्यते—"युवा खलती"ति सूत्र [पा० २।१।६७] युवजरन्निति भाष्ये नोदाहृतम्। अनुपदकारेण पुनरेतन्निश्चितमेव, एतत् कातन्त्रटीकायामप्युक्तम् इति। मुद्रितायां कातन्त्रटीकायां तु दृश्यते—"परस्त्वाह। जरतीशब्देन समासवचनात् कथं युवजरन्निति। भाष्ये चानुदाहृतत्वात् सन्देह इति। पदकारेण पुनरेतन्निश्चितमेव" इति। भाषावृत्त्यर्थविवृतौ सृष्टिधरेणोक्तम् "युवजरन्निति च तन्त्रान्तरे। तदर्थमस्माभिः शाकपार्थिवादिपाठः स्वीकार्यः—युवरूपो जरन् तथेति" इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपलेखसूत्रम्

अकारादयो द्वादश स्वराः ॥१।१

अ आ इ ई उ ऊ ऋ ॠ ए ऐ ओ औ ।

शिष्टं व्यञ्जनम् ॥१।२।

ककारादयः पञ्चपञ्च वर्गाः स्पर्शाः ॥१।३

यकारादयश्चतस्रोऽन्तस्थाः ॥१।४

शकारादयोऽष्टावूष्माणः ॥१।५ ।

According to Indian tradition, Pāṇini received the S'ivasūtras, if not the whole of the Aṣṭādhyāyī, from S'iva. Thus we find in the Kathāsaritsāgara :

अथ कालेन वर्षस्य शिष्यवर्गो महानभूत् ।
तत्रैकः पाणिनिर्नाम जडबुद्धितरोऽभवत् ॥
स शुश्रूषापरिक्लिष्टः प्रेषितो दासभार्यया ।
अगच्छत्तपसे खिन्नो विद्याकामो हिमालयम् ॥
तत्र तीव्रेण तपसा तोषितादिन्दुशेखरात् ।
सर्वविद्यामुखं तेन प्राप्तं व्याकरणं नवम् ॥

Similarly we read in the Bṛhat-kathāmañjarī :

पाणिनिर्नाम वर्षस्य शिष्यः पूर्वं जडाशयः ।
तपसा शङ्करात् प्राप्य नवं व्याकरणं वशी ॥
दिनान्यष्टौ विवादे मे प्रतिवादी च मेऽभवत् ।
मया जिते ततस्तस्मिन् हुङ्कारेण विमोहयन् ।
जहार नो हरः कोपादैन्द्रं व्याकरणस्मृतिम् ।१॥७१-७३

Similarly we find in the Haracaritacintāmaṇi :

अथ कालेन महता शिष्या वर्षमुपाययुः ।
एकोऽपि पाणिनिर्नाम जड़बुद्धिरुपाययौ ॥
शिष्यान्तरोपहासेन सावमानः स पाणिनिः ॥
शुश्रूषाक्लेशतो यातः कदाचित्तु हिमाचलम् ॥
आराध्य तपसा तत्र विद्याकामः स शङ्करम् ।
प्राप व्याकरणं दिव्यं स च विद्यामुखं शुभम् ॥७७।७२-७४

2

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Similarly we find in the Bhaviṣya Purāṇa :

सामनस्य सुतः शिष्यः पाणिनिर्नाम विश्रुतः ।
काणभूतिप्रशिष्यैश्च शास्त्रज्ञैः स पराजितः ॥
लज्जितः पाणिनिस्तत्र गतस्तीर्थान्तरं प्रति ।
स्नात्वा सर्वाणि तीर्थानि सन्तर्प्य पितृदेवताः ॥
केदारमुदकं पीत्वा शिवध्यानपरोऽभवत् ।
पर्णाशी सप्त दिवसाञ्जलभक्षस्ततोऽभवत् ॥
ततो दशदिनान्ते स वायुभक्षो दशाहनि ।
अष्टाविंशे दिने रुद्रो वरं ब्रूहि वचोऽब्रवीत् ॥
श्रुत्वामृतमयं वाक्यमस्तौद् गद्गदया गिरा ।
सर्वेशं सर्वलिङ्गेशं गिरिजावल्लभं हरम् ॥
नमो रुद्राय महते सर्वेशाय हितैषिणे ।
नन्दिसंस्थाय देवाय विद्याभयकराय च ॥
पापान्तकाय भर्गाय नमोऽनन्ताय वेधसे ।
नमो मायाहरेशाय नमस्ते लोकशङ्कर ।
यदि प्रसन्नो देवेश विद्यामूलप्रदो भव ॥
इति श्रुत्वा महादेवः सूत्राणि प्रददौ मुदा ।
सर्ववर्णमयान्येवा इ उणादिशुभानि वै ॥

* * *

इत्युक्त्वान्तर्दधे रुद्रः पाणिनिः स्वगृहं ययौ ।
सूत्रपाठं धातुपाठं गणपाठं तथैव च ।
लिङ्गसूत्रं तथा कृत्वा परं निर्वाणमाप्तवान् ॥

in the Pāṇinīya S'ikṣā we find :

शङ्करः शाङ्करीं प्रादाद् दाक्षीपुत्राय धीमते ।
वाङ्मयेभ्यः समाहृत्य देवीं वाचमिति स्थितिः ॥
येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥ २१-२२

'Having gathered the divine speech from the whole range of literature, S'aṅkara gave the S'āṅkarī Vidyā to the

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

wise son of Dākṣī. Salutation to Pāṇini who, having received the traditional alphabet from Mahes'vara, expounded the whole science of grammar.'

In the Nandikes'vara-kās'ikā we find :

नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारान् ।
उद्धर्तुकामः सनकादिसिद्धानेतद् विमर्शे शिवसूत्रजालम् ॥
इह सर्वत्र सूत्रेषु अन्त्यवर्णचतुर्दशम् ।
धात्वर्थं समुपादिष्टं पाणिन्यादीष्टसिद्धये ॥

One feels tempted to read it thus :

...इह सर्वत्र सूत्रेषु अन्त्यवर्णचतुर्दश ।
लब्ध्वर्थं समुपादिष्टाः पाणिन्यादीष्टसिद्धये ॥

'At the end of his (Tāṇḍava) dance, the king of the princes of dancers beat his drum fourteen times with a view to emancipating Sanaka and other Siddhas—this I deem to be the network of S'iva-sūtras. In all these rules, the fourteen final letters have been inserted to denote roots or finite verbs for the fruition of the desires of Pāṇini and others.'

It will be noticed that even the author of the Nandikes'vara-kās'ikā is forced to admit that this is his personal view ("etad vimars'e"—I deem this or this turns out to be the case on reflection).

As regards the real author of the S'iva-sūtras, we are absolutely in the dark. The sūtras have existed from time immemorial and have been modified according to the needs of different periods and different systems of grammar. As they are regarded as अक्षरसमाम्नाय or वर्णसमाम्नाय, *i. e.*, the traditional alphabet, nobody looked for their author, as nobody looked for the author of the ordinary traditional alphabet or of the other samāmnāya that has come down to us viz. the Nighaṇṭus. As all knowledge proceeds from S'iva, He was regarded as the ultimate author of these

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

sūtras*. The mention of the expression S'iva-sūtra would appear to be however of a fairly late date. It does not occur in the Mahābhāṣya, Kās'ikā, Kās'ikāvivaraṇapañjikā or Pradīpa. Because S'iva was regarded as the author of the sūtras, the scholar who wrote the commentary called himself Nandin and we get the Nandikes'vara Kās'ikā which must have been written long after Jayāditya and Vāmana's Kās'ikā.

It does not appear from the Vārttikas or the Mahābhāṣya that the author of these sūtras was S'iva. In the first place the Vārttikakāra repudiates the letter ḷ. Would he have done so, if he were aware that the sūtras had come from S'iva ? Patañjali, after explaining the Vārttikas in favour of expunging ḷ from the S'iva sūtras remarks : स एष सूत्रभेदेन ऌकारः प्लुत्याद्यर्थः सन् प्रत्याख्यायते, सैषा महतो वंशस्तम्बाल्लट्वानुकृष्यते. This ḷ which was inserted for Pluti etc. is rejected by changing a rule. This is dragging out a bird from a dense bamboo-grove (*i.e.,* securing a steam-hammer to crack a nut or getting out a needle from a stack of hay). Patañjali does not say anything here about the sūtra having emanated from S'iva.

Again, under लण् we find in the Mahābhāṣya :

किं पुनर्वर्णोत्सत्ताविवायं णकारो द्विरनुबध्यते ? एतज् ज्ञापयत्याचार्यो भवत्येषा परिभाषा—व्याख्यानतो विशेषप्रतिपत्ति र्न हि सन्देहादलक्षणम् इति ।

'How is it that this ण is used twice as an Anubandha, as if all the (other) letters had perished ? (By this) the

---

* ईशानः सर्वविद्यानामीश्वरः सर्वभूतानाम् ।
ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिरो मे अस्तु सदाशिवोम् ॥
तैत्तिरीयारण्यकम् १०।४७

आरोग्यं भास्करादिच्छेद्धनमिच्छेद्धुताशनात् ।
ज्ञानञ्च शङ्करादिच्छेन्मोक्षमिच्छेज्जनार्दनात् ॥ मत्स्यपुराणम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Ācārya implies that there is the Paribhāṣā that the particular sense (in which a word or expression has been used) has to be gathered from commentaries and a rule should not be rejected merely on the ground that there is some doubt regarding its true import.'

Here the Bhāṣyakāra evidently refers to Pāṇini by the word Ācārya as he has done in many other cases in this Pratyāhārāhnika, or for the matter of that in the Mahābhāṣya. Since Pāṇini accepts the S'ivasūtras and probably introduces some slight changes in them he may be regarded as their author for the purposes of commentators.

Hiuen Thsang, however, mentions that grammar was revealed to Paṇini by Is'varadeva.

In the Candravṛtti, Kās'ikā and Hṛdayahāriṇī we find: अ इ उ इत्यनेन क्रमेण वर्णानुपदिश्यान्ते णकारमितं करोति प्रत्याहारार्थम् । The nom. is not expressly stated, but it is obvioulv ācārya or sūtrakāra. The Candravṛtti states definitely that the Pratyāhāras are found in earlier treatises also. Similarly Hṛdayahāriṇī, the commentary on Bhoja's Sarasvatī-Kaṇṭhābhāraṇa says: पूर्वसिद्धमेव सानुबन्धं वर्णसमुदायाम्नायमादावुपदिशति । The Padamañjarī refers to the Sūtrakāra under ए ओ ङ् thus: सूत्रकार ङकारमुपदिदेश. Here by Sūtrakāra is meant the author of the S'iva sūtras who is presumably identical with the author of the other sūtras of the Aṣṭādhyāyī. Devanandin refers to these as Pratyāhāras. It would appear from commentaries that S'ākaṭāyana refers to them as Varṇasamāmnāya. The Hṛdayahāriṇī on the Sarasvatī-Kaṇṭhābharaṇa also speaks of Varṇasamāmnāya: प्रतिज्ञातार्थसिद्धये पूर्वसिद्धमेव सानुबन्धं वर्णसमाम्नायमादावुपदिशति. The Bhāṣāvṛtti speaks of these as Pratyāhāra says sūtras following in the footsteps of Jinendrabuddhi. Sṛṣṭidhara says in his Bhāṣāvṛttyarthavivṛti:

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥

इति कात्यायनवाक्येन सूत्राणामेषां श्रीमहेश्वरमुखनिःसृतत्वेन वैदिकतया वा सकलं साधुतममेवाभिधत्ते ।

The Rūpāvatāra, Prakriyā-Kaumudī and Prakriyāsarvasva also speak of these as Pratyāhāra-sūtras. Viṭṭhala says in his commentary on the Prakriyākāumudī : अ इ उ ण्—एतानि चतुर्दशाक्षरसमाम्नायसूत्राणि महेश्वरेण शास्त्रस्य लक्ष्ये प्रवृत्तये पाणिनये उपदिष्टानि । तथाचोक्तम्—येनाक्षरसमाम्नायमित्यादि ।

Bhaṭṭoji in his Siddhāntakaumudī describes these sūtras as माहेश्वराणि सूत्राणि.

Among later commentators Nāges'a is never tired of referring to these rules as emanating from S'iva or as Veda. Thus under आद्योपुरुषिकामात्रं तु in the Pratyāhārāhnika he says: अकर्तृके आज्ञापादनाभावात्. Rājalakṣmī explains it thus : अकर्तृके अपौरुषेये । अ इ ण् इत्यादौ वेदे (p. 83).

Under वृत्तिसमवायार्थो वर्णानामुपदेशः Nāges'a says :

वृत्तिः शास्त्रप्रवृत्तिः, तदुपयोगी समवायः वर्णगतः क्रमविशेषः, स बोध्यत्वेन अर्थः प्रयोजनं यस्य सः तथोक्तः । सति ह्यक्षरसमाम्नायेऽजादिसंज्ञाभिर्लाघवेन शास्त्रप्रवृत्तिः, इग्यणः [१।१।४५] इत्यादौ यथासंख्यप्रवृत्तिश्च इति भावः, अनेनास्य शास्त्रबहिर्भूतत्वं सूचितम् । अत एव मङ्गलार्थं महतः शास्त्रौघस्यादितो वृद्धिशब्दं पठतीति वक्ष्यति । अन्यकर्तृकत्वं च सूचितम्, पाणिनिशास्त्रप्रवृत्त्यर्थ उपदेशः इत्युक्ते उपदेशे गुरुकर्तृकतायाः स्वरसतः प्रतीतेः । सिद्धोच्चारणेऽपि मन्त्रोपदेश इत्यादावुपदेशव्यवहारात् । अनुबन्धकरणार्थः [१।१।३।१६] इत्यत्र करणपदेनेतरस्य सिद्धत्वसूचनात् । तत्करणं चोपदेशकर्तृकर्तृकमेव प्रत्यासत्तेरित्याहुः ।

On this the Rājalakṣmī says : परे तूपदेश इत्यस्योच्चारणमात्रार्थकताया भाष्य एव स्पष्टमुक्तेरिदं चिन्त्यम् । मन्त्रोपदेश इत्यप्ययुक्तम् । न हि स्वगुरूपदिष्टो मन्त्रः केनापि बहिः प्रकाश्यते । एवञ्च भगवता पाणिनिनैवेमानि सूत्राण्युच्चारितानीत्याहुः । युक्तञ्चैतत् । अत एव भाष्यकृता "अनुबन्धान् आसङ्क्ष्यामि" इत्यनुपदमेव वक्ष्यते ।

Under अथ किमर्थो वर्णानामुपदेशः Nāges'a says : ननु लोकप्रसिद्ध-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मातृकापाठेनैव वर्णज्ञानसम्भवान्माहेश्वरो वर्णसमाम्नायः किमर्थं इति पृच्छति—किमर्थो वर्णानामुपदेश इति। पाणिनये महादेवकृत इत्यर्थः। The commentary Rājalakṣmī remarks :—एतेन वर्णोपदेशोऽयं पाणिनिकृत एवेति स्पष्टं लभ्यते। पाणिनये महादेवकृत इति नागेशभट्टोक्तिस्तु स्ववासनयैव, न प्रमाणानुगृहीतेति गौडाः।

Nāges'a quotes the view of Bhartṛhari thus : "सोऽयमक्षरसमाम्नायः पुष्पितः फलितश्चन्द्रतारकवत् प्रतिमण्डितो ब्रह्मराशिः" इति भाष्यप्रतीकमुपादायोक्तं भर्तृहरिणा—यथैवेदमव्युच्छिन्नं चन्द्रतारकादि, एवमस्याक्षरसमाम्नायस्य न कश्चिदाधुनिकः कर्तास्ति, एवमेव वेदपारम्पर्येण स्मर्यमाण इति।

Then there is the ancient tradition current particularly in Bengal that S'iva is the author of a comprehensive treatise on grammar matched with which Pāṇini's Aṣṭādhyāyī is like a goṣpada to the ocean. Thus Gopāla-cakravartin in his commentary on the Durgāsaptas'atī quotes from Bharata :

पदज्ञैर्नातिनिर्बन्धः कर्तव्यो मुनिभाषिते।
अनुस्मरणतात्पर्यान्नाद्रियन्ते हि लक्षणम्॥
यान्युज्जहार माहेशाद् व्यासो व्याकरणार्णवात्।
तानि किं पदरत्नानि सन्ति पाणिनिगोष्पदे॥
न दृष्टमिति वैयासे शब्दे मा संशयं कृथाः।
अज्ञैरज्ञातमित्येव रत्नं न हि न विद्यते॥

'People versed in word-lore should not be too fastidious in the matter of the words of sages who, bent as they are on recording by remembrance, do not set much store by the rules of grammar. Are those gems of words which Vyāsa extracted from the ocean of grammar to be found in the small puddle of Pāṇini?'

In Devabodhas' commentary on the Mahābhārata माहेन्द्रात् occurs for माहेशात् in the second stanza, but in our part the reading is माहेशात्.

In Bengal whenever a person uses an incorrect expression and is called to account for it, he generally justifies it by saying that it is to be found in the Māhes'a Vyākaraṇa.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Māhes'a Vyākaraṇa is also referred to by Rāmatarkavāgīs'a in his commentary on the Mugdhabodha (Rule 425) in the following passage :

ननु सर्वेषां व्याकरणानां माहेशमूलकत्वेनाधुनिककुर्वृष्यन्धकवृष्णिवंश-वाचकानां कथं शिवादौ पाठ इति चेत्, सत्यं, शिवस्य सर्वज्ञत्वात् तत्र तेषां संकलनम् ।

'Since all grammars are based on Māhes'a, how is it that words denoting recent families like Kuru, Ṛṣi, Andhaka and Vṛṣṇi are read in the S'ivādi group ? True, since S'iva is omniscient the words have been put in there.'

Haradatta says in his Padamañjarī (p. 7) : कथं पुनरस्मदादीनां सर्वलक्ष्यदर्शित्वम् ? मा भूदस्मदादीनामस्मद्विशिष्टानां महर्षीणां सम्भवति, यस्य वा ईश्वरानुग्रहः स सर्वं प्रत्यक्षयति । अत्रैव हि लौकिकाः स्मरन्ति—

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ।

इति । अक्षरसमाम्नायं च व्याचक्षते देवसूत्राणीति ।

'How ever can people like us perceive all the words ? It may not be possible with us, but it is possible with great sages who stand on a higher level. And the person who has the grace of God can perceive everything. Hence people have got the tradition : "Salutation to him who having obtained the traditional collection of letters from Mahes'vara spoke the whole of grammar". And they explain the traditional collection of letters as the rules af God.'

The Gūḍhaprakās'ikā on the Prayogaratnamālā regards the ordinary alphabet as having emanated from Mahes'vara. Thus while commenting on the text : अकारादिक्षकारान्ता वर्णमालानुवर्तते । स्वरादिसंज्ञाविधानार्थम् ।.. अत्र संज्ञाविधानानुपयुक्तोऽपि क्षकारः पाणिनीयवर्णक्रमव्यवच्छेदार्थः says : पाणिनीयवर्णक्रमो ह्यकरादिह-कारान्तः, अस्माभिरपि तादृशे कृते पाणिन्यनुसारेणेदं व्याकरणमिति भ्रमः संशयो वा स्यादिति तन्निरासार्थमेव क्षकारपाठ इत्यर्थः । कृते च क्षकारपाठे पाणिनीयवर्णक्रमे क्षकाराभावात् सुप्रसिद्धमहेश्वरवर्णमालालाभः, तेन तदनु-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सारेणैवेदं व्याकरणमिति फलितार्थः। कालापैः सिद्धपदोपादानात् कल्पितस्य पाणिनीयवर्णक्रमस्य व्युदासः कृतः, अस्माभिस्तु क्षकारपाठेनेति शेषः।

'Pāṇini's order of letters begins with अ and ends with ह, should we too have the same order, it will lead one to the mistake or doubt that this grammar follows in the footsteps of Pāṇini. Hence क्ष has been read to dispel that delusion or doubt. When क्ष has been read, since there is no क्ष in the alphabet as enunciated by Pāṇini, we get the well-known alphabet emanating from Mahes'vara ; as a consequence of this we get the idea that this grammar is in accordance with Mahes'vara's work. The followers of the Kalāpa have indicated their rejection of the Paninean order of letters by the use of the word "siddha" [in the very first rule—सिद्धो वर्णसमाम्नायः]. We are doing the same thing by including क्ष in the list of letters'.

Abhirāma Vidyālaṅkāra also mentions the Mahes'vara Vyākaraṇa at the beginning of his Tippaṇī on the Saṁkṣipta-sāra Vyākaraṇa. Thus while commenting on the third Maṅgalācaraṇa stanza of Goyīcandra, Abhirāma says : ननु माहेश्वरादिव्याकरणापेक्षया पाणिनिव्याकरणमेव मतम्, न तु ततोऽप्यत्यल्पमेतदिति. 'It may be objected that Pāṇini's grammar alone is to be esteemed in preference to the grammars of Mahes'vara and others, not this one which is much shorter than even that.'

Similarly we find in the Introductory section of the Supadma Makaranda :

अथ किं व्याकरणपूर्वकः शब्दः, आहोस्विच्छब्दपूर्वकं व्याकरणम् ? न तावदाद्यः, शब्दैर्व्याकरणसिद्धिः तेन शब्दा उत्पाद्यन्ते इत्यन्योन्याश्रयात्; नापि द्वितीयः, सिद्धानां निष्पादनाय व्याकरणानुसरणमनुपादेयं स्यात्, पिष्टपेषणवैफल्यात्। नैवम्, अनित्यानां तेषामनादित्वाद् बीजाङ्कुरादिवन्नान्योन्याश्रयः प्रसक्तः। अथ बीजादेरीश्वरादिः कर्तेति चेत्, अत्रापि को नामान्यमाह ? द्वितीये तु नित्यानामपि तेषां युगमन्वन्तरादिषु सङ्केतोच्छेदेऽर्थे नियोगानुपपत्तेः। अत एवोद्घोषः महेश्वरादि व्याकरणमिति।

'Now, do words precede grammar or does grammar

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

precede words ? The first view is not tenable, because it involves the vicious circle—grammar is composed of words and words are made by grammar. Nor is the second view tenable. It would be unnecessary to resort to running to grammar with a view to the making of what is already ready-made. This is not so, words which are eternal are without beginning and so there is no vicious circle exactly as there is no vicious circle in the case of the seed and the sprout. Should you say that in the case of seed etc. God is the creator, our reply would be, who speaks of any other creator in the present case also ? In the case of the second alternative even though words are eternal there is the break of convention at the beginning of yugas and Manvantaras (cycles of creation) and consequently no connexion can be established between words and their meanings. It is for this reason that people cry from housetops—Grammar began with Mahes'vara i. e. Mahes'vara is the father of the science of grammar.'

Similarly we find in the Sārasvatavyākaraṇa-bhāṣya समुद्रवद् व्याकरणं महेश्वरे under the Vārttika षष्ठ्यर्थे च सप्तमी वक्तव्या. The commentator Govindācārya quotes the full stanza which runs as follows :—

समुद्रवद्व्याकरणं महेश्वरे तदम्बुकुम्भोद्धरणं * बृहस्पतौ ।
तदुद्धृतिर्गोष्पदवत्† पुरन्दरे कुशाग्रबिन्दुग्रथितं ‡ हि पाणिनौ ॥

In the list of works an grammar belonging to Kavīndrācārya we find Brahma-vyākaraṇa, Yama-vyākaraṇa, Vāyu-vyākaraṇa, Varuṇa-vyākaraṇa, Saumya-vyākaraṇa Vaiṣṇava-vyākaraṇa, *Rudra*-vyākaraṇa and Kaumāra vyākaraṇa (beside Kālāpa Vyākaraṇa). But we have no idea about the nature or contents of these Vyākaraṇas.

It is significant that Pāṇini who mentions 10 predecessors and Kātyāyana and Patañjali who also mention several predecessors nowhere mention S'iva.

---

* तदर्धकुम्भोद्धरणं—पाठान्तरम् ।

† तद्भागभागाच्च शतं–पा ।

‡ कुशाग्रबिन्दूत्पतितं–पा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

The several views mentioned above may be summmarised thus :

1. Pāṇini received from S'iva the whole of the Aṣṭādhyāyī along with the S'ivasūtras (Kathāsaritsāgara, Bṛhatkathāmañjarī etc).

2. Pāṇini received the S'ivasūtras alone from S'iva and composed the Sūtrapāṭha, Dhātupāṭha, Gaṇapāṭha and Liṅgānus'āsana himself (Bhaviṣya Purāṇa). In exactly the same way, Sarvavarman is believed to have obtained the rule regarding the alphabet (सिद्धो वर्णसमाम्नायः) from Ganes'a and composed the rest of his grammar himself.

3. The S'ivasūtras are eternal *i. e.*, the alphabet as enshrined in the S'ivasūtras is eternal. S'iva merely added the anubandhas and revealed them to Pāṇini (Nāges'a).

4. Pāṇini borrowed these rules *mutatis mutandis* from his predecessors. Thus in the Ṛktantra vyākaraṇa no mention is made of S'iva in this connexion. Pāṇini also is not mentioned, but that may be because this portion of the work is anterior to Pāṇini. As against this we may say that the S'iva sūtras as found in Pāṇini differ greatly from the Varṇasamāmnāya of the Rktantra and it is possible that they were revealed to Pāṇini by Mahes'vera in their present form.

S'āntanavācārya in his Phiṭsūtras follows a slightly different system of Pratyāhārasūtras. In ii.4, 19, 24, 26 and iii. 2 we get अग्र् or अष् corresponding to अच् of Pāṇini. In ii. 20 occurs इक् identical with P's इक्. II. 25 and iii. 17 contain हय् in the sense of later हल्. The correct reading of ii. 8 appears from Bhoja's Sarasvatīkaṇṭhābharaṇa to be खर्यवर्णं कतिमाख्या चेत्. Thus P's खय् would correspond to S''s खर्. The Candra Vṛtti says : एष प्रत्याहारः पूर्वव्याकरणेष्वपि स्थित एव। अयं तु विशेषः—ऐ औष् इति यदासीत्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदृ ऐ औजिति क्षतम् । तथाहि "लघावन्ते द्वयोश्च बह्वषो गुरुः" [फि० सू० २।१६], "तृणधान्यानां च द्व्यषाम्" [फि° सू० २।४] इति पठ्यते ।

The author of the Vṛtti concludes that the original form of the S'ivasūtras has been preserved in the Candra Vyākaraṇa (which, by the way, combines ह य व र ट् and ल ण् into ह य व र ल ण्) with the exception of ऐ औ च् which was originally ऐ औ ष्. This is, however, very doubtful.

The uṇādi sūtras the authorship of which is attributed to S'ākaṭāyana uses the S'īva sūtras and if वहृयघहृधां न भष् quoted by Sṛṣṭidhara really belongs to Apis'ali, he also uses the S'ivasūtras.

The Mahābhāṣya quotes and explains the Vārttika: वृत्तिसमवायार्थो वर्णानामुपदेशः, अनुबन्धकरणार्थश्च at the end of the first or Paspas'āhnika in reply to the question अथ किमर्थो वर्णानामुपदेशः. At the end of the second or Pratyāhārāhnika, Patañjali quotes a S'lokavārttika which runs as follows :

वर्णज्ञानं वाग्विषयो यत्र च ब्रह्म वर्तते ।
तदर्थमिष्टसिद्ध्यर्थं लघ्वर्थञ्चोपदिश्यते ॥

Patañjali concludes : सोऽयमक्षरसमाम्नायो वाक्समाम्नायः पुष्पितः फलितश्चन्द्रतारकवत् प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः, सर्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भवति, मातापितरौ चास्य स्वर्गे लोके महीयेते ।

'This traditional collection of letters is the traditional collection of speech. When it blossoms, bears fruits and becomes decorated like the moon and stars, it is to be known as the collection of the Vedas. A knowledge of this brings on the merit accruing from all the Vedas, and the parents of him who knows it are honoured in heaven.'

Because the Vedas consist of words and words consist of letters, the Varṇasamāmnāya is first regarded as Vāk-samāmnāya and when it grows into glorious fruition into the Vedas it is regarded as Brahmarās'i. This does not tell us anything of the S'ivasūtras as we find them in Pāṇini but is a general description of the sounds of the language.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Now the three purposes served by the S'ivasūtras acc. to both Kātyāyana and the author of the S'loka-vārttikas are : (1) a knowlenge of the sounds of speech wherein resides Brahman, (2) a knowledge of the desired sounds and (3) brevity.

The S'lokavārttika and the Vārttika evidently refer to some original fuller Pratyāhāra-sūtras like those found in the Rktantravyākaraṇa, for it is they alone that furnish us with a knowledge of the sounds of speech. As regards a knowledge of the desired letters,as for instance, the voiced consonants or the unvoiced unaspirates, the earlier sūtras are far better guides than the S'iva-sūtras as we have them in Pāṇini, for from these sūtras we can have no knowledge of the unvoiced aspirates. Brevity, of course, is far better secured in the Pāṇinīya S'iva-sūtras than in the earlier ones. This is the reason why later treatises mention this third point only. Thus the Candravṛtti and the Kās'ikā say : अथ किमर्थो वर्णानामुपदेशः ? प्रत्याहारार्थः। प्रत्याहारो लाघवेन शास्त्रप्रवृत्त्यर्थः। Similarly Kaiyaṭa while explaining यदि च किञ्चिदन्यदप्युपदेशे प्रयोजनमस्ति says: प्रयोजनार्थो हि वर्णानामुपदेशो न स्वरूपप्रतिपत्त्यर्थः। Bhaṭṭoji also says in his S'abda-kaustubha : वर्णोपदेशस्य मुख्यं फलं तु प्रत्याहारनिष्पत्तिः।

Summary.

1. The Sanskrit alphabet appears to have been extant in two different orders even from a very early period.

2. There was first the Uddes'a or simple enumeration which is the basis of the order of letters generally found in the Prātis'ākhyas and S'ikṣā treatises. Then there arose the Upades'a or scientific classification which is the basis of the S'ivasūtras.

3. At first the Upades'a did not contain any *anubandha*

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

in its later sense, the pratyāhāras being formed only in the case of consonants or vowels and consonants simply by putting the last letter which was called "anubandha" immediately after the first letter.

4. Each single letter was mentioned in the Uddes'a and the usual order of the vargas was followed (*e. g.*, k, c, ṭ, t, p etc.). The Pluta vowels would appear to have been passed over in the early versions of both Uddes'a and Upades'a, for the Kātantra calls them Anupadiṣṭa (i. 3. 4). Later on with a view to securing brevity the long Samānākṣaras were also excluded.

5. Anubandhas were first introduced for vowel pratyāhāras and were extended to the consonants for the sake of symmetry. The order of the consonants was also changed for purposes of rules of grammar.

6. In the S'iva-sūtras as they have come down to us, the Anubandhas are generally formed with the first and last letters of the varga, then with sibilants which come at the end of the alphabet and lastly with semi-vowels which immediately precede the sibilants on the principle आदिरन्त्येन (i. 1. 71).

7. In the ordinary alphabet the order of letters is determined not only by the place of articulation but also by Karaṇa. This is why the palatals precede the cerebrals.

8. The S'iva sūtras as they have come down to us are intended *not* to give us a scientific classification of sounds, but to secure brevity in the matter of rules of grammar by means of Pratyāhāras.

9. Brevity is secured in other ways also, *e. g.*, by adding *u* to the first letter of a varga to denote the entire varga, but this has nothing to do with S'iva sūtras and *ku*, *cu*, *ṭu*, *tu*, *pu* are not Pratyāhāras, *u* being merely the abbreviated form of "varga".

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

THE SIVA SUTRAS AND THE SANSKRIT ALPHABET

BY

KSHITISH CHANDRA CHATTERJI

MANJUSHA OFFICE

81, SHYAMBAZAR STREET,

CALCUTTA.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

What Scholars think of the Manjusha.

Dr. Suniti Kumar Chatterji, M.A., D.LITT. (London) Professor, Calcutta University, writes :

This little paper is unique in many respects. Sanskrit is said to be a dead language in India, but it is not yet as dead as many people think (or as some people would like to think !)...

We have still about half-a-dozen Sanskrit journals in India, apart from fairly frequent addresses and dissertations which are published independently. Among these journals, the *Manjusha* which is probably the only one of its kind appearing *regularly* month after month, has made quite a unique place of its own.

The *Manjusha* is run by Dr. Kshitish Chandra Chatterjee of the University of Calcutta, who is one of our most erudite authorities on the technical and other niceties of Sanskrit grammar. He is a student of languages and, in addition, he handles Sanskrit with ease. It has been his love of Sanskrit that has made him carry on the work of editing and bringing out this paper since its inception by himself. Financially it has been a thankless task. It has brought other disadvantages also—the editing and financing of a journal without much wide appeal because of its language has been a source of worry which has had its repercussions on his health. But he has not given in, because he is an incorrigible optimist when he is convinced his cause is noble. Prof. Chatterjee is quite an institution in himself. Then, he has been able to enist a number of disinterested colleagues who help him with contributions and who are enthusiasts for Sanskrit like himself. And he himself writes. It is a remarkable thing that although he finds joy in unravelling the intricacies of Sanskrit grammar, he is not in his mental make-up a dry-as dust grammarian. He has a wonderful sense of humour supported by an inexhaustible fund of anecdotes and stories which he brings out in racy Sanskrit. So the pages of the *Manjusha* at times sparkle with laughter. Comparative linguistic he brings in frequently in his articles, and this is a remarkable "special feature" of this little paper. Further, it does not confine itself to Sanskrit alone. Proverbs, *Bon-mots*, wise sayings, *Mahavahyas*, etc. from different languages, English, French, German, Latin, etc., are rendered appropriately into Sanskrit, demonstrating the capacity of the language of the Gods to keep pace with turns of expression peculiar to various languages. One can say also that there is an "English Section" to this magazine, devoted as it is entirely to the culture of Sanskrit. Thus, the editor himself is bringing out through this magazine, in instalments, his English translation and commentary on the *Mahabhashya*

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

of Patañjali which, when completed, will be a valuable contribution to the study of Sanskrit grammar through English.

A journal like this deserves a much wider appreciation which is its due. I think our high school students reading Sanskrit will find much of interest, pleasure and profit in it. I would suggest its being taken in all schools, colleges and universities in India where Sanskrit is taught. Prof. Chatterjee has been able to obtain contributions from eminent Sanskritists not only from all over India but also from abroad and that is no negligible achievement. All power to his elbow for the rehabilitation and the glory of Sanskrit, and for re-establishing its popularity among young Indians of today !

TECHNICAL TERMS AND TECHNIQUE OF

SANSKRIT GRAMMAR

A Critical, Comparative and Historical Study

By

KSHITISH CHANDRA CHATTERJI, SASTRI, M. A., D. LITT.

Lecturer, Calcutta University ;
Formerly Editor, Calcutta Oriental Journal,
Surabharati, Oriental Literary Digest, etc., etc.

"We have nothing but admiration for this masterpiece of scholarship." *Modern Review.*

Price Rupees Ten only. *Foreign Rs. 12/-*
Postage Extra.

VISVANATH CHATTERJI
81, Shyambazar Street,
CALCUTTA—4
Phone : B. B. 4049

Printed and published by Sri Jyotish Chandra Chatterjee, B. A. from 81, Shyambazar Street, Calcutta—4. Printed at the Elm Press 63, Beadon Street, Calcutta—6.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Approved by the Directors of Public Instruction,
Madras, Bihar and Mysore.

श्रीशिवः शरणम्

५म-वर्षे] May—July, 1951 [नवमादिसंख्यात्रयम्

मञ्जूषा

सम्पादकः—श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

Principal Contents.

Proverbs from Sanskrit, Greek, Latin and other languages.

Haoma Yasht with notes and translation by Dr. I. J. S. Taraporevala, B.A., Ph. D., Barrister-at-Law.

Christian prayer with Sanskrit equivalent.

Different readings of the rules of Pāṇini.

Rasamañjarī—Words as "fossil history".

Critical Observations on the text of Sayana's Commentary on the Rigveda.

Mahābhāsya with notes and Translation.

Office : 81 Shyambazar Street, Calcutta—4

Annual Subscription : Rupees Six only.

Foreign—Rupees Nine.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काव्यालङ्कारसूत्रवृत्तिः (वामनविरचिता ५।१
अभिनवविशदविस्तृतटीकोपेता Rs. 2

Convocation Address in Ancient India -8-

स्त्रीप्रशंसा—The original slokas of Varāhamihira with a splendid Sanskrit commentary Re. 1/-

Popular Etymology Re. 1/-

শব্দকথা—সরস সরল ভাষাতত্ত্ব— ২৲
ঊষার আলো—হাসির গল্পের সমষ্টি— ৸০
নক্ষত্রমালা—ধর্মবিষয়ক শ্লোক ও অনুবাদ— ।৴০

मञ्जूषाया नियमावली

१। मञ्जूषाया वार्षिकं मूल्यं रूपकषट्कम्। ग्राहकैर्वर्षस्य प्रथमसंख्यात एव ग्रहीतव्यम्।

२। प्रतिसौरमासं दशमदिने (आङ्लमासस्य चतुर्विंशे दिवसे) 81, Shyambazar Street, Calcutta 4 इत्यतो मञ्जूषा प्रकाश्यते।

३। मञ्जूषायास्तावद् भागत्रितयं वर्तते। तत्र प्रथमे भागे देवभाषां प्रविविक्षूणां कृते सरलाः श्लोकाः, आभाणकाः, कथाः, आख्यानानि च सन्निवेश्यन्ते, द्वितीये भागे दार्शनिकाः प्रबन्धाः, व्याकरणालङ्कारादीनां विमर्शाः, पाठविचारः, जिज्ञासा मीमांसा च, पुस्तकपरिचयादयश्च प्रकाश्यन्ते; तृतीये भागे सानुवादाः पारसीकानां गाथाः, साङ्लानुवादं महाभाष्यम्, ऋग्वेदश्च सभाष्यो मुद्र्यन्ते।

Several complete sets of Vol. IV of the Manjusha are still available for Rs. 6/- and only a few sets of Vols. I-III are available at Rs. 5/12/- for the lot.

श्रीविश्वनाथ चट्टोपाध्यायः।
८१ श्यामबाजार ष्ट्रीट्, कलिकाता ४।
81, Shyambazar Street, Calcutta 4.
Phone: B. B 4049.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम् ॥

मञ्जूषा

May—July 1951. | १८७३-ज्यैष्ठाषाढ़श्रावणानाम् ५म-वर्षस्य नवमादि-संख्यात्रयम् | Vol. V. Nos. 9-11

आभाणकाः

(व) ढाकी शुद्ध विसर्जन ।
सढक्किकाया विसर्जनम् ।

प्रतिमाविसर्जनकाले यदा सहकारी ढक्कावादकोऽपि सलिले निमज्ज्यते तदोच्यते वङ्गीयैः—"ढाकी-शुद्ध विसर्जन" इति। आङ्लभाषायामनुरूप आभाणकः—emptying the baby out with the bath स्नानीयसलिलेन साकं शिशोरपि निष्कासनम् । स्नानाधारे शिशुं स्नापयित्वा मलिनसलिलं निष्कास्यते, कदाचिद् निष्कासनीय-सलिलेन साकं रक्षणीयः शिशुरपि निष्कास्यते । वार्णार्डशमहोदयेनोक्तम् —They perform the operation known as emptying the baby out with the bath. They do not weed the garden; they tear up everything that grows in it, flowers and fruits and vegetables as well as weed इति । स्नानाधारेण साकं शिशोर्निष्कासनमिति प्रसिद्धं व्यापारं ते निर्वर्तयन्ति । न खलु ते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कक्षशून्यं विदधत्युद्यानम्, ते यद् यत् तत्र प्ररोहति तत् सर्वमेव समत्पाटयन्ति पुष्पाणि च फलानि च शाकानि च ।

(आ) Strike, but hear.

(श) Pataxon men, akouson de.

(ला) Verbera sed audi.

ताडय, परमाकर्णय । ताड़य यदीच्छसि, परमत्र मदीयं वक्तव्यमवश्यमेव श्रोतव्यम । यस्मादपराधाद् मां ताडयितुमिच्छसि स परमाथत एवापराधो वा न वा, मयाऽसावनुष्ठितो वा न वा, यस्यामवस्थायां मयाऽनुष्ठितस्तस्यां तस्य गुरुत्वमपैति वा न वा, सर्वं मन्मुखात् श्रुत्वाहं ताड़नीयश्चेत् ताड़य । तत्र मम कापि विप्रतिपत्तिर्नास्ति । "सहसा विदधीत न क्रियामित्यपि" न विस्मर्तव्यम् ।

Of wine the middle, of oil the top, and of honey the bottom, is the best.

(ला) Quaero igitur, Cur oleum quod in sumno est, vinum quod in medio, mel quod in fundo optimum esse credantur.

Vino di mezo, oglio di sopra & miele di sotto.

मद्यस्य मध्यम्, तैलस्याद्यम्, मधुनश्च मूलमेव सारम् ।

मार्जारमूर्खः

[कथासरित्सागरतः ६५।१५८-१७६]

उज्जयिन्यामुपाध्यायो मुग्धः कोऽप्यभवन्मठे ।
तत्र निद्रा न तस्याभून्मूषकोपद्रवान्निशि ॥
तत्खिन्नस्तच्च सुहृदे स कस्मैचिदवर्णयत् ।
मार्जारं स्थापयानीय सोऽत्र खादति मूषकान् ॥
इति सोऽपि सुहृद्विप्रस्तमुपाध्यायमब्रवीत् ।
मार्जारः कीदृशः क्वास्ते न स दृष्टचरो मया ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्युक्तवत्युपाध्याये तं सुहृत् सोऽब्रवीत् पुनः ।
काचरे लोचने तस्य वर्णः कपिलधूसरः ।
पृष्ठे च लोमशं चर्म रथ्यास्वटति चेह सः ॥
तदेभिस्त्वमभिज्ञानैरन्विष्यानाययाशु तम् ।
मित्र मार्जारमित्युक्त्वा तत्सुहृत् स ययौ गृहम् ॥
ततः शिष्यानुपाध्यायः स जगाद जडो निजान् ।
अभिज्ञानानि युष्माभिः श्रुतान्येव स्थितैरिह ॥
तदन्विष्यत मार्जारं रथ्यासु तमिह क्वचित् ।
तथेति ते गताः शिष्यास्तत्र भ्रेमुरितस्ततः ॥
तथापि न तु तैर्दृष्टो मार्जारः स कदाचन ॥
अथैकं ते वटुं रथ्यामुखादैक्षन्त निर्गतम् ॥
काचरं नेत्रयुगले वर्णे धूसरपिङ्गलम् ।
पृष्ठोपरि दधानं च लोमशं हरिणाजिनम् ॥
दृष्ट्वा तं सैष मार्जारः प्राप्तोऽस्माभिर्यथाश्रुतः ।
इत्यवष्टभ्य तं निन्युरुपाध्यायान्तिकं च ते ॥
उपाध्यायोऽपि मित्रोक्तैर्युक्तं मार्जारलक्षणैः ।
दृष्ट्वा तं स्थापयामास रात्रौ तत्र मठान्तरे ॥
मार्जारो नूनमस्तीति मेने सोऽपि बटुर्जड़ः ।
मार्जाराख्यां कृतां शृण्वन्नात्मनस्तैरबुद्धिभिः ॥
स च भौतो बटुः शिष्यस्तस्य विप्रस्य येन तत् ।
उपाध्यायस्य तस्योक्तं मैत्र्या मार्जारलक्षणम् ॥
प्रातः सोऽत्रागतो विप्रो बटुमन्तर्विलोक्य तम् ।
इह केनायमानीत इति भौतानुवाच तान् ॥
श्रुतोपलक्षणस्त्वत्तो मार्जारोऽस्माभिरेष सः ।
आनीत इत्युपाध्यायो भौतः शिष्याश्च तेऽवदन् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततो विहस्य सोऽवादीद्विप्रो मूढ़ाः क्व मानुषः ।
क्व च तिर्यक् स मार्जारश्चतुष्पात् पुच्छवानपि ॥
तच्छ्रुत्वा तं बटुं मुक्त्वा तेऽब्रुवन्मन्दबुद्धयः ।
तर्ह्यन्विष्यानयामस्तं मार्जारं तादृशं पुनः ॥
एवमुक्तवतो मूढ़ाञ्जनस्तत्र जहास तत् ।
अज्ञता नाम कस्येह नोपहासाय जायते ॥

प्राचीनानि खृष्टीय-स्तोत्राणि

[R. Antoine, S. J.]

Ad Vesperas	प्रदोषे
Lucis Creator optime	उत्तम ज्योतिषः स्रष्टः
Lucem dierum proferens,	प्रकाशयसि वासरम् ।
Primordiis lucis novae	तेजस्युदित आसीस्त्वं
Mundi parans originem	जगन्मूलस्य रोपकः ॥
Qui mane junctum vesperi	प्रभातादिप्रदोषान्तो
Diem vocari praecipis:	दिवसोऽभिहितस्त्वया ।
Illabitur tetrum chaos,	पतति तिमिरे सान्द्रे
Audi preces cum fletibus.	शृण्वस्मत्परिदेवनम् ॥
Ne mens gravata crimine	क्षणिकैकाग्रतां मुक्त्वा
Vitae sit exsul munere,	मा भूत्पापजडं मनः ।
Dum nil perenne cogitat	उद्धृताभ्रान्तिपाशेभ्यो
Seseque culpis illigat.	गच्छेमामरलोकताम् ॥
Coeleste pulset ostium,	स्वर्गस्य तोरणं प्राप्ताः
Vitale tollat praemium;	सिद्धिं लभामहै पराम् ।
Vitemus omne noxium,	दुष्कृतं क्षाल्यतां सर्व-
Purgemus omne pessimum.	महितं परिहीयताम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Praesta, Pater piissime	दयां कुरु पितः श्रेष्ठ
Patrique compar Unice,	सूनो सरूप पाहि नः ।
Cum Spiritu Paraclito	परमात्मनि संश्लिष्टौ
Regnans per omne saeculum.	विराजेथे युगे युगे ॥
Amen.	तथास्तु ।
Ad Completorium	रात्रौ ।
Te lucis ante terminum,	विलीने तमसालोके
Rerum Creator, poscimus,	नम्रास्त्वामुपसर्पिणः ।
Ut pro tua clementia	त्वदनुग्रहविश्वस्ता
Sis praesul et custodia	वृणुमहे तवाश्रयम् ॥
Procul recedant somnia,	दुःस्वप्ना अपनुद्यन्तां
Et noctium phantasmata :	शार्वर्यश्च प्रतारणाः ।
Hostemque nostrum comprime,	पिशाचा विनिगृह्यन्तां
Ne polluantur corpora,	मा तै दुंष्यन्तु विग्रहाः ॥
Praesta, Pater piissime,	दमां कुरु पितः त्रेष्ठ
Patrique compar Unice,	सूनो सरूप पाहि नः ।
Cum Spiritu Paraclito	परमात्मनि संश्लिष्टौ
Regnans per omne saeculum.	विराजेथे युगे युगे ॥
Amen.	तथास्तु ।

At Vespers.

Father of Lights, by Whom each day
Is kindled out of night,
Who, when the heavens were made, didst lay
Their rudiments in light,

Thou, Who didst bind and blend in one
The glistening morn and evening pale,
Hear Thou our plaint, when light is gone,
And lawlessness and strife prevail.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Hear, lest the whelming weight of crime
Wreck us with life in view ;
Lest thoughts and schemes of sense and time
Earn us a sinner's due.

So may we knock at heaven's door,
And strive the immortal prize to win,
Continually and ever more
Guarded without and pure within.

Grant this, O Father, Only Son,
And Spirit, God of grace,
To Whom all worship shall be done
In every time and place. Amen.

At Compline.

Now that the day-light dies away,
By all Thy grace and love,
Thee, Maker of the world, we pray
To watch our bed above.

Let dreams depart and phantoms fly,
The offspring of the night,
Keep us like shrines, beneath Thine eyes,
Pure in our foes' despite.

This grace on Thy redeemed confer,
Father, Co-equal Son,
And Holy Ghost, the Comforter,
Eternal Three in One. NEWMAN

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

-वर्षे

हखोम यश्‌त्‌

[I. J. S. Taraporevala]

क्षथ्रे—क्षत्रे। राज्ये। In the dominion.

अउर्वहे—आर्यस्य। वेदे खलु उर्वियाशब्द उपलभ्यते। (बृहन्महान्त उर्विया वि राजथः ऋ० स० ५।५५।२), तदनुसारेण मया उर्विय-शब्दः कल्पितः।

आओङ्‌ह—आस। आवेस्तायां तावत् केचन दएव-शब्दाः केचन पुनरहुरशब्दा उपलभ्यन्ते। अस्-धातुः प्राथमिकेष्वेवान्तर्भवति, दुष्टवस्तुविषये एवायं प्रयुज्यते, शोभनवस्तुविषय पुनः बृ (=सं० भृ) धातुः प्रयुज्यते। अग्रे ८म श्लोको द्रष्टव्यः।

अओतेम्—आर्द्रत्वम्, शैत्यम्। उदकसमानार्थकोदशब्द-निष्पन्नोऽयम्। वङ्गभाषायां यश्छायार्थक आओताशब्दः सन्दृश्यते, स तु आतपत्रशब्दस्यापभ्रंश इति शब्दिका मन्यन्ते।

गरेमेम् (नपुंसकलिङ्गः)—तापार्थको पुंलिङ्गो धर्मशब्दो वेदेषूपलभ्यते। Gk. thermos. (आ सूर्यादभरन् धर्ममेते। ऋ० स० १०।१८१।३)।

ज़उर्वे—मूलशब्दो ज़उर्वा। जरा।

अरस्को—रेषकः। यत् किल रेषयति तद्रेषकम्। envy ईर्ष्या, मत्सरः। पारसीकेर्ष्यार्थक-'रश्क्'-शब्दोऽप्यस्मादेव निष्पन्नः।

दएवोदातो—देवधातः। देवधितः। देवहितः।

पंचदस—छन्दसि प्रथमाद्विवचने पञ्चदशा, भाषायां पञ्चदशौ।

फ्रचरोइथे—प्रचरेते। संस्कृते प्र-चरतिः परस्मैपदी, आवेस्तायां क्रियाफलस्य कर्तृगामित्वादात्मनेपदम्।

रओधयेष्व—रओधएषु आ। पूर्ववद्धस्वः। ऋग्वेदे नपुंसकलिङ्गः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रोहशब्दः सकृदेव प्रयुक्तः—दिवो रोहांस्यरुहत् पृथिव्याः [६।७।१।५] इति न्यग्रोध-शब्दे दृश्यमानात् रुहधातोः प्राचीनरूपात् रुधधातो रोहशब्दो मया कल्पितः। अर्थश्च वर्धनम्, आकृतिः, growth, stature.

क्षयोइत्—क्षयेत्। Opt. aor. a-variety.

नैर्योसङ्ग-कृतानुवादः। यमशेदस्य (=यमस्य क्षत्रस्य) राज्यं उत्कृष्टतरे न शीतमासीन्न च दाघः....न च ईर्ष्या देवदत्ता। (अहो सर्वमपि अभूत्, परं पापकर्मकत्वात् अन्यथा धृतमासीत्)। पञ्चदश-वार्षिकौ प्रचरतः [पञ्चदशवार्षिकी प्रचरति] पिता पुत्रस्य योतिः (=गुज़राता जोड़ी, द्वयी, युगलम्)। (स्तुत्यां पितृ(ता) पुत्रयोरुक्तं यत् पुत्र एवं शोभनोऽभूत् यथा पिता, पिता च एवं शोभनोऽभूत् यथा पुत्रः)।

क्रमशः

प्रतिज्ञापूरणम्

(२)

[स्वर्गत-प्रभातकुमार-मुखोपाध्यायस्य]

द्वितीयः परिच्छेदः

प्रोक्तपूर्वाद्वृत्तान्ताद् व्यतीतेषु कियत्सुचिद्वासरेषु एकदा उपेन्द्र-वन्द्योपाध्यायस्य सहधर्मिणी प्रवहणेन समगच्छत् साक्षात्कर्त्तुं भवतोषमातरम्।

प्राथमिककुशलानुयोगादिसमनन्तरम् उपेन्द्रमहोदयस्य पत्नी पृष्टवती, अन्तिके, अपि सम्मतो भवतोषः ?

भवतोषस्य माताऽवदत्, विवाहे तावत् सम्मतः, तस्य तु मत-मतीवाद्भुतम्।

कथमिव ?

प्रथमं तावदुवाच, अहं स्वयं परीक्ष्य पाणिग्रहणं करिष्यामि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मयोक्तम्, सम्यक्। अस्ति काचन निरतिशयलावण्या कन्यका। तां तावत् तद्भवनं गत्वा पश्य। तेनोक्तं, नाहं सुन्दरीं कन्यां परिणेष्यामि, काञ्चन कृष्णवर्णां कुत्सितदर्शनां कुमारीं परिणेतुमिच्छामि।

तच्छ्रुत्वा उपेन्द्रमहोदयपत्नी विस्मितोवाच, न हि कदाऽपि श्रुतपूर्वमीदृशमत्यद्भुतं प्रार्थनम्। कथं तावत् समुत्पन्नस्तस्यैतादृशो मनोरथस्तत्र किमप्युक्तं वा ?

एवमनुयुक्ता भवतोषजननी पुत्रमुखाच्छ्रुतं सर्वं निवेदितवती। उपेन्द्रमहोदयस्य पत्नी अनुध्यायन्ती स्थिता। व्यतीतायां च कियत्यांचित् कालकलायां प्रोवाच, अन्तिके, त्वं तावत् कर्मैकं कुरु। आगामिनि शनिवासरे आगमनार्थं भवतोषस्य सविधे पत्रं प्रेषय। पत्रे विलिख्यताम्, यादृशी कन्या त्वयेष्यते परिणेतुं तादृश्येव काचन मया स्थिरीकृता, तद्दर्शनार्थमागन्तव्यमिति। ततश्च समागतोऽसौ रविवासरेऽपराह्ण प्रेष्यतामस्मद्भवन। मया सर्वं समीकरिष्यते।

भवतोषस्य माता तत्तथेति प्रत्यपद्यत। अचिन्तयच्च, कदाचिन्मन्यते उपेन्द्रमहोदयस्य भार्यया न खलु पुलिनां समवलोक्य भवतोषो विवाहं प्रत्याख्यातुं प्रभवेत्। वस्तुतस्तु न खलु तद्विस्मयावहम्—कन्यकाऽसौ परमार्थते एवातीव सुन्दरी।

तृतीयः परिच्छेदः

भवतोषः शनिवासरे समगच्छत् स्वभवनम्। परद्यवि चापराह्णे केशान् रुक्षान् विधाय (प्राचीना हि मुनयो नैव प्रसाधितवन्तः केशान् इति) अश्वशकटेन ग्रामान्तरे उपेन्द्रवन्द्योपाध्यायमहोदयस्य भवनं प्रययौ।

तत्र चाश्रृणोत्, न खलु उपेन्द्रमहोदय इदानीं वर्त्तते गृहे, कर्मानुरोधन स्थानान्तरं गत इति। तरुणश्च कश्चन महता समादरेण

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तं शकटावतीर्णं बहिःप्रकोष्ठं समुपावेशयत् । तरुणोऽयमुपेन्द्र-महोदयस्यैव भ्रातृव्यः ।

कियतश्चित् कालादूर्ध्वं दासी काचित् समुपागत्य विज्ञापितवती, अन्तःपुरं समागन्तव्यम् इति । दासी तावद् भवतोषस्य मुखे विनिवेश्य नयनद्वितयं किञ्चिदिव स्मित्वा प्रस्थिता ।

यूना साकं भवतोषः प्राविशदन्तःपुरम् । दासकर्मकरादयः सर्वं एव प्रयतन्ते हास निह्नोतुमित्येवासीन्मनसि तस्य ।

भवतोषश्च कस्मिंश्चन कक्षे नीतः । कक्षश्चासौ सुसज्जित एवासीत्, मध्ये चासनमेकमास्तृतम् । तस्य च पुरतः कांस्यपात्रे फलानि मृष्टान्नानि च सन्नद्धान्यासन् । ततश्च नातिदूरे द्वितीयमासनमास्तीर्णमासीत् ।

अभ्यर्थितश्च भवतोषो मृष्टान्नपात्रस्य पुरतः समुपविष्टः । अवसरे चास्मिन् बहिरश्रूयत मनोहरं शिञ्जितम् । दासी च कन्यकया साकं प्रविवेश । कन्या चापरस्मिन्नासने उपविश्य गृहमभितः पातितवती कुतूहलगर्भां दृष्टिपरम्पराम् ।

व्रीडया विनम्रमभूद्भवतोषस्य वदनम् । किञ्चित् फलं च स भक्षयति, नेत्रत्रिभागेण च पश्यति कन्यकाम् । कन्यायाः परिधानं तावत् वार्ताकुवर्णा काचन मुम्बयी-शाटिका । मस्तकं च कबरी-शून्यम् । केशास्तु तैलसेकातिशयेन चव्चवायमानाः स्थिताः ।

कन्यकाया वर्णस्तावन्मसीविनिन्दितः । नयनद्वितयं क्षुद्राकारं कोटर-प्रविष्टं, निरन्तरं च घूर्णमानम् । ललाटमुन्नतम् । नासिका चिर्भटी । चिबुकमनस्तिकल्पम् । सम्मुखस्थाश्च दशनराजयः किञ्चिदेव दृश्यन्ते ।

दृष्ट्वा चामन्यत भवतोषः, कामं कन्येयं मदीयादर्शानुरूपैव रूपेण । किञ्चित् कण्ठं प्रसाध्य धैर्यं सञ्चित्योवाच, किं तावत् त्वदीयं नाम इति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कन्यकाऽसौ सपदि भवतोषं प्रति निक्षिप्य दृष्टिं रसनां च किञ्चिदिव बहिर्निष्कास्योवाच, अँा (किं ब्रवीषि) ? इति ।

किं तावत्तदीयं नाम ?

मम नाम जगदम्बा ।

अत्रान्तरे युवा दासी च तां प्रति निचिक्षिपतुः सरोषं कटाक्षम् । सा च तदात्व एवाब्रवीत्, न खलु जगदम्बा । मम नाम पुलिना ।

तरुणेनोक्तम्, आदौ तावदस्या जगदम्बेति नामधेयमासीत्, इदानीं पुनः परिवर्त्य पुलिनेति विहितम् ।

भवतोषो व्यचिन्तयत्, न खलु परिवर्तनमिदं समीचीनम् । पुलिना—श्रवणेनैव निर्दहन्तीव गात्राणि । ततश्च जगदम्बेति नामातीव साधीयः । पौराणिकमिदं नाम—देवताया नाम । विवाहत ऊर्ध्वं मया जगदम्बेति नामैव स्थापयिष्यते ।

भवतोषोऽपृच्छत्, किं पठ्यते त्वया ।

बालिका पूर्ववत् प्रदर्श्य जिह्वामवोचत्, अँा ?

किं पठ्यते त्वया ?

"किमपि न पठामि । मम ज्येष्ठः पाठशालायां—" । यूना च पुनरपि सरोषकटाक्षताडिताऽसावन्तरैव विरराम ।

तच्छ्रुत्वा भवतोषः समधिकं समाश्वस्तः । इदमेव सम्यक् संवृत्तम् । इयमेव परमार्थत आर्यगृहिणीपदमारोपयितुं शक्यते । दर्शने पुनः किञ्चित्—भवतु तावत् तत्—तदेव मे प्रतिज्ञातम् । विवाहे च कलिकाताभवनस्थाश्छात्रा निमन्त्र्याऽऽनेयाः ।

भवतोषोऽवदत्, भवतु । गन्तव्यं त्वया ।

बालिका जिह्वाग्रं निष्कास्य पुनरप्यवोचत्—अँा ?

गन्तव्यम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदा च दासी तां गृहान्नीतवती।

क्रमेण चावसितो भवतोषस्य फलादिभोजनव्यापारः। अत्रान्तरे त्रयोदशवर्षीया बालिका रजतकरङ्केण ताम्बूलानि समुपानयत्। बालाऽसावतीव हृद्यदर्शना, स्वदेशनिर्मितां कृष्णदशां शाटिकां परिधाय समागता। पादयोस्तस्याः पादकटकचतुष्टयं पाण्योश्च जात्यसुवर्ण-विनिर्मितं वलययुगलम्। अन्तरा च भ्रुवोः खदिरविरचितं तिलकम्।

ताम्बूलानि संरक्ष्य प्रतिनिवृत्तासौ बाला। प्रत्यावर्तनावसरे च किञ्चिदिव स्मित्वा गता।

भवतोषो मनसि व्यचिन्तयत्, दृश्यताम्। इयं तावत् सुन्दरी कन्यका। अथ चेदनया साकं मे विवाहोऽभविष्यत्, तर्हि कुतो मे रक्षा? सर्वे ममादर्शाः सर्वे च सङ्कल्पा अगाधसलिलराशौ न्यमङ्क्ष्यन्। कदाचिद् विलासविभ्रमनिमग्नस्य मे—ममापि भवतोषस्य—मानसे विकारः समघटिष्यत। नहि नहि न खलु सुखाय, प्रीतये, प्रणयाय वा मया परिणीयते; परं धर्माय संयमाय आदर्शार्यगृहस्थजीवनयापनायैव परिणीयते। प्रतिज्ञापूरणसम्भूतमात्मगौरवं नैव ममौ भवतोषस्य मानसे।

यूना साकं बहिरागच्छद्भवतोषः।

दासी चाऽऽगत्य सस्मितमवदत्, गृहकुटुम्बिन्यः पृच्छन्ति, अपि रोचते कन्यका इति।

भवतोषः साभिमानमुवाच, अथ किम्।

चतुर्थः परिच्छेदः

शकटेन गृहं विनिवर्तमानो मनसा समालोचयद् भवतोष आप-राह्णिकं वृत्तान्तजातम्। ग्रामपथेन समागच्छति शकटम्। कति नाम तरुण्यो जलभृतकलसा गृहं प्रत्यावर्तन्ते। तरुणीनां तासां वदन-मण्डलानि सावधानमेव निरीक्षामास भवतोषः। तासु च सुन्दर्य आसन्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

असुन्दर्योऽप्यनेका आसन् ; परं जगदम्बाया इव कुत्सितमेकमपि वदनं नैव प्रबभूवासौ सन्द्रष्टुम् ।

क्रमेण शकटं प्रान्तरं प्राप । तदानीमपि मानसं तस्य निर्भरमात्म-जयजनितसमुत्साहेन । तथाऽपि मनसा व्यचिन्तयत् : कामं मया प्रतिज्ञातं कुरूपा-पाणिपीडनम्, तथाऽपि एतादृशी चेद् विरूपा नाभविष्यत्, तथाऽपि कापि हानिर्नाभविष्यत् । यथा तथा वा भवतु, यदा तावद् 'रोचते मे कन्यका' इति उक्तं तदा किं वा फलमनेनाऽऽ-लोचितेन ।

एतदवस्थो भवतोषः समासादितवान् आगारम् । माताऽपृच्छत्, अपि रुचिता ते कन्यका वत्स ।

अथ किम् । रुचितैव ।

तर्हि सर्वं प्रबन्धं कुर्याम् ?

क्रियताम् ।

अस्मिन्नेव तर्हि मार्गशीर्ष-मासि भवतु ।

भवतु । इत्युक्त्वा भवतोषः स्थानान्तरं प्रस्थितः ।

माताऽपश्यत् पुत्रस्य मानसं भाराक्रान्तमिव । व्यचिन्तयच्च न खलु सुन्दरीं कन्यकां परिणेष्ये इति बह्वल्गत, इदानीं च सम्मत इति मन्ये पुत्रकस्य मे लज्जा सञ्जाता ।

भवतोषो रात्रौ किमपि नोपायुङ्क्ताभ्यवहार्यम्, उवाच च, बहु किलाशितं तेषां गृहे, अतो नोपजाता क्षुधेति । तदानीं च मानसात् तस्याऽऽत्मविजयजनितः प्रतिज्ञापूरणजनितश्च प्रोत्साहो विलीनप्राय एव ।

रात्रौ च शय्यायां निषण्णो यथा यथा व्यचिन्तयज् जगदम्बाया वदनकमलकं तथा तथा हृदयाभ्यन्तरं तस्य जडीभावमापद्यत । आसीच्च तस्य चेतसि, सा चेत् तथाविधा कुरूपा नाभविष्यत्, यदि वर्णस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्यामत्वेऽपि वदनमण्डलं श्रीसम्पन्नमभविष्यत्, र्तांह सम्यग्-भविष्यदिति ।

सोमवासरे शय्याया उत्थाय प्राभातिकबाष्पशकटेनैव कलिकातामसौ प्रस्थितः । माताऽवदत्, विवाहस्य दश दिनान्यवशिष्यन्ते । दिन-द्वितयात् पूर्वमेव गृहमागन्तव्यमिति ।

यावदसावट्टशूलं प्राप तावत् सतीर्थ्या अस्यापश्यन्, घनान्धकारं तस्य वदनमिति । भवतोषश्च प्रविश्य स्वकक्षमुपविष्टः ।

'ननु भवतोषमहोदय, का वार्त्ता' इति वदन्तः श्रीमन्तो रजनी-शरद्-राखाल-कुमुद-नृपेन्द्रमहोदयप्रभृतयः सम्प्राप्ताः । गृहागमनकाले सर्वमेव तेभ्यो निवेदितं भवतोषेण । 'का वार्त्ता, भवतोषमहोदय ?'

भवतोषः कथञ्चित् क्लिष्टं विहस्यावदत्, वार्त्ता तावच्छुभा इति ।

ततश्च सर्वे प्रश्नपूर्वकं कन्यकाया रूपगुणवयःप्रभृतिकं सर्वमेव विज्ञातवन्तः । सपदि च शरन्महोदयः पृष्टवान्, किं तावत् कन्यकाया नामधयम् ?

भवतोषो नामधेयमुक्तवान् ।

तच्छ्रवणेन सर्वेषां वदनसरोरुहेषु मन्दस्मितेन कृतं पदम् । केवलं नृपेन्द्रमहोदयेन विगतधैर्येणोच्चैर्विहसितम्, हा—हा—हा—ज-ग-द-म्बा—ही-ही—ही—शोभनं तावन्नाम !

शरन्महोदयेनोक्तम्, नृपेन्द्रमहोदय, किमेतदेवं हासकरम् ! किमिति हसति भवान् ?

नहि नहि, नाहं हसामि । ही-ही-ही—कथं वा हसिष्यामि ? ही-ही—

रजनीमहोदयेनोक्तम्, किमत्राशोभनं नाम्नि ? पौराणिकं नाम । अपि नाम इदानीन्तन-ज्योत्स्नामयी-सरसीबाला-तडिल्लता-मणि-मालिनी-प्रभृतीन्येव नामानि शोभनानि ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तच्छ्रुत्वा भवतोषो गम्भीरं शिरः सञ्चालितवान्। विषयेष्वेषु तस्य पूर्वस्य समुत्साहस्याभाव एवाद्य संलक्ष्यते।

विवाहस्य नव दिनान्यवशिष्यन्ते। अमूनि नव दिनानि भवतोषस्य कथं व्यत्यवर्तन्त तत् स एवाजानात्, अट्टशूलस्था जना अपि किञ्चिद् व्यजानन्। यथा यथा चेतसा संस्मरति जगदम्बां भवतोषः, तथा तथा पर्यपूर्यत तमसा तस्य हृदयाभ्यन्तरम्। भवतोषो महाविद्यालयं गच्छति, अध्यापकानां व्याख्यानानि पुनर्लेशतोऽपि तस्य कर्णपथं न प्रविशन्ति। तस्य क्षुधा प्रथितैवासीच्छात्रावासे, इदानीं तस्य पात्रे अन्नव्यञ्जन-मर्धतोऽप्यधिकमवशिष्यते। न केनापि साकं विदधाति हास्यालापं भवतोषः, सदैव शून्यमनस्कस्तिष्ठति। छात्रावासस्थाः सर्वे तमवदन्, भवतोषमहोदय, प्रणयामयस्य सर्वाण्येव लक्षणानि भवति प्रकाश-मासादयन्तीति।

रात्रौ शय्यायां शयानस्य भवतोषस्य न खलु पूर्ववदनायासं निद्रायाति नेत्रे, केवलं पार्श्वपरिवर्तनं विदधात्यसौ। यदा च निद्रोपनमति तदा केवलं विभीषिकामयान् स्वप्नान् पश्यति। एकदाऽपश्यत् स्वप्न जगदम्बया परिगृहीतः कालीविग्रहः। तस्याश्च स्वल्पा रसना या किल पूर्वं भवतोषेण प्रत्यक्षीकृता तस्याः अर्धं विनिर्गतम्। तस्याश्च अभिनवं हस्तद्वितयं प्रादुर्भूतम्। पाणावेकस्मिन् रक्तविलिप्तः खड्गः, अपरस्मिंश्च छिन्नं मुण्डं लम्बमानं वर्तते। मुण्डञ्च भवतोषस्यव प्रतिभाति। अपरेद्युश्चापश्यत् स्वप्ने, कण्टकाकीर्णे कस्मिंश्चिदरण्ये पथिभ्रान्तोऽसौ यावद् आकुलहृदयेन पन्थानमन्विष्यति तावत् कश्चन महिषस्तमभ्यधावत्। महिषस्य परिधानीयमासीन्नीलवर्णमुम्बयी-शाटिका, तस्य च मस्तकस्य स्थाने जगदम्बाया एव वदनं विराजते स्म, ततश्च शृङ्गद्वितयं विनिर्गतम्। इति।

यावच्च विवाहस्य दिनद्वितयमात्रमवशिष्यते तावदचिन्तयद्भवतोषः,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मात्रे पत्रं विलिख्य निरोद्धव्यो विवाह इति। तस्मिंश्चाहनि अस्वास्थ्यापदेशेनासौ नैवागच्छत् पाठशालाम्। समग्रमेव दिवसमेककौ गृहेऽवस्थाय मात्रे एकैकशो बहूनि पत्राण्यलिखत्, लिखित्वा च चिच्छेद। यदा च च्छात्रावासस्थाः सर्वे श्रोष्यन्ति भग्ना विवाहस्य वार्त्ता तदा किं वा ते वक्ष्यन्ति? कथं वा सोढव्यानि तेषां धिक्कृतानि उपहासा उल्लुण्ठनानि च?

अहनि च तस्मिन् रात्रौ शयानोऽसौ व्यचिन्तयत् कस्मा अपि किमप्यनिवेद्य पश्चिमदिग्भागे पलायिष्ये इति। उत्थाय दीपिकां प्रज्वाल्य शकटनिर्गमनसूचिम् अपश्यत्। परं प्रभाते पुनरेव परिवर्त्तितं तदीयं मतम्। धिक् धिक्! अन्ततश्च एवंभूतव्यतिकरनिकरादूर्ध्वं किं भीरुसंज्ञा स्वीकरणीया तेन? न खलु तत् कदापि भविष्यति। प्रतिज्ञा तेन पालयिष्यत एव, तत ऊर्ध्वं यद्वा भवतु।

निर्दिष्टेऽहनि स गृहमागच्छत्। यथाकालं च विवाहमण्डपं सम्प्राप्तवान्। तत्रत्येन च जनसमागमेनाऽऽलोकनिकरेण कोलाहलेन च दशभ्यो दिनेभ्यः परमद्य तस्य चित्तं प्रशान्तप्रायं सञ्जातम्। समापन्ने हि युद्धावसरे भीरुतमोऽपि योधो विस्मरत्येव भयम्।

प्रारब्धो विवाहः। तदानीं च निर्विकारमेव चित्तं भवतोषस्य। नासीत् तदानीं तस्य मानसे भीतिर्वा चिन्ता वा हर्षो वा नैराश्यं वा।

क्रमेण च समागतः "स्त्री-आचार"स्यावसरः। शुभदृष्ट्यर्थमास्तीर्णं वरवध्वोर्मस्तकोपरि वस्त्रावरणम्। कन्यां प्रति च विनिक्षिप्य दृष्टिं विसिष्मिये भवतोषः। न खल्वियं तस्य दशदिवसविभीषिका निद्रादुःस्वप्नो जगदम्बा। इयं खलु सा परमरमणीया वाला यया किल रजतकरङ्केण ताम्बूलानि समानीतानि।

पुष्पशय्यानिशायां विफलतां गतेषु नववधूसंलापप्रयासेषु भवतोषेण विचिन्तितः कश्चनाभ्युपायः। श्रुत खलु तेन या किल नववधूरुपाय-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शतेनापि न संलपति पत्या साऽपि स्वजननिन्दां श्रुत्वा तदात्व एव विप्रतिपद्यते। अत एवोक्तं भवतोषेण किमिति मात्रा ते विप्रलब्धोऽहम् ? इति।

तदा चोवाच पुलिना, अहं सुन्दरीति त्वं किल नैवैच्छो मामुद्वोढुम्। इदानीं लब्धं तस्य फलम्।

न खल्वेतावता कालेनालमासीद् भवतोषः प्रहेलिकामिमां समाधातुम्। अत एवापृच्छत्, का सा मया दृष्टा ?

सा हि पल्लीस्थतैलिककन्या। लब्धमनुरूपं फलम् !

क्रमेण चाऽऽगतस्तथाविधः समयो यदा भवतोषेण पत्रागमनकालात् पूर्वमेव छात्रावासस्य द्वाराद् बहिरवस्थाय पत्रवाहकः साक्षात् कर्तुमारब्धः।

ऋग्वेदभाष्यविमर्शः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

सहृदयाः, कस्य वा न विदितं सारस्वतसूक्तगतः सुप्रसिद्धो मन्त्रः—

अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवुः।
आदघ्नास उपकक्षास उ त्वे ह्रदा इव स्नात्वा उ त्वे ददृश्रे ॥

[ऋ० सं० १०।७१।७] इति। अस्य सायणभाष्यं पुण्यपत्तनपुस्तके माक्समुल्लरमनुसृत्येत्थं मुद्रितम्—

"अक्षण्वन्तः अक्षिमन्तः। 'छन्दस्यपि दृश्यते' इत्यक्षिशब्दादनङ्। 'अनो नुट्' इति नुट्। अनेन दृश्यते सर्वमित्यक्षि। यद्वा। तैजसत्वात् अन्येभ्योऽङ्गेभ्यो व्यक्ततरम्। तथा च श्रूयते—'तस्मादेते व्यक्ततरे इव' इति। तादृशाक्षियुक्ताः कर्णवन्तः। कर्णौ निकृत्तद्वारः। गर्भावस्थायामेव केनापि निर्मितबिल इत्यर्थः। यद्वा शरीरस्य शिरसो वोर्ध्वं गते उच्चैः स्थिते। कर्णविलक्षणाकाशवन्तः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथा चाम्नायते—'ऋच्छन्ती इव खे उदगन्ताम्' इति । तादृशाः सखायः। समानं ख्यानं ज्ञानं येषाम् इति सखायः। **तेषु वाक्येषु बाह्येष्विन्द्रियेषु** समानज्ञाना इत्यर्थः। ते मनोजवेषु मनसा गम्यन्ते ज्ञायन्त इति मनोजवाः प्रज्ञाद्याः। तेषु असमाः अतुल्याः बभूवुः भवन्ति। तेषु मध्ये केचित् आदघ्नासः। आस्यशब्दस्य पृषोदरादित्वादाकारादेशः। आस्यदघ्ना आस्यप्रमाणोदका ह्रदा इवेति मध्यमप्रज्ञानाह। अथ त्वे एके। सर्वनामत्वाज्जसः शीभावः। उपकक्षासः। कक्षसमीपप्रमाणोदका ह्रदा इव। अल्पोदका इत्यर्थः। अनेनाल्पप्रज्ञानाह। तथा त्वे एके स्नात्वाः। स्नातेः कृत्यार्थे त्वन् प्रत्ययः (पा. सू. ३. ४. १४)। स च 'अर्हे कृत्यतृचश्च' (पा. सू. ३.३. १६९) इत्यहार्थे च भवति। स्नानार्हा अक्षोभ्योदकाः ह्रदा इव ददृश्रे दृश्यन्ते। अनेन महाप्रज्ञानाह। उः पूरणः। 'अक्षिमन्तः कर्णवन्तः सखायोऽक्षि चष्टेः' (निरु० १. ९.) इत्यादिकं निरुक्तमत्र द्रष्टव्यम्।" इति।

Max Müller-मुद्रिते पुस्तके वा पुण्यपत्तनमुद्रिते पुस्तके वास्य पाठान्तराणि नैवोपलभ्यन्त इति महदिदं विषादस्थानमस्माकम्। प्रथमतस्तावत् कर्णशब्दव्याख्याप्रसङ्गेन यदुक्तम् "कर्णः . . यद्वा शरीरस्य शिरसो वोर्ध्वं गते उच्चैः स्थिते। कर्णविलक्षणाकाशवन्तः।" इति, अतः को वार्थः प्रतीयते ? अत्र "शरीरस्य शिरसो वोर्ध्वं गतः उच्चैः स्थितः। **तद्वन्तः कर्णबिललक्षणाकाशवन्तः**" इति पाठः कल्पनीय इति प्रतिभाति। मुद्रितायां महेश्वरविरचितनिरुक्तभाष्यटीकायां दृश्यते—

"कर्णः कृन्ततेः' कृती छेदने इत्यस्य। स हि निकृत्तद्वारः छिन्नद्वारो गर्भावस्थायामेव विध्वेव(१) शिरः केनापि कृतबिल इत्यर्थः। ...

(१) विदितमेवैतत् प्रायेण संस्कृतज्ञानां यन्मुद्रितायां महेश्वरकृतनिरुक्तभाष्यटीकायां सहस्रशः प्रमादा वर्तन्त इति। अत्रान्यत्र चास्मिन् ग्रन्थे 'विध्वेव' इति प्रामादिकम्, 'विद्ध्वे' इति पठनीयम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथाहि ब्राह्मणे विज्ञायते कर्णौ प्रकृत्येदमाम्नायते—'ऋच्छन्तीव(१) ख उदगन्ताम्' इति । अत्रर्च्छतेर्गत्यर्थस्य शत्रन्तस्य नपुंसके प्रथमाद्विवचनस्य 'औङ आपः, नपुंसकाच्च' इति शीभावे कृते नपुंसकस्यात्(२) 'छीनद्योर्नुम्' इति नुमि च कृते(३) ऋच्छन्तीति-रूपम् । खे इत्यपि नपुंसके प्रथमाद्विवचनम्, गच्छन्तीव(४) खे आकाशे कर्णबिललक्षण उदगन्तामूर्ध्वं शरीरस्य शिरसो वा गतः उच्चैः स्थित इत्यर्थः(५)। एवमत्र(६) ऋच्छन्तीवतृच्छत्यर्थेन कर्णयोः सम्बन्धदर्शनादृच्छतेः 'नपुंसकाच्च' इति शीभावे च कर्ण इति विज्ञायते । ये तु 'ऋच्छन्तीव खे उदगन्ताम्' इत्येतं पाठमाश्रित्यास्येममर्थं व्याचक्षते—ऋच्छन्तीवेतौ कर्णौ प्रति खे व्यक्ताः सन्तः शब्दा एव तावपि(७) चोदगन्तां

---

(१) यद्यपि हस्तलिखितेषु निरुक्तग्रन्थेषु "ऋच्छन्तीव" इति पाठ उपलभ्यते, तथापि 'ऋच्छन्ती इव' इत्येव महेश्वरस्य सम्मतः । अत एव "ऋच्छन्ती इव खे उदगन्ताम्" इत्येवात्र पठनीयम् । अत्रत्ये महेश्वरानुसारिणि सायणभाष्येऽपि 'ऋच्छन्ती इव' इति पाठः ।

(२) "वा नपुंसकस्य" [७।१।७] इति "आच्छीनद्योर्नुम्" [७।१।८] इति च पाणिनीये सूत्रे । 'छीनद्योर्नुम्' इत्याकारकं सूत्रं नास्त्येव । अत एव "नपुंसकस्यात् 'छीनद्योर्नुम्' " इत्यत्र "वा न पुंसकस्याच्छीनद्योर्नुम्" इति पठनीयम् ।

(३) 'ऋच्छन्तीति' इत्यत्र "ऋच्छन्ती इति" इति पाठे सम्यगर्थावबोधः स्यात् ।

(४) "गच्छन्तीव" इत्यत्र गच्छन्ती-पदस्य प्रगृह्यत्वं स्फुटमेव, अत एव 'गच्छन्ती इव' इति पठनीयम् ।

(५) खे इति नपुंसकद्विवचनान्तं पदम् इति व्याख्याकृतो मतम् । अत एव "शिरसो वा गते उच्चैः स्थिते" इत्यर्थः इति प्रकृतिभावेन पाठ आवश्यकः ।

(६) "ऋच्छन्ति इव . . ." इति पठनीयम् ।

(७) "शब्दाः । एतावपि" इति पठनीयम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्युद्गच्छत इव ग्रहणाय तान् शब्दानिति तेषामृच्छन्तीत्यर्थं प्रति शब्दानामिह कर्तृत्ववचनात् कर्णयोस्तेनासम्बन्धत्वादृच्छतेः कर्णं इत्यस्यार्थस्य दर्शनमेवैतज् ज्ञायते(१)। खे-शब्दस्य च सप्तम्येकवचनान्तत्वेन प्रगृह्यत्वाभावात् 'खे उदगन्ताम्' इति प्रकृतिभावेन पाठो नोपपद्यते, ख उदगन्तामिति स्यात्। अतः पूर्व एव पाठोऽर्थश्च। इति।

प्राचीनतरायां दुर्गाचार्यवृत्तौ च दृश्यते—अक्षण्वन्तः अक्षिसंयुक्ताः। कर्णवन्तः कर्णसंयुक्ताः। एवमपि समानेन्द्रियाः, समानपृष्ठोदरपाणिपादाः सन्तः। अपि च सखायः समानख्यानाः, सर्वे मनुष्याख्याः। अथवा समानेषु शास्त्रेषु कृतश्रमाः। वैयाकरणा वैयाकरणानामेव समानख्याना नैरुक्ता एव नैरुक्तानाम्। मनोजवेषु मनोगम्येष्वर्थेषु असमा बभूवुः। केचिदूहापोहनधारणवक्तृत्वसमर्थाः, केचिदमेधसः। कथमसाम्यमिति दृष्टान्तेन प्रतिपादयति—आदघ्नास उपकक्षास उ त्वे ह्रदा इव। आदघ्ना एव आदघ्नास आस्यदघ्नह्रदपरिमाणाः केचित् प्रज्ञया। उपकक्षासः कक्षसन्निकृष्टदेशतुल्योदका इव ह्रदाः। एके प्रज्ञया ह्रदाः स्नात्वाः स्नानार्हा अक्षोभ्या अपरिमेयप्रज्ञानाः। ददृश्रे ददृशिरे दृश्यन्त इति समस्तार्थः। . . . ऋच्छन्तीवैतौ कर्णौ खेऽभिव्यक्ताः सन्तः शब्दाः। एतावपि चोदगन्तां प्रत्युद्गच्छत इव शब्दग्रहणाय। विचार्यमाणे ज्ञायते खे कर्णाविति। इति।

सायणभाष्ये "तेषु वाक्येषु बाह्येष्विन्द्रियेषु समानज्ञाना इत्यर्थः" इत्यपि विस्पष्टमेव प्रामादिकम्। अत्र दुर्गाचार्य्यवृत्तौ दृश्यते—"समानेन्द्रियाः समानपृष्ठोदरपाणिपादाः सन्तः। अपि च सखायः समानख्यानाः सर्वे मनुष्यादयः। अथवा समानेषु शास्त्रेषु

(१) 'दर्शनमेवैतज्ज्ञायते' इत्यत्र "दर्शनमवैतद्धीयते" इति पठनीयमिति प्रतिभाति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृतश्रमाः। वैयाकरणा वैयाकरणानामेव समानख्यानाः नैरुक्ता एव नैरुक्तानाम्" इति। मुद्रितायां महेश्वरटीकायां दृश्यते—"तुल्येषु वाक्येषु बाह्येष्विन्द्रियेष्वागमिके च व्याकरणादिज्ञाने इत्यर्थः" इति। एकस्मिंश्च हस्तलिखिते पुस्तके 'वाक्येषु' इति नास्ति—"तुल्येषु बाह्येष्विन्द्रियेष्वागमिके च व्याकरणादिज्ञाने इत्येव पाठः" उपलभ्यते। एतद्द्वितयपर्यालोचनेन "तेषु तेषु शास्त्रेषु बाह्येष्विन्द्रियार्थेषु च समानज्ञाना इत्यर्थः" इत्यत्र पारमार्थिकः पाठ इति प्रतिभाति।

सायणभाष्ये दृश्यते—मनोजवेषु मनसा गम्यन्ते ज्ञायन्त इति मनोजवाः **प्रज्ञाद्याः** इति। दुर्गवृत्तौ वर्तते—मनोगम्येष्वर्थेष्विति। महेश्वरटीकायां दृश्यते—"मनसा ज्ञायन्ते गम्यन्ते ये ते मनोजवाः प्रज्ञागम्या अर्थास्तेषु" इति।

अत एव सायणाचार्येणापि "प्रज्ञागम्या अर्थाः" इति विलिखितमिति प्रतिभाति।

'स च "अर्हे कृत्यतृचश्च" इत्यर्हार्थे च भवति।' अत्रान्तिमस्य चकारस्यावकरत्वं स्फुटमेव, अत एव तस्य निष्कासनमेवोचितमिति प्रतिभाति।

प्रसङ्गक्रमेणापरमपि किञ्चिदुच्यते। सायणभाष्येष्वन्तरान्तरा 'तेषु मध्ये' इति पदद्वितयसमष्टिरुपलभ्यते, सा च "तेषां मध्ये" इत्यस्य "तेषु" इत्यस्य च सङ्करेण (contamination) समुत्पन्नेति प्रतिभाति।

आदघ्नास इति पदं महर्षिणा यास्केन आस्यदघ्नाः इत्यनेन व्याख्यातम्। अस्य पुनः प्रकृतिः प्राचीनतरेण टीकाकारेण दुर्गाचार्येण नैव प्रदर्शिता। महेश्वरेणोक्तम्—छान्दसत्वादास्यशब्दस्य स्यशब्दलोपः। गतानुगतिकतया सायणाचार्येणापि विलिखितम्—"आस्यशब्दस्य पृषोदरादित्वादाकारादेशः" इति। वस्तुतस्तु वेदे आस्यसमानार्थकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आस्-शब्दोऽप्युपलभ्यते*। लाटिन-भाषायामप्यस्य ज्ञातिः ओस्-शब्दो जागर्ति। शतपथब्राह्मणे पानपात्रार्थे आस्पात्रशब्दः समुपलभ्यते। अत एवात एवास्शब्दाद् दघ्नच्प्रत्ययेन आदघ्न-शब्दस्य निष्पत्तिरवश्यमेवाभ्युपगन्तव्या।

अमरकोषव्याख्याविमर्शः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

प्रवीणे निपुणाभिज्ञविज्ञनिष्णातशिक्षिताः।
वैज्ञानिकः कृतमुखः कृती कुशल इत्यपि ॥३।१।४

इत्यमरकारिकाया व्याख्याने भानुजिदीक्षितेनोक्तम्—विज्ञानं बुद्धिः। "विज्ञानं यज्ञं तनुते" इति श्रुतेः। विज्ञाने नियुक्तः। 'तत्र नियुक्तः' [४।४।६९] इति ठक्। यद्वा विज्ञानेन जयति। 'तेन दीव्यति—' [४।४।२] इति ठक्। यत्तु 'विज्ञानं नैपुण्यं तेन व्यवहरति। "तेन दीव्यति—" [४।४।२] इत्यादिना ठक्' इत्यभाणि मुकुटेन, तन्न, उक्तसूत्रे व्यवहरतीत्यस्यानुपादानात्। "कठिनान्त—" [४।४।७२] इति सूत्रेऽर्थोपादानेऽपि विज्ञानस्यानुपादानात्। इति।

एतत्तु न समीचीनतया प्रतिभाति। तेन "दीव्यति खनति जयति जितम्" इति सूत्रे दीव्यतिपदमुपात्तम्। तच्च दैवादिकदिव्धातुनिष्पन्नमिति निर्विवादम्। धातुपाठे च "दिवु क्रीड़ाविजिगीषा**व्यवहार**द्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु" इति पठितम्। अत्र

---

* "Even though the stem *ās-ya* 'mouth' is inflected throughout, the alternative stems of weak cases *ās-* and *āsan-* are preferred: *ā-daghna-* reaching to the mouth ; *āsanniṣu-* having arrows in the mouth. Macdonell, *Vedic Grammar*, p. 146.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विस्पष्टमेव व्यवहारस्योपादानात् तेन व्यवहरतीत्यर्थप्रदर्शनमात्रम्, तेन दीव्यतीत्यनेनैव ठक् इति मुकुटस्याशयः इति सर्वमवदातम्।

पाणिनिसूत्राणां पाठभेदाः

[श्रीरामशङ्कर-भट्टाचार्यः]

दृश्यन्ते खलु बहवः पाठभेदाः पाणिनीयसूत्रेषु। पाठभेदेन अर्थभेदः, ततश्च प्रयोगभेदोऽपि स्यात् इति कृत्वा पाठभेदविषये किमपि विवरणं दीयते।

कस्मात् कालादारभ्य अष्टिकासूत्रेषु पाठभेदः समजनि इति तु कार्त्स्न्येन निश्चितं वक्तुं न शक्यते, परन्तु 'उभयथाऽपि शिष्या आचार्येण पाठिताः' इत्येवंविधानि व्याख्यातृवचांसि (१) समालोक्येदमनुमीयते यत् आचार्यकालेऽपि पाठभेदः सम्बभूव। 'एक एव आचार्यः कथमुभयथा पाठयितुं समर्थः?' इत्येतादृशी शङ्काऽत्र जागर्ति, यस्याः समाधानं कर्तुं विद्वांस एव प्रभवन्ति। (२)

किञ्च यस्य सूत्रस्य नाम्ना निर्देशः श्लोकवार्त्तिककारेण कृतः, तस्यापि पाठभेदो जातः। अस्ति श्लोकवार्त्तिकम् 'आकर्षात् पर्पादिभस्त्रादिभ्यः कुसीदसूत्राच्च . . .' (४।४।९ सूत्रे) येनेदं गम्यते यत् 'आकर्षात् ष्ठल्' (४।४।९) इत्येव सूत्रं भवितुमर्हति। परन्तु, अस्य सूत्रस्य व्याख्याने उक्तम् 'आकषात् इति पाठान्तरम्'। (३) यदि श्लोकवार्त्तिककारः 'आकषात्—' इत्येवं सूत्रमपठिष्यत्, तर्हि

---

(१) दृश्यतां सीरदेव-परिभाषावृत्तिः पृ ५७, २।१।६७- सूत्रीयन्यासग्रन्थश्च।

(२) क्वचिच्च युक्तायुक्तविचारं तन्निर्णयं च व्याख्यातारो दर्शयन्त्येव, दृश्यतां कैयटटीका 'विरामोऽवसानम्'-(१।४।१०९)-सूत्रीया।

(३) सिद्धान्तकौमुदी दृश्यताम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्लोकवार्त्तिकेऽपि तथैवास्थापयिष्यत तेन—इत्यप्यभ्युपेयम्, परन्तु श्लोकवार्त्तिके यदि 'आकषाद्' इति पठ्यते तर्हि छन्दोभङ्गप्रसङ्गो भवति। अस्माभिर्न ज्ञायते यत् आचार्येण सुस्पष्टं निर्दिष्टेऽपि कथं पाठभेदकल्पनस्यावसरो जातः। (१)

श्लोकवार्त्तिककारात् पश्चात् माथुर-कुणि-प्रभृतयो बहवो वृत्तिग्रन्थकर्तारो बभूवुः, येऽपि सूत्रपाठभेदकरणे कारणतां भजन्ते। लभ्यन्ते पाठान्तराणि यानि वृत्तिकारैः स्वीकृतानि, खण्डितानि च भाष्यकारेण। यथा 'एतदोऽन्' (५।३।५) सूत्रे कैयटेनोक्तम्—'इह केचिदशं पठन्ति केचिदनम्'। कैयटात् प्राचीनतरस्य कस्यचिद् वृत्तिकारस्यायमभिप्रेतः पाठ आसीत्।

एतेनेदं गम्यते यदतिप्राचीनकालादेव सूत्रपाठेषु भेदाः सञ्जाताः।

'उपसर्गादनोत्परः' (८।४।२८) इति सूत्रे दोषं दृष्ट्वा भाष्यकृता नवीनो न्यासः कृतः 'उपसर्गाद् बहुलम्' इति। ततश्च अर्वाचीना व्याख्याकाराः 'उपसर्गाद् बहुलम्' इत्येव सूत्रं पठन्ति। (२)

'कृत्याः' (३।१।९५) इति सूत्रस्थाने काशिकायाम् 'कृत्याः प्राङ् ण्वुलः' इत्युक्तम्, 'कृत्यसंज्ञायां प्राङ् ण्वुल्वचनं कर्तव्यम्' इति वार्त्तिकानुरोधेन। यदि मूलग्रन्थे क्वचित् अस्पष्टशब्दः प्रयुक्तः, विद्वान् लिपिकरस्तत्पार्श्वे तदर्थबोधनाय स्पष्टार्थकशब्दं लिखति—इति

(१) भाष्यकारेण सुस्पष्टं कथितं यत् 'कृपो रो लः' इत्येव सूत्रमस्ति। परन्तु अर्वाचीनाः 'कृपे रो लः' इत्यपि पठन्ति—इत्यप्यत्रोदाहरणीयम्।

(२) योगविभागहेतुकमपि पाठान्तरं भवति—इति कथयितुं शक्यते, परन्तु वस्तुतो योगविभागेन पाठान्तरं न भवति—इत्येवं सूक्ष्मदृशा स्वीकरणीयम्। यथा योगविभागप्रकार आश्रितः, तथा एकसूत्रत्वप्रकारोऽपि समर्थितः, यथोक्तम्—'तन्त्रेण सूत्रद्वयस्योच्चारणादेकं सूत्रम्' (६।२।१४८ का)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यवहारः प्राचीनहस्तलिखितग्रन्थेषु । तच्च पदयोजनं प्रायशः परवर्तिकाले मूलग्रन्थपाठरूपेण गणितं भवति । अनयाऽपि रीत्याऽयं भेदः समजनि इत्यपि कथयितुं शक्यते ।

'निन्दहिंस..... विनाश...परिवादि...वुञ्' (३।२।१४६) इति सूत्रमवलोकनीयम् । अत्र विनाशीत्यपि पाठान्तरं दृश्यते । अत्र नशधातुर्पर्यन्तं इति सम्प्रदायः । तच्च व्याख्यानतोऽवगम्यते । परन्तु सूत्रार्थकरणे अत्यावश्यकत्वात्, व्याख्यानसाहाय्यग्रहणस्य अरुचिकरत्वाच्च केनापि विदुषा 'विनाश'-स्थाने 'विनाशी'ति व्यक्तं पठितम् ।

'ग्रामजनबन्धुभ्यस्तल्' (४।२।४३) इति सूत्रस्थाने काशिकाकारः अधीते 'ग्रामजनबन्धुसहायेभ्यस्तल्' इति । उक्तसूत्रेऽस्ति वार्त्तिकम् 'गजसहायाभ्याञ्च' इति । अत्र काशिकायां वार्त्तिकावयवो मिलितः । परन्तु किमर्थं सहायशब्द एव मिलितः, नतु गजशब्दोऽपि इति न ज्ञायते ।

'स्वाङ्गाच्चेतः' (६।३।४०) इति सूत्रे वार्त्तिकम्—'अमानिनीति वक्तव्यम्' इति । काशिकायां तु सूत्रवार्त्तिकमेलनसम्भूतं सूत्रं पठितमिति दृश्यते ।

क्वचिच्च सम्पूर्णं वार्त्तिकमपि सूत्ररूपेण पठ्यते यथा 'वृद्धस्य च पूजायाम्' इति वार्त्तिकं [४।१।१६३।३] खलु कैश्चित् सूत्ररूपेण पठितम् (द्रः ४।१।१६६ का) । 'द्वित्रिपूर्वादण् च' (५।१।३५।२) इति वार्त्तिकमेव, काशिकायां तु इदं सूत्ररूपेण न्यस्तम् । वार्त्तिकमेलनस्य उदाहरणान्तराण्यपि ५।४।५०, ४।४।१७, ६।१।१५० आदि सूत्रेषु दर्शनीयानि । (१)

(१) सूत्रवार्त्तिकयोर्मेलनं तु न्यायशास्त्रेऽपि दृष्टम् । योगसूत्रे तु भाष्यसूत्रयोरपि मेलनं सञ्जातम् यथा ३।२० सूत्रे, ४।१६ सूत्रे च ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"प्रज्ञाश्रद्धार्चाभ्यो णः" [५।२।१०१] इति सूत्रं "वृत्तेश्च" इति वार्तिकयोगेन काशिकायां "प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः" इति सञ्जातम् ।

'श्याद्व्धास्रुसंस्रु . . . ' (३।१।१४१) इति सूत्रे पाठान्तरमस्ति– 'आश्रुसंश्रु . . . ' इति

'व्रजयजोर्भावे क्यप्' (३।३।९८) इति सूत्रे 'वृजियजो . . .' इति पाठभेदोऽस्ति । 'न शसदद—' (६।४।१२६) इति सूत्रे 'शश' इत्यपि पाठान्तरम् ।

'शक्तौ हस्तिकपाटयोः' (३।२।५४) इति सूत्रे क्वचित् कवाटयो-रित्यपि पठ्यते ।

'श्रविष्ठाफल्गुन्यनुराधास्वाति . . . लुक्' (४।३।३४) इति सूत्रे स्वातिशब्दो ह्रस्वान्त इति कैयटहरदत्तौ, माधवमते तु दीर्घान्तः। 'कव्यपुरीषपुरीष्येषु ञ्युट्' (३।२।६५) इति सत्रे कव्यस्थाने हव्योऽपि पठ्यते । (अमरकोशे हव्यवाहनशब्दव्याख्यायां क्षीरस्वामिनाऽयं पाठः प्रदर्शितः)।

'आङोऽनुनासिकश्छन्दसि' (६।१।१२६) इत्यस्य पाठान्तरमस्ति 'आङोऽनुनासिको बहुलम्' इति (काशिका)।

मुकुटेनोक्तम्, 'सुप्रातसुश्वसुदिव ...' इति सूत्रेण (५।४।१२०) प्रोष्ठपदाः भद्रपदाश्च निपातिताः' इति । परन्तु अस्मिन् सूत्रे भद्रपद-शब्दोऽद्य न पठ्यते । क्षीरस्वामी धातुवृत्तिव्याख्याने "भ्राजभासभाषदीप . . . "(७।४।३) इति सूत्रस्थले 'भ्राजभासदीप . . . ' इति कथयति, भाषधातुं च त्यजति । तेन भाषधातुर्न स्मृत इत्येवात्र कथनं युक्तम्। एषु सर्वेषु स्थलेषु विस्मरणमेव कारणमाहोस्विद् अन्यत् किमपि— इति तु बहुश्रुतैर्गवेषणीयम् ॥

वयम् 'गुपूधूपविच्छि . . .' (३।१।२८) इत्येवं सूत्रं पठामः,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षीरस्वामिना धातुव्याख्याने 'गुपूधूपविच्छ . . . . . .' इत्येवं पठितम् ।

'अन्तर्घनो देश (३।३।७८) इत्यत्र 'अन्तर्घण' इति पाठान्तरमपि दृश्यते (१) ।

पाणिनि-कात्यायन-पतञ्जलयः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

"न कोपधायाः" [६।३।३७] इति सूत्रस्य लघुशब्देन्दुशेखरे सन्दृश्यते—सौत्रोपसंख्यानिक-पुंवत्त्वमात्रस्य निषेधोऽयम् । तेन विलेपिकाया धर्म्यम् वैलेपिकमित्यादौ "भस्याढे—" [६।३।३५।११] इति पुंवत्त्वं न । इष्टेस्तु न निषेधः । उत्तरनिषेधास्तु सौत्रविषयका इति बोध्यम् । तदुक्तं भाष्ये [६।३।३७]—"न कोपधायाः" इत्ययं योगः पुंवद्भावमात्रविषये, तत उत्तरमेवमाद्यनुक्रमणमाद्यस्य योगस्य विषये" इति । आद्यस्येति पाणिनीयस्येत्यर्थः । एतद्भाष्यप्रामाण्याद्वार्त्तिकानामपि सूत्रसम्मतत्वमित्याहुः । तदुक्तमभियुक्तैः—"सूत्रेष्वेव हि तत् सर्वं यद्वृत्तौ यच्च वार्तिके" इति । यत्तु "तृतीया च होः . . ." [२।३।३] इति सूत्रे—"किमर्थमिदम्, कर्मणि द्वितीयासिद्धेः, सुपां सुपो भवन्तीति तृतीयायाश्च सिद्धेः" इत्याशङ्क्य, "असत्येतस्मिन् सुपां सुपो भवन्तीति तृतीयार्थोऽयमारम्भः" इति भाष्य उक्तम् । तस्यैतस्मिन् बुद्धावसतीत्यर्थः । "न हि पाणिनेः सूत्रकरणकाले कात्यायन-

(१) 'दण्डादिभ्यो यत्' (५।१।६६) इति सूत्रस्थाने 'दण्डादिभ्यो यः' इति पाठान्तरमस्ति ।

तथैव कार्याधिक्यकरणहेतुकमपि पाठान्तरं जातम्, यथा 'गोतो णित्' (७।१।९०) इति सूत्रस्थले 'ओतो णित्' इति पाठान्तरम् । अत्र काशिकाकारेण यदुक्तं, तदेव पाठान्तरस्यापि कारणम् इति स्पष्टमेव ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वचसो भाव:" इति कैयटस्यापि तद्वचसो नियमेन बुद्धौ भाव इत्यर्थः। एवञ्चोपायान्तरपरमिदं सूत्रमिति तद्भावः। पाणिनिश्च तज्ज्ञानेऽप्यन्याभ्यां तस्य वाच्यत्वात् स्वयं वार्त्तिकभाष्योक्तार्थान्नोक्तवानिति साम्प्रदायिकाः। इति।

अत्र भैरवी व्याख्या। सूत्रसम्मतत्वं सूत्रकारसम्मतत्वम्। न च सूत्रकारसम्मतत्वे "स्त्रियाः पुंवत् . . ." [६।३।३४] इति सूत्रस्थसमानाधिकरणपदस्य ढभिन्नतद्धितबोधकतापि लक्षणया स्वीकार्या, एवं सति विलेपिकायां भव इत्यर्थे यो वैलेपिकशब्दस्तत्र स्त्रियाः पुंवत् इति सूत्रस्यैव प्राप्तिरिति आद्यस्य योगस्य विषये इति पक्षे प्रतिषेधो न प्राप्नोतीति भाष्यासङ्गतिरिति वाच्यम्। सूत्रकारसम्मतत्वमित्यनेन सूत्रघटकपदस्य लक्षणया वार्त्तिकोक्तार्थसंग्राहकत्वमिति नोच्यते, किन्तु सूत्रप्रणयनानन्तरं वार्त्तिकोक्तार्थस्य स्फूर्तावपि तदंशस्य वार्त्तिककारेण पूरयिष्यमाणत्वज्ञानेऽप्युपेक्षया तदकरणेन सूत्रशेषत्वं वार्त्तिकस्येति बोधनेन सूत्रकाराभिप्रायविषयत्वमित्येवोच्यते इति न विरोध इत्याशयात्।

From the statement of Patañjali that Pāṇini's rule *no kopadhāyāh* vi.3.37 will apply to all cases of "pum-vad-bhāva" prescribed either by the sūtras or by the Vārttikas, Nāges'a infers that the Vārttikas are also accepted by Pāṇini who flourished a few centuries before their author! In support of this view Nāges'a quotes from Kumārila: All that is found in the Vṛtti and all that is fcund in the Vārttikas are to be found in the sūtras. He goes on to state that the traditional view is that Pāṇini knew all that is mentioned in the Vārttikas and in the Mahābhāṣya, but he deliberately refrained from stating them in his rules, because they would be dealt with by others. In other words, he could

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

not be so selfish as to deprive Kātyāyana and Patañjali of their occupation !

Nāges'abhaṭṭa was uneasily conscious of the fact that this view appears to militate against what is implied in the Bhāṣya on "tṛtīyā ca hos'chandasi" and explicitly stated by Kaiyaṭa under ii.3.3. There Patañjali raises the objection that since the Vārttika "supāṃ supo bhavanti" lays down that any case-ending may be used for any other case-ending in the Vedas, why does Pāṇini prescribe the third case-ending in the case of the Acc. of the root *hu*, and meets it saying that in the absence of the Vārttika "supāṃ supo bhavanti" the rule is framed for the third case-ending (**असत्येतस्मिन् सुपां सुपो भवन्तीति तृतीयार्थोऽयमारम्भः**). Kaiyaṭa explains this saying that at the time when Pāṇini framed his rules the dicta of Kātyāyana did not exist. Nāges'a explains away the difficulty saying that "asati" in the Bhāṣya means merely 'not present in his mind' and 'abhāvaḥ' in "Kātyāyana-vacaso' bhāvaḥ" of Kaiyaṭa means 'not necessarily present in his mind'.

"भारविः सारविद्यः"

[श्रीमहालिंग-शास्त्री]

अथ प्रास्ताविकम्

वसानमिभचर्म मां धृतकपालमुत्पश्यत
भ्रमन्तमपि मादृशं जगति कञ्चनाकिञ्चनम् ।
कलाधरशिरोमणिं सपदि माऽवजानीत भो
इति प्रकटयन् शिवो विकटवेषभाक् पातु नः ॥१॥
तपोभिरुमया महेश्वर, कठोरधीरक्रमैः
पृथातनुभवेन च स्थिरधिया समाराधितः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रसादमकरोः पुरः खरपरीक्षयाऽरालितं
कुतोऽलसशिखामणेः स सुलभो भवान् मादृशः ॥२॥
तथापि कृतसङ्गतिः सदसि सद्भिराम्रेडयन्
गिरो हरकथोद्धुरा गिरिशवासरे भारवेः।
भवेयमहमुत्तरन् भवशुचः कृती हन्त भोः
समस्ति किल लाघवं सदृशदेशकालार्थिनः ॥३॥
प्रवर्तयति संकथाः प्रकटयत्युदारां रुचिं
गुणग्रहणकौतुकं धुरि विधाय नानन्द्यते।
अनल्पमुररीकरोत्यनुशयं जनेऽप्यल्पके
कथं न विदुषां सदस्तदपि विद्विषा नूयते ॥५॥
प्रमोहपटलच्छिदः कलितलक्ष्मलक्ष्मीपदा
विसारिरुचयः पृथग्जनविवेकनाडिन्धमाः।
गिरः कविषु भारवेरिव हि भारवेरुद्गताः
किरात इव दुर्ग्रहाः शुभयुजश्च पश्चादमूः ॥५॥
कालिदासकविकीर्तिकन्दलीमाददेऽनुपदमर्थगौरवात्।
भारविः कृतकिरातवाङ्मयोऽप्याकलय्य रघुमेव तं लघुम् ॥६॥
चक्षुर्युग्मं शारदाया ऋषी तौ
प्राणा बाणः काकली कालिदासः।
भावः साक्षाद्यः स भूतिर्भवाख्यो
माघः श्लाघा, भारविः पारगा धीः ॥७॥

जीवनचरितम्

अवन्तिसुन्दरी नाम्नो कथा दण्डिकृतिस्ततः।
भारवेर्जीवचरितं संगृह्य प्रतिपाद्यते ॥

भारवेः पूर्वपुरुषाः गुर्जरदेशे आनन्दपुरनाम्न्यग्रहारे न्यवसन्। ते कौशिकगोत्रव्यपदेशिनः। केनचित्कालेन ते च गोदावरीपरिसरे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नासिकक्षेत्रं समया अचलपुरमिति ख्यातं पुरमुपागच्छन्। तदामुष्यायणः कश्चिन्नारायणस्वामीत्यभवत्। तस्य दामोदरनामा सुतः समजनिष्ट।

"स मेधावी कविर्विद्वान् भारविः प्रभवी गिराम्॥"

"यः सर्वाङ्गमनोहरया सर्वज्ञया विदग्धया सर्वभाषाप्रवीणया प्रमाणयुक्तया ललितपदविन्यासमधुरया सस्नेहमस्वज्यत वाग्विलासिन्या॥"

तस्मिंश्च, पुण्यकर्मा नासिक्यभूपतेः सूनुर्विष्णुवर्धनाख्यः मित्रभावमभजत॥ एकदा च मृगयां गच्छता तेन राजपुत्रेण काननभुवं नीतो भारविः चिरपरिभ्रमणवशात् क्षुधार्तः निजोचितमभ्यवहारविशेषमलभमानो मृगयावसाने तत्प्रविद्धोपकल्पितमामिषं तेनैव सह अभोज्यमपि भवितव्यतामहिम्ना कष्टमभुङ्क्त। ततः स जातानुशयः पित्रोरन्तिकं त्रपापारवश्यादगछन् अस्य मलीमसस्य प्रक्षालनार्थं तीर्थयात्रामुररीचकार।

समाप्तपापशोधनः स "पल्लव"-दायादस्य पाश्चात्त्यगाङ्गेयकुलमहार्घजन्मभाजः अनन्वर्थनामधेयस्य दुर्विनीतनृपतेः आस्थानमलंचकार॥ (क्रमशः)

रसमञ्जरी

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

यादवः। वत्स, चिराद् दृष्टोऽसि। अपि कुशलं ते, कुशलं च सर्वस्य परिजनस्य ?

माधवः। आर्य, प्रणमामि। अद्य दशमो मासः कासरोगेणा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रान्तस्य मम पितृव्यस्य। अन्तरान्तरा बहवश्चिकित्सका आहूयन्ते, भूरिदर्शनीदानेन च तोष्यन्ते, रोगः पुनः पूर्ववदेवावतिष्ठते।

यादवः। वत्स, अस्त्यस्माकमायुर्वेदे च्यवनप्राशो लेहो यस्य प्राशनेन मुनिश्च्यवनः सद्य एव विहाय वृद्धभावमभजत्तारुण्यम्। किमित्यमोघमिदं भेषजं न प्रदीयते पितृव्याय ?

माधवः। आर्य ! अपि नाम सत्यमिदं यद् भेषजस्यास्य सेवनेन मुनिप्रवरोऽभिनवं यौवनमाससादेति।

यादवः। वत्स, मुनेर्नामैवात्र सुचिरं प्रमाणभूतं तिष्ठति। किं न जानासि वत्स प्राचीनतमस्य कालस्येतिवृत्तं शब्देषु सुगूढं विलीनं वर्तते इति अत एव शब्दाः fossil history इति व्यपदिष्टाष्ट्रेञ्च्-महोदयेन। ऋग्वेदे महर्षेर्नाम च्यवान इति श्रूयते, व्यपगते च वार्धके, यष्टेरवलम्बनार्थाया अपेक्षैव नासीदिति यष्ट्याकारस्याकारस्य परिहारेण तस्य नाम च्यवन इति सम्पन्नम्। अत एव वेदान्तरेष्वितिहासपुराणेषु च च्यवन एवोपलभ्यते। च्यवनप्राशेऽपि तदेव निर्यष्टिकं रूपमुपलभ्यते।

माधवः। अतीव विचित्रमिदम्। अस्माभिरनुवाकहतया बुद्ध्या कदापीदं न चिन्तितम्। अपरं किमप्युदाहरणं वर्तते वात्र ?

यादवः। बाढं वर्तते। केन वा न श्रुतं वङ्गीयेन प्राचीनतरस्य सम्राजो मन्धातुर्नाम ? पूर्वमसौ मन्धातासीत्, अत एव ऋग्वेदे तस्य रूपं मन्धातेति। क्रमेण च कालप्रभावेणायं स्थविरत्वमापन्नः, ततश्च तस्य यष्टेरपेक्षा सञ्जाता, अत एव विष्णुपुराणादिषु मान्धातेति रूपमुपलभ्यते, मामयं धास्यतीति निर्वचनं च प्रदर्श्यते।

माधवः। आर्य, अत्रभवतः प्रसादेन व्यपगतो मे संशयः। अवश्यमेव प्रदास्यामि च्यवनप्राशं पितृव्याय। इदानीमापृच्छेऽत्रभवन्तम्। (अभिवादनपुरःसरं प्रस्थितः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीः

महाभाष्यम्

अथ शब्दानुशासनम् ।

अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते । शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम् ।

केषां शब्दानाम् ? लौकिकानां वैदिकानां च । लौकिकास्तवद्— गौरश्वः पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इति । वैदिकाः खल्वपि— शन्नो देवीरभिष्टये* [अ० सं० १।६।१], इषे त्वोर्ज्जे त्वा [तै० सं० १।१।१।१], अग्निमीले पुरोहितम् [ऋ० सं० १।१।१], अग्न आयाहि वीतये [सा० सं० १।१।१] ।

[*Nature and scope of the science.*]

Now the science of words.

The word "now" (*atha*) is used in order to introduce the subject. We are to understand that the science entitled S'abdānus'āsana ("word-lore") is introduced.

The question now is—"of what sort of words ?"

The answer would be—"of words of both vulgar and Vedic speech ; the former such as *gauh* (cow), *as'vah* (horse), *puruṣah* (man), *hastī* (elephant), *s'akunih* (bird), *mṛgah* (deer), *Brāhmaṇah* etc. ; the latter such as *s'an no devīrabhiṣṭaye* (may the Goddesses be propitious to us for our help), *iṣe tvorje tvā* (thee for food, thee for strength), *agnim īle purohitam* (I worship Agni, the domestic priest), *agna āyāhi vītaye* (Come, Agni, to feast).

---

* This is the first stanza of the Paippalāda recension of the Atharvaveda. Thus Guṇaviṣṇu says in his Chāndogyamantra-bhāṣya (vi. 6. : 48) अथर्ववेदादिमन्त्रोऽयं पिप्पलाददृष्टो वरुणदैवतः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Some rightly regard अथ शब्दानुशासनम् as the first rule of Pāṇini. Thus Medhātithi says : पौरुषेयेष्वपि ग्रन्थेषु नैव सर्वेषु प्रयोजनाभिधानमाद्रियते। तथाहि भगवान् पाणिनिरनुक्त्वैव प्रयोजनम् अथ शब्दानुशासनमिति सूत्रसन्दर्भमारभते। Manu I. 1. Sṛṣṭidhara follows Medhātithi and says: व्याकरणशास्त्रमारभमाणो भगवान् पाणिनिमुनिः प्रयोजन-नामनी व्याचिख्यासुः प्रतिजानीते--अथ शब्दानुशासनमिति। Jinendrabuddhi says in his Nyāsa on iii. 4. 26 : शब्दानुशासनप्रस्तावादेव हि शब्दस्येति सिद्धे शब्दग्रहणं यत्र शब्दपरो निर्देशस्तत्र स्वं रूपं गृह्यते, नार्थपरनिर्देश इति ज्ञापनार्थं कृतम्।

अधिकारः प्रस्तावः प्रारम्भ इति यावत्। शब्दकौस्तुभः।

लोके भवा लौकिकाः। अध्यात्मादित्वाट् ठञ् [४।३।६० वा], यद्वा लोके विदिताः लौकिकाः। "तत्र विदितः" इति वर्त्तमाने "लोकसर्वलोकाट्ठञ्" [५।१।४४]। प्रातिशाख्येष्विव न वैदिकैकदेशमात्रमिह विषयः, न वा व्याकरणान्तरेष्विव च्छान्दसपरित्याग इति सूचयितुमुभयोरुपादानम्। S'. K. यद्यपि गाव्यादयोऽपि लोके विदितास्तथापि न ते सर्वलोकविदिताः प्रतिदेशं भिन्नत्वादपशब्दानाम्। लोकशब्दश्चायं सर्वस्मिल्लँोके वर्तते सङ्कोचकाभावात्। अतः सर्वलोकप्रसिद्धानां गवादीनाम्।

A witty versifier has composed the following samasyāpūraṇa stanza with अथ शब्दानुशासनम् :

गुर्वन्तिके ह्रिया पूर्वं संज्ञयार्थावबोधनम्।
करोति पत्युर्युवतिरथ शब्दानुशासनम्॥

अथ गौरित्यत्र कः शब्दः? किं यत्तत्सास्नालाङ्गूलककुदखुरविषाण्यर्थरूपं स शब्दः? नेत्याह—द्रव्यं नाम तत्। यत्तर्हि तदिङ्गितं चेष्टितं निमिषितमिति स शब्दः? नेत्याह—क्रिया नाम सा। यत्तर्हि तच्छुक्लो नीलः कपिलः कपोत इति स शब्दः? नेत्याह—गुणो नाम सः। यत्तर्हि तद्भिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नं सामान्यभूतं स शब्दः? नेत्याह—आकृतिर्नाम सा।

Now what is this "gauḥ"—what is the concept behind

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

this word ? Does it mean a thing possessed of dewlap, tail, hump, hoofs and horns ? No, says the writer, for that is merely the substance (the limbs making up the animal).

Is it then a bundle of various movements, indicating internal feeelings (such as licking the calf), or voluntary (such as walking), or reflex (such as the movements of the eyes, ears, etc.) ? No, replies the writer, for that is merely activity.

Is the word then some colour like white or dark, dun or spotted ? No, says the writer, for that is merely a quality,

Is it then something which constitutes the generality. which remains undifferentiated though the individuals might differ, which is not destroyed though the individuals might be destroyed ? (Is it the general concept of *gotva* or cowhood ?) No, replies the author, for that is merely the genus.

विषाणी ककुद्मान् प्रान्तेवालधिः सास्नावानिति गोत्वे दृष्टं लिङ्गम् । वैशेषिकसूत्रम् २।१।८।

अथ गौरित्यत्र कः शब्दः ? गकारौकारविसर्जनीया इति भगवानुपवर्षः । श्रोत्रग्रहणे ह्यर्थे लोके शब्दशब्दः प्रसिद्धः । ...अथ गौरित्यस्य शब्दस्य कोऽर्थः । सास्नादिविशिष्टाकृतिरिति ब्रूमः । शबर १।१।५

Kielhorn adopts the reading : यत्तर्हि तच्छुक्लो नीलः कृष्णः कपिलः कपोत इति स शब्दः and notes the variants यत्तर्हि शुक्लो (3 MSS.), यस्तर्हि (originally यत्तर्हि) शुक्लो नीलः कृष्णकपिलः (2 MSS.), यत्तर्हि शुक्लो नीलः कपोतः (2 MSS). Under i. 2. 64, however, Kielhorn reads : न हि गौरित्युक्ते व्यपवर्गो गम्यते शुक्ला नीला कपिला कपोतिकेति . . . न हि गौरित्युक्ते विशेषः प्रख्यायते—शुक्ला नीला कपिला कपोतिकेति where the only variant noticed is कपोता for कपोतिका. From this it would appear that the reading शुक्लः नीलः कपिलः कपोतः generally adopted in Indian editions is the correct reading. No doubt in other passages of the Mahābh ṣya we find different enumerations : तैलं भुक्तं घृतं भुक्तं शुक्लो नीलः कृष्णः कपोत इति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(ed. K. I. 411. 20), शुक्लो नीलः कृष्ण इति हिमवत्यपि भवति, वटकणिकामात्रेऽपि द्रव्ये (I, 184, 20; 316, 25). No variants are mentioned in these cases, but they do not refer to the cow. The following passage from the S'abara Bhāṣya (vii. 1. 2) supports the reading adopted in the text : तस्य च गोत्वसम्बन्धस्याविशेषात् सर्वगवीषु शुक्लनीलकपिलकपोतिकासु भवन्ति ।

Nāges'a explains the order of द्रव्य, क्रिया, गुण and जाति thus: द्रव्यस्य क्रियाद्याश्रयत्वात् पूर्वमुक्तिः। वैशेषिकसिद्धगुणानामपि संयोगविभागादीनां क्रियात्वं ध्वनयितुं गुणात् प्राक् क्रियोक्तिरिति ध्येयम् ।

Daṇḍin in his Kāvyādars'a also mentions क्रिया several times before गुण—

जातिक्रियागुणद्रव्यस्वभावाख्यानमीदृशम् २।१३
जातिक्रियागुणद्रव्यवाचिनैकत्रवर्तिना २।९७
गुणजातिक्रियादीनां यत्तु वैकल्यदर्शनम् २।३२३

इङ्गितम् अभिप्रायस्य सूचकः शरीरव्यापारः, चेष्टितं कायपरिस्पन्दः, निमिषितम् अक्षिव्यापारः Kai. Cf. VI. 1. 37 and VIII. 2. 3: इङ्गितेन चेष्टितेन निमिषितेन महता वा सूत्रप्रबन्धेनाचार्याणामभिप्रायो गम्यते । The intention of masters, is conveyed by gestures, movements, winking of the eyes or by the framing of big rules.

कस्तर्हि शब्दः ? येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः। अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते। तद् यथा—शब्दं कुरु, मा शब्दं कार्षीः, शब्दकार्ययं माणवकः इति ध्वनिं कुर्वन्नेवमुच्यते। तस्माद् ध्वनिः शब्दः ।

Then what is word ?

That is "word" which when uttered brings us a knowledge of the individuals possessing dewlap, tail, hump, hoofs and horns. Or, in other words, the sound which conventionally conveys a particular sense is popularly called a word. Thus one making a sound is spoken to and spoken

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

of as follows : Make a sound (i. e., more distinct sound), do not make any sound, this boy is making a sound. Hence it is sound that is word.

लोके व्यवहर्तृषु पदार्थबोधकत्वेन प्रसिद्धः श्रोत्रेन्द्रियग्राह्यत्वाद् वर्णरूपध्वनिसमूह एव शब्द इत्यर्थः ।

See S'ahara on i. 1. 5.

कानि पुनः शब्दानुशासनस्य प्रयोजनानि ? रक्षोहागमलघ्वसन्देहाः प्रयोजनम् ।

रक्षार्थं वेदानामध्येयं व्याकरणम् ।

लोपागमवर्णविकारज्ञो हि सम्यग् वेदान् परिपालयिष्यति ।

ऊहः खल्वपि—न सर्वैर्लिङ्गैर्न च सर्वाभिर्विभक्तिभिर्वेदे मन्त्रा निगदिताः । ते चावश्यं यज्ञगतेन पुरुषेण यथायथं विपरिणमयितव्याः । तान्नावैयाकरणः शक्नोति यथायथं विपरिणमयितुम् । तस्मादध्येयं व्याकरणम् ।

[*Utility of the Science.*]

What, again, are the uses of the science of S'abdānus'āsana ?

Preservation, Ūha, Scripture, Shortcut and Removal of doubts are the uses.

We should study grammar for the preservation of the Vedas, since one who is acquainted with Elision, Augment and Modification (of sounds) will alone (be able to) preserve the Vedas properly.

Modification (Ūha) also (is one of the uses of the science of Grammar). Mantras are not stated in the Vedas in all genders, nor in all cases. They must needs be duly modified by the person engaged in a sacrifice. A man who has not studied grammar cannot duly modify them, hence we should study Grammar.

प्रकृतावाम्नातस्य मन्त्रस्य विकृतौ समवेतार्थत्वाय तदुचितपदान्तर-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रक्षेपेण पाठ ऊहः। प्रकृतौ दर्शपूर्णमासेष्टौ "अग्नये त्वा जुष्टं निर्वपामि [प्रोक्षामि? वा० स० १।१३] इति मन्त्र आम्नातः। स च विकृतावैन्द्राग्नेष्टावतिदिष्टः। तत्र कर्मसमवेतार्थप्रकाशनायाग्निशब्दं परित्यज्य इन्द्राग्निभ्यां जुष्टम् इत्यूहनीयम्। स चोहो व्याकरणानभिज्ञेन कर्तुमशक्यः। तैत्तिरीयसंहितासायणभाष्यम्।

"रक्षोहा—" is in all probability a Vārttika. Patañjali generally uses the plural form प्रयोजनानि, while Kātyāyana uses the singular form प्रयोजनम्. Thus under i. i. 22 we find :

कानि पुनरस्य योगस्य प्रयोजनानि?

आदिवत्त्वे प्रयोजनं प्रत्ययङ्निदाद्युदात्तत्वे ।७।

Under i. i. 41 we find the Vārttika :

अव्ययीभावस्याव्ययत्वे प्रयोजनं लुग्मुखस्वरोपचाराः।

Under i. 2. 44 we find :

कानि पुनरस्य योगस्य प्रयोजनानि?

प्रयोजनं द्विगुप्राप्तापन्नालंपूर्वोपसर्गाः क्तार्थे।

Again under i. i. 4 we find that Patañjali after explaining the Vārttika क्ङिति प्रतिषेधे तन्निमित्तग्रहणमुपधारोरवीत्यर्थम्, शचङन्तस्यान्तरङ्गलक्षणत्वात् says : इमानि च भूयस्तन्निमित्तग्रहणस्य प्रयोजनानि।

Sāyaṇa also asserts that this is a Vārttika of Kātyāyana:

तस्यैतस्य व्याकरणस्य प्रयोजनविशेषो वररुचिना वार्त्तिके दर्शितः—रक्षोहागमलघ्वसन्देहाः प्रयोजनमिति। एतानि रक्षादीनि प्रयोजनानि प्रयोजनान्तराणि च महाभाष्ये पतञ्जलिना स्पष्टीकृतानि। ऋग्वेदभाष्योपोद्घातः।

कात्यायनोऽपि व्याकरणप्रयोजनान्युदाजहार—रक्षोहागमलध्वसन्देहाः प्रयोजनम्। तैत्तिरीयभाष्योपोद्घातः।

Mādhava would appear to be of a different opinion : तस्माद् व्याकरणशास्त्रस्य शब्दानुशासनं भवति साक्षात् प्रयोजनम्, पारम्पर्येण तु वेदरक्षादीनीति। अत एवोक्तं भगवता भाष्यकारेण—रक्षोहागमलघ्वसन्देहाः प्रयोजनम् इति। (सर्वदर्शनसंग्रहः, पृः २९५-६)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Bhaṭṭoji follows Mdhava "रक्षोहागमलघ्वसन्देहाः प्रयोजनम्" "अद्रुतायामसंहितम्" इति भाष्यवार्त्तिकप्रयोगात् ।" ७५८

Similarly Annaṁbhaṭṭa says भाष्ये प्रयोजनमिति प्रयोजनफलपराणां पञ्चानामपि प्रयोजनशब्दानां नानालिङ्गानाम् "नपुंसकमनपुंसकेन—" इत्येकशेषवद्भावविधानान्निर्देशः । (पृ: १२). Nāgeśabhaṭṭa also says: अथ पाणिनिसूत्रव्याख्यानभूतं वार्त्तिकमवतारयति—कथं पुनरिदं भगवतः पाणिनेराचार्यस्य लक्षणं प्रवृत्तम् इति । अत एवात्रैव पाणिनि-नामग्रहणम् । इतः पूर्वं तु सवार्त्तिकशास्त्रान्वाख्यानप्रयोजनविषयप्रदर्शनपरो भाष्यकारस्यैव ग्रन्थ इति बोध्यम् ।

The Rājalakṣmi says: सिद्धे शब्दार्थेत्यादिवार्त्तिकन्तु आदितश्चतुर्थं पञ्चमं वा वार्त्तिकम् । विषयप्रयोजननिरूपणानन्तरम् पाणिनीयशब्दानुशासनव्याख्यानस्य वार्त्तिककृत्कृतस्येत एव प्रवृत्तत्वान्मङ्गलार्थं सिद्धशब्दप्रयोगस्तत्रेति सर्वं समञ्जसम् । "शब्दानामनुशासनमिदानीं कर्त्तव्यम्" इत्युक्त्वा ततः पूर्वं पठितानाम् "अथ शब्दानुशासनम्" इत्यादिवार्त्तिकानां शब्दानुशासनबहिर्भूतत्वं च स्पष्टमेव भगवतोक्तम् । एवञ्चात्र कैयटहरदत्तनागेशादयः सर्वे एव भ्रान्ता एव ।

आगमः खल्वपि—"ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च" इति । प्रधानं च षट्स्वङ्गेषु व्याकरणम् । प्रधाने च कृतो यत्नः फलवान् भवति ।

लघ्वर्थं चाध्येयं व्याकरणम्—"ब्राह्मणेनावश्यं शब्दा ज्ञेयाः" इति । न चान्तरेण व्याकरणं लघुनोपायेन शब्दाः शक्या ज्ञातुम् ।

The sacred text also: A Brāhmaṇa shall read and understand the Veda with its six subsidiary studies without any motive of gain. And among the six subsidiary studies Grammar is the principal one, and effort directed towards the principal thing is crowned with success.

We should study grammar for the sake of facility also, for a Brāhmaṇa must needs learn the (correct) words, and without grammar it is not possible to learn words in an

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

easy way, i. e., Grammar is the shortest cut to the knowledge of words.

आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः ।
प्रधानं छन्दसामङ्गमाहुर्व्याकरणं बुधाः ॥ [वाक्यपदीये १।११]

तच्च लघ्वर्थम् K. II. 326². लघुशब्दो लाघवे वर्तते ।

लाघवं तु किमुच्यते बाल्यात् प्रभृति बहुषु वहत्स्वपि वत्सरेषु यन्नाधिगन्तुं शक्यते व्याकरणं स चेल्लघुरुपायः कोऽन्यस्ततो गुरुर्भविष्यति । न्यायमञ्जरी ।

यदि वा गौरवस्यैव लघुत्वमुपचर्यते ।
विपर्ययापदेशेन शरे कातरशब्दवत् ॥

लोकप्रसिद्धानामेव शब्दानामत्यन्तविषमधातुगणोणादिसूत्रादिभिरलौकिकसंज्ञापरिभाषानिबद्धप्रक्रियैरनवस्थितस्थापनाक्षेपसिद्धान्तविचारैः क्लेशेनान्तं गत्वा यथावस्थितानुवादमात्रमेव क्रियते, तत्रापि च उदाहरणव्यतिरिक्तेषु कस्यचिदेव लक्षणयोजनसामर्थ्यं दृश्यते । तेनात्यन्तगुरुः सन्नयमुपायः स्तुत्यर्थमेव लघुरित्युपचरितः । तन्त्रवार्त्तिकम् ।

It is absurd to speak of grammar as the simplest means of acquiring a knowledge of words, when it is common experience that even after years of patient labour one fails to master the science. One feels inclined to suspect that what the Vārttikakāra meant was *gaurava* or cumbrous means and has euphemistically used the word *lāghava* by what is known as विपरीत-लक्षणा !

असन्देहार्थं चाध्येयं व्याकरणम् । याज्ञिकाः पठन्ति—"स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेत" इति । तस्यां सन्देहः स्थूला चासौ पृषती च स्थूलपृषती, स्थूलानि पृषन्ति यस्याः सा स्थूलपृषतीति । तां नावैयाकरणः स्वरतोऽध्यवस्यति—यदि पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिः, अथ समासान्तोदात्तत्वं ततस्तत्पुरुष इति ।

We should study grammar for removal of doubts also Ritualists read : "A large-spotted heifer consecrated to Agni and Varuṇa shall be sacrificed ("sthūlapṛṣatīm Agni-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Vāruṇīm anaḍvāhīm ālabheta"). Regarding this text (tasyāṃ s'rutau) or regarding the heifer there arises the doubt whether "sthūlapṛṣatī" means 'large and at the same time spotted' or 'she whose spots are large'. One who has not studied Grammar cannot determine the true meaning of the text (or the true nature of the heifer) by means of the accent. Thus if the first member retains its own proper accent, then the compound is a Bahuvrīhi (vi. 2. 1); if, however, there is the oxytonisation of the compound then it is a Tatpuruṣa (vi. 1. 223)

We have not been able to trace the quotation to its source, but "sthūlapṛṣatī" occurs in the Vājasaneyī and Maitrāyaṇī Saṁhitās with the accent on the first member.

Similarly in Greek *litho-bo'los* 'throwing stones', but *litho'-bolos* 'pelted with stones'; *patrokto'nos* 'slayer of one's father', but *patro'ktonos* 'having one's father as one's slayer i, e., slain by one's father'

Cf. यदब्रवीत् स्वाहेन्द्रशत्रुर्वर्धस्वेति तस्मादस्येन्द्रः शत्रुरभवत्। तैत्तिरीय-संहिता। २।५।२। See p. 11

संप्रैष also may be mentioned in this connexion. Cf. Mahābhāṣya iv. 2. 2: : अथ यत् कायं हविः कथं तस्य संप्रैषः कर्त्तव्यः। यदि तावत् किमः कादेशः कस्मा अनुब्रूहीति भवितव्यम् अथ न किमः कायानुब्रूहीति। So even a knowledge of grammar sometimes fails to remove doubts.

इमानि च भूयः शब्दानुशासनस्य प्रयोजनानि—(१) तेऽसुराः। (२) दुष्टः शब्दः। (३) यदधीतम्। (४) यस्तु प्रयुङ्क्ते। (५)अविद्वांसः। (६) विभक्तिं कुर्वन्ति। (७) यो वा इमाम्। (८) चत्वारि। (९) उत त्वः। (१०) सक्तुमिव। (११) सारस्वतीम्। (१२) दशम्यां पुत्रस्य। (१३) सुदेवो असि वरुण इति।

These again, are the further uses of S'abdānus'āsana:

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

te' surāḥ (those demons), duṣṭaḥ s'abdaḥ (a corrupt word), yad adhītam (what has been read), yas tu prayuṅkte (he, however, who uses), avidvāṁsaḥ (the ignorant), vibhaktiṁ kurvanti (they add the case-ending), yo vā imām (he indeed who knows it), cātvāri (four), uta tvaḥ (and some), saktum iva (like coarsely formed meal), sārasvatīm (relating to Sarasvati), das'amyāṁ putrasya (of a son on the tenth day), sudevo asi Varuṇa (Thou art a gracious God, O Varuṇa).

"तेऽसुराः"। "तेऽसुरा हेलयो हेलय इति कुर्वन्तः पराबभूवुः। तस्माद्ब्राह्मणेन न म्लेच्छितवै नापभाषितवै, म्लेच्छो ह वा एष यदपशब्दः ॥" म्लेच्छा मा भूमेत्यध्येयं व्याकरणम्। तेऽसुराः।

"Te' surāḥ" (those demons): Those demons saying "he' lavaḥ" "he' lavaḥ" suffered defeat. So a Brāhmaṇa shall not speak indistinctly like a Mleccha or barbarian, shall not use words or expressions that are corrupt, for a corrupt word is a Mleccha or barbarian. We should read Grammar so that we may not become Mlecchas. "Te'stāḥur" is thus explained."

निन्दार्थवादेन "न म्लेच्छितवै" इति म्लेच्छनं निषिध्यते। अत्र केचिदाहुः— "हैहेप्रयोगे हैहयोः" [८।२।८५] इति प्लुते प्रकृतिभावे च कर्त्तव्ये तदकरणं म्लेच्छनमिति। पदद्विर्वचने कार्ये वाक्यद्विर्वचनं लत्वं च म्लेच्छनमित्यपरे। "न म्लेच्छितवै" इत्यस्य पर्यायो "नापभाषितवै" इति। "कृत्यार्थे—" [३।४।१४] इति तवै-प्रत्ययः। म्लेच्छ इति कर्मणि घञ्। कैयटः।

Cf. शतपथब्राह्मण ३।२।१।२३ : तेऽसुरा आत्तवचसो हेऽलव हेऽलव इति वदन्तः पराबभूवुः।

The Mlecchatva here evidently consists in the failure to pronounce *r* and *y* correctly. The change of *r* into *l* and *y* and *v* is not infrequent in Prakrit and Pāli. Thus Geiger says: Representation of *r* by *l* is very common in Pāli, and in Pkr. it is the rule for Māgadhī, although this substitution occurs sporadically also in other dialects. Thus *lujjati*=

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

rujyate, ludda=raudra. . . . Not infrequent is the alternation between *y* and *v*, e.g., *kasīva* for *kasīyī* §44, 46. Even in Sanskrit we find *lajjate* for *rajyate.*

In the S'atapatha Brāhmaṇa (xiii. 8. 1. 5) the easterners are described as āsurya.

दुष्टः शब्दः—

दुष्टः शब्दः स्वरतो वर्णतो वा
मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति
यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥

दुष्टाञ्छब्दान् मा प्रयुक्ष्महीत्यध्येयं व्याकरणम् । दुष्टः शब्दः ।

"Duṣṭaḥ S'abdaḥ" (a corrupt word). A word corrupt as regards accent or as regards sound, employed improperly, fails to convey the sense intended. That thunderbolt of speech kills the sacrificer even as (the expression) Indras'atruḥ on account of the error in the accent. We should study Grammar so that we may not chance to use corrupt words. "Duṣṭaḥ S'abdaḥ" is thus explained.

इन्द्रस्त्वष्टुः पुत्रं विश्वरूपाख्यं जघानेति त्वष्टा सोमयागेनेन्द्रमुपाह्वयत् । इन्द्रश्च यज्ञविघ्नं कृत्वा बलात् सोमं पीत्वा जगाम । अवशिष्टेन सोमरसेनेन्द्रस्याभिचारं कर्तुं त्वष्टा 'स्वाहेन्द्रशत्रुर्वर्धस्व' इत्यनेनाजुहोत् । तत्र शत्रुशब्दो घातकमाचष्टे । भोः उत्पत्स्यमान पुरुषेन्द्रस्य घातकस्त्वं वर्धस्वेति विवक्षित्वा मन्त्रानुच्चारितवान् । तदानीं तत्पुरुषसमासत्वादन्तोदात्तेन भवितव्यम् । प्रमादात्त्वनेनाद्युदात्तो मन्त्रः प्रयुक्तः । स च स्वरो बहुव्रीहौ समासे लभ्यः । ततश्चेन्द्रो घातको यस्येत्यर्थे पर्यवसानाद् इन्द्रेण वध्यो वृत्र उपपद्यते ।

The Pāṇinīya S'ikṣā reads "mantro hīnaḥ svarato varṇato vā."

As a rule, the position of the principal accent depends on the importance of the word-element. In a Tatpuruṣa

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

compound the sense of the final member is prominent, so the compound is accented on the last syllable ; in a Bahuvrīhi the sense of none of the members is prominent, so the first member retains its independent accent acc. to the principle : प्रथमोपस्थितस्य परित्यागे कारणाभावः .

Cf. Bhāgavata vi. 9. 11-12 :

हतपुत्रस्ततस्त्वष्टा जुहावेन्द्राय शत्रवे ।
इन्द्रशत्रो विवर्धस्व मा चिरं जहि विद्विषम् ।।

यदधीतम् ।

यदधीतमविज्ञातं निगदेनैव शब्द्यते ।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ।।

तस्मादनर्थकं माधिगीष्महीत्यध्येयं व्याकरणम् । यदधीतम् ।

"Yad adhītam" (what has been learnt). What has been learnt but not understood is merely chattered by blind recitation. Like dry fuel on ashes it never blazes forth. We should therefore read Grammar, so that our studies may not be useless. "Yad adhītam" is thus explained.

स्थाणुरयं भारहरः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् ।
योऽर्थज्ञ इत् सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा ।। निरुक्त १।१८
यथा खरश्चन्दनभारवाही भारस्य वेत्ता न तु चन्दनस्य ।
एवं हि शास्त्राणि बहून्यधीत्य चार्थेषु मूढाः खरवद्वहन्ति ।।

सुश्रुतसंहिता १।४।४।

The bookful blockhead, ignorantly read,
With loads of learned lumber in his head. POPE.

In the Nirukta the reading is गृहीतम् for अधीतम्. "गृहीतं शब्दतः, अविज्ञातं तु अर्थतः ।"

यस्तु प्रयुङ्क्ते—

यस्तु प्रयुङ्क्ते कुशलो विशेषे
शब्दान् यथावद् व्यवहारकाले ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सोऽनन्तमाप्नोति जयं परत्र
वागयोगविद् दुष्यति चापशब्दैः ॥

कः ? वाग्योगविदेव। कुत एतत् ? यो हि शब्दाञ् जानात्यपशब्दानप्यसौ जानाति। यथैव हि शब्दज्ञाने धर्म एवमपशब्दज्ञानेऽप्यधर्मः। अथवा भूयानधर्मः प्राप्नोति। भूयांसोऽपशब्दा अल्पीयांसः शब्दाः। एकैकस्य हि शब्दस्य बहवोऽपभ्रंशाः। तद् यथा गौरित्यस्य शब्दस्य गावी गोणी गोता·गोपोतलिकेत्येवमादयो बहवोऽपभ्रंशाः।* अथ योऽवाग्योगविद् ? अज्ञानं तस्य शरणम्।

विषम उपन्यासः। नात्यन्तायाज्ञानं शरणं भवितुमर्हति। यो ह्यजानन् वै ब्राह्मणं हन्यात् सुरां वा पिबेत् सोऽपि मन्ये पतितः स्यात्।

एवं तर्हि—सोऽनन्तमाप्नोति जयं परत्र
वाग्योगविद्, दुष्यति चापशब्दैः ॥

कः ? अवाग्योगविदेव। अथ यो वाग्योगवित् ? विज्ञानं तस्य शरणम्।

He who is an adept in details and employs words

* गावी is probably another form of गवी which occurs at the end of Tatpuruṣa compounds; cf. जानि at the end of compounds with जनि woman. गोणी, Dr. Suniti Kumar Chatterji thinks, is probably from the archaic gen. plural गोनाम्. गोता may have been formed with the abstract suffix ता and then used in a collective sense. गोपोतलिका is, acc. to Dr. Suniti Kumar Chatterji, formed from पोत (young one) with the suffix ल (cf. पोला in Bengali) and the suffix क in the sense of endearment, the entire word being used in the feminine as the stem *go* is feminine. S'abara (i. 3. 24) omits गोता.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

properly in communication, he who knows the secrets of speech obtains eternal victory in the next world, while (he who does not) is contaminated by corrupt words.

Who ?

He who knows the secrets of speech, of course.

How is this ?

He who knows the (correct) words, knows also the corrupt ones; just as there is religious merit in the knowledge of correct words, even so there is demerit in the knowledge of corrupt words. Or, the amount of demerit is greater, for the corrupt words are numerous, whereas the correct words are limited in number, each correct word having a large number of corrupt forms. Thus the correct word "gauḥ" has the corrupt forms "gāvī", "goṇī", "gotā", "gopotalikā" and the like.

Now what about him who does not know the secret of words ?

Ignorance is his refuge.

The statement is not sound. Ignorance cannot wholly serve as a refuge. He who kills a Brāhmaṇa or drinks wine through ignorance will also become fallen, I trow.

If so, we must read "so' anantam āpnoti jayam paratra vāgyogavit" and then add "duṣyati cāpas'abdaiḥ" i. e., that man who knows the secret of words attains unending happiness in the next world; while is contaminated by corrupt words—.

Who ? He who does not know the secrets of words, of course.

Then what about him who knows the secrets of words ? Knowledge is his refuge.

अत्यन्ताय—अत्यन्त-पापराहित्याय । अन्नंभट्टः । 'अत्यन्त'मित्यर्थं 'अत्यन्ताय' इत्यव्ययम् । नागेशः । यद्यपक्रामति किं नात्यन्तायापक्रामति i.4.29 ii. 3.28, यद्यपक्रामन्ति किं नात्यन्तायापक्रामन्ति 1.4. 30-31.

ii. 1.1. यद्यप्यसौ स्वार्थं नात्यन्ताय जहाति यः परार्थविरोधी स्वार्थस्तं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जहाति । तद् यथा तक्षा राजकर्मणि प्रवर्तमानः स्वं तक्षकर्म जहाति, न तु हिक्कित-हसितकण्डूयितानि ।

ii. I. 55. तत्समीपे यन्नात्यन्ताय मिमीते तदुपमानं गौरिव गवय इति । इमे पुनर्वर्णा नात्यन्तयैवानर्थकाः I. p. 220. l. 2 ।

S'abara on M. S. VI. I. 23 : यत्त्वस्मिन् पक्षेऽत्यन्ताय स्वार्थं जहातीति, नात्यन्ताय हास्यति । Also vi. I. 22.

"नाविज्ञानाद्विषं भक्षितं मरणाय न प्रकल्पते । तिर्यगादिष्वेवाज्ञानं शरणम्, न म्लेच्छादीनां ब्रह्महत्यादिषु प्रवर्तमानानाम् ।" भर्तृहरिः

वाचो योगः प्रकृतिप्रत्ययविभागेनार्थविशेषपरत्वं, तद्वेत्तीति वाग्योगवित् N.

अज्ञानं तस्य शरणम्—cf. Kirāt. संवृणोति खलु दोषमज्ञता १३।६३

Naiṣadha : उदेति दोषादपि दोषलाघवं कृशत्वमज्ञानवशादिवैनसः ॥२।१३२

काममसौ धर्मेण न युज्यते, प्रत्यवायेन तु तस्यायोगः । भर्तृहरिः ।

क्व पुनरिदं पठितम् ? भ्राजा नाम श्लोकाः । किञ्च भोः श्लोका अपि प्रमाणम् ? किञ्चातः ? यदि श्लोका अपि प्रमाणम्, अयमपि श्लोकः : प्रमाणं भवितुमर्हति—

यदुदुम्बरवर्णानां घटीनां मण्डलं महत् ।
पीतं न गमयेत् स्वर्गं किं तत् क्रतुगतं नयेत् ॥

इति । प्रमत्तगीत एष तत्रभवतः । यस्त्वप्रमत्तगीतस्तत् प्रमाणम् । यस्तु प्रयुङ्क्ते ।

Where on earth has this been stated ?

(There are) the stanzas known as Bhrāja.

Hallo ! Are mere stanzas also to be regarded as an authority ?

What of that ?

If mere stanzas are authoritative, this stanza also ought to be regarded as authoritative :

When a large number of udumbara-coloured (i. e. red, made of copper) jars when drunk do not lead to heaven, how can wine drunk (in a small quantity) in this sacrifice do so ?

This stanza has been sung by the revered author

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

through thoughtlessness (असमाहितचेतस:—भर्तृहरि:). That (stanza) which is not sung through thoughtlessness [but after due deliberation] is authoritative. "Yastu prayuṅkte" is thus explained.

प्रमत्तगीत is a very common expression ; cf. S'abara on M. S. ii. 2. 26 न चैतत् प्रमत्तगीतम् ; iii. 1. 17 प्रमत्तगीतं तत्रभवतामित्यवगम्यते.

यदुदुम्बरेत्ययं श्लोकः सौत्रामणीयागे सोमपानस्य दुष्टत्वमुद्भावयति ।

भ्राजा नाम कात्यायनप्रणीताः श्लोकाः ।

"अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः ।
कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेत् ॥"

अभिवादे स्त्रीवन्मा भूमेत्यध्येयं व्याकरणम् । अविद्वांसः ।

"Avidvāṁsaḥ." To those ignorant people who do not know about the prolation of the name in responding to a salutation, one should simply say on one's return from abroad, "Here am I" as one does while saluting women. We should study grammar so that we may not be treated like women in the matter of salutation. "Avidvāṁsaḥ" is thus explained.

आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने ।
अकारश्चास्य नाम्नोऽन्ते वाच्यः पूर्वाक्षरः प्लुतः ॥ मनु २।१२५
नामधेयस्य ये केचिदभिवादं न जानते ।
तान् प्राज्ञोऽहमिति ब्रूयात् स्त्रियः सर्वास्तथैव च ॥ मनु २।१२३

विभक्तिं कुर्वन्ति—

याज्ञिकाः पठन्ति—"प्रयाजाः सविभक्तिकाः कार्य्याः" इति । न चान्तरेण व्याकरणं प्रयाजाः सविभक्तिकाः शक्याः कर्तुम् । विभक्तिं कुर्वन्ति ।

"Vibhaktiṅ kurvanti." Ritualists read : The Prayājas are to be used with the proper case-endings. And it is not possible to use the Prayājas with the proper case-endings without Grammar. "Vibhaktiṅ kurvanti" is thus explained.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

What Scholars think of the Manjusha.

Dr. Suniti Kumar Chatterji, M.A., D.LITT. (London) Professor, Calcutta University, writes :

This little paper is unique in many respects. Sanskrit is said to be a dead language in India, but it is not yet as dead as many people think (or as some people would like to think !)...

We have still about half-a-dozen Sanskrit journals in India, apart from fairly frequent addresses and dissertations which are published independently. Among these journals, the *Manjusha* which is probably the only one of its kind appearing *regularly* month after month, has made quite a unique place of its own.

The *Manjusha* is run by Dr. Kshitish Chandra Chatterjee of the University of Calcutta, who is one of our most erudite authorities on the technical and other niceties of Sanskrit grammar. He is a student of languages and, in addition, he handles Sanskrit with ease. It has been his love of Sanskrit that has made him carry on the work of editing and bringing out this paper since its inception by himself. Financially it has been a thankless task. It has brought other disadvantages also—the editing and financing of a journal without much wide appeal because of its language has been a source of worry which has had its repercussions on his health. But he has not given in, because he is an incorrigible optimist when he is convinced his cause is noble. Prof. Chatterjee is quite an institution in himself. Then, he has been able to enist a number of disinterested colleagues who help him with contributions and who are enthusiasts for Sanskrit like himself. And he himself writes. It is a remarkable thing that although he finds joy in unravelling the intricacies of Sanskrit grammar, he is not in his mental make-up a dry-as dust grammarian. He has a wonderful sense of humour supported by an inexhaustible fund of anecdotes and stories which he brings out in racy Sanskrit. So the pages of the *Manjusha* at times sparkle with laughter. Comparative linguistic he brings in frequently in his articles, and this is a remarkable "special feature" of this little paper. Further, it does not confine itself to Sanskrit alone. Proverbs, *Bon-mots*, wise sayings, *Mahavakyas*, etc. from different languages, English, French, German, Latin, etc., are rendered appropriately into Sanskrit, demonstrating the capacity of the language of the Gods to keep pace with turns of expression peculiar to various languages. One can say also that there is an "English Section" to this magazine, devoted as it is entirely to the culture of Sanskrit. Thus, the editor himself is bringing out through this magazine, in instalments, his English translation and commentary on the *Mahabhashya*

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

of Patañjali which, when completed, will be a valuable contribution to the study of Sanskrit grammar through English.

A journal like this deserves a much wider appreciation which is its due. I think our high school students reading Sanskrit will find much of interest, pleasure and profit in it. I would suggest its being taken in all schools, colleges and universities in India where Sanskrit is taught. Prof. Chatterjee has been able to obtain contributions from eminent Sanskritists not only from all over India but also from abroad and that is no negligible achievement. All power to his elbow for the rehabilitation and the glory of Sanskrit, and for re-establishing its popularity among young Indians of today !

TECHNICAL TERMS AND TECHNIQUE OF

SANSKRIT GRAMMAR

A Critical, Comparative and Historical Study

BY

KSHITISH CHANDRA CHATTERJI, SASTRI, M. A., D. LITT.

Lecturer, Calcutta University ;
Formerly Editor, Calcutta Oriental Journal,
Surabharati, Oriental Literary Digest, etc., etc.

"We have nothing but admiration for this masterpiece of scholarship." *Modern Review.*

Price Rupees Ten only. *Foreign Rs. 12/-*
Postage Extra.

VISVANATH CHATTERJI

81, Shyambazar Street,
CALCUTTA—4
Phone : B. B. 4049

Printed and published by Sri Jyotish Chandra Chatterjee, B. A. from 81, Shyambazar Street, Calcutta—4. Printed at the Elm Press 63, Beadon Street, Calcutta—6

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Approved by the Directors of Public Instruction, Madras, Bihar and Mysore.

श्रीशिवः शरणम्

५म-वर्षे] . August, 1951 [द्वादशी संख्या

मञ्जूषा

सम्पादकः—श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

Special Article in this number.

Mahābhāṣya with English Translation, notes, extracts from various commentaries including the hitherto-unpublished Bhāṣya-pradīpikā of Bhartṛhari (pp. 17-32).

Special Articles in the next issue.

S'aṅkarācārya's unpublished writings.

An interesting Sanskrit drama.

Sanskrit translation of Longfellow's "Psalm of life."

इवेन सह समासः—a critical study.

Mahābhāṣya.

Vol. V of the Mañjūṣa contains 300+32+32 pages including "The S'iva sūtras and the Sanskrit alphabet" "Mahābhāṣya" "Critical studies on the text of S'āyaṇa's commentary on the Rigveda etc. etc. Rs. 6/8/-

Office : 81 Shyambazar Street, Calcutta—4

Annual Subscription : Rupees Six only.

Foreign—Rupees Nine.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

The Madhuravāṇi (Bagalcott) writes: स्वागतं मञ्जूषायै। कलकत्तानगरतः शब्दाब्धिलब्धवैदग्ध्यस्य कवितावनितास्वयंवरवृतवरस्य पण्डितप्रवरस्य श्रीक्षितीशचन्द्रचट्टोपाध्यायस्य सम्पादकत्वे प्रतिमासं नियतमाविष्क्रियमाणा मञ्जूषानामिका पत्रिका शिञ्जानमञ्जरीमञ्जुलपदैः गीतगुञ्जारवैश्च रञ्जयति रसिकपुञ्जम्। क्वचित् महाभाष्य-शब्देन्दुशेखरादिगतं-सूक्ष्मतमविषयसमीक्षणसंरम्भेण महामहापण्डितपुण्डरीकाणामपि शिरःकण्डूतिम् उपजनयति। कदाचित् कुशलग्रामवृद्धेव सरसकथाकथनेन कौतुकमुत्पादयति। कुत्रचिच्च प्राचीन-सरस-सुन्दर-सुभाषितानाम् आंग्लानुवादान् प्रकटीकृत्य उपकरोति छात्रवृन्दम्। क्वचिदपि च वेदवेदान्तमन्त्रतन्त्रादीनां भावार्थादिकं जिज्ञासते। मध्ये मध्ये तनुतरविनोदिकथाभिः हास्यलहरीरपि उद्भावयति। तत्र तत्र च शब्दशक्तिप्रकाशेन शब्दशुद्धिविचारैः पुरातनसाहित्यप्रकटीकरणेन च भिन्नभिन्नरुचिमपि वाचककुलं सम्यगाराधयति। प्रायः सर्वत्र सरलतमा सुबोधा च अत्रत्या भाषा विदुषामिव विद्यार्थिनामपि सविशेषं परितोषं जनयति। 'पण्डिता च पतिव्रता' इति ख्यातायाः क्षमादेवीरावमहोदयायाः "परित्यक्ता" इति विचित्रा चैत्राङ्कगता चारुतमकथा चमत्कुरुते सचेतसां चेतांसि हृदयङ्गमया निरूपणभङ्ग्या। तस्मिन्नेव मञ्जूषायाः चैत्राङ्के 'शिवसूत्रस् एण्ड संस्कृत आल्फाबेट्' इति विचारप्रचुरः सम्पादकानाम् आंग्लभाषायां लिखितः विवेचनात्मकः लेखः सर्वेषामपि विपश्चिदपश्चिमानां प्रशंसापात्रं भवतीति निश्चप्रचम्। वयं तु सादरं संसूचयामः "यावच्छक्यं संकृतभाषायामेव लेखा लेखनीयाः" येन शुद्धसंस्कृतविदुषामपि उपयोगो भवेत्।

शिञ्जन्मञ्जीरमञ्जूक्तिगुञ्जितै रसिकरञ्जिनी।
क्षितीशकृतिमञ्जूषा केषामेषा न तोषदा॥
सुवर्णाकांक्षिभिः सवरर्थलुब्धैर्मनीषिभिः।
अलङ्कारप्रियैरेषा मञ्जूषा गृह्यतां रसात्॥
उत्कृष्टलेखरत्नानां मञ्जूषैषा विशोभते।
सर्वथा समुपादेया सर्वैः सहृदयैरपि॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम् ॥

मञ्जूषा

August, 1951.	१८७३-शकीय-भाद्रस्य ५म-वर्षस्य द्वादश-संख्या	Vol. V. No. 12.

आभाणकादि

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

(१) नापृष्टः कस्यचिद् ब्रूयान्न चान्यायेन पृच्छतः ।
जानन्नपि हि मेधावी जडवल्लोक आचरेत् ॥ मनु २ ।

Speak when you're spoken to,
do what you're bidden.
Come when you're called,
and you'll not be chidden.

गृहिणीनां गृहदासीष्वनुशासनम्—
"आभाषिता वचो ब्रूया आदिष्टा कार्यमाचरेः ।
समाहूता समागच्छे नैवं त्वं भर्त्सयिष्यसे ॥" इति ।

(२) यदा तावद् यमधिकृत्य संवादः प्रवृत्तः स एव दववशात् प्रादुर्भ-

* अत्र परिसंख्यालङ्कारः । आभाषितैव वचो ब्रूया न पुनरनाभाषितेत्यर्थः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वति, तदाङ्लरुच्यते—असुरमधिकृत्य ब्रूहि, स सद्य एव समागच्छतीति। फरासी-भाषायामप्याभाणको वर्तते—यदा वृकमधिकृत्य सङ्कथा प्रवर्त्तते तदा तस्य लाङ्गूलं लोचनपथमापततीति।

Talk of the devil and he is sure to appear.

(फ) Quand on parle du loup, on eu voit la queue.

(३) जानामि धर्मं न च मे प्रवृत्ति-
जानाम्यधर्मं न च मे निवृत्तिः।
त्वया हृषीकेश हृदि स्थितेन
यथा नियुक्तोऽस्मि तथा करोमि॥

I see, and approve, the better course; [but] I follow the worse.

(ला) Video meliora proboque; Deteriora sequor.

जामातुर्वैचक्षण्यम्

यतीन्द्रनाथवन्द्योपाध्यायस्य व्ययकुण्ठत्वं सुप्रथितमेव भवानीपुरपल्ल्याम्। उपरतायां भार्यायां तेन साम्प्रतं पुनरपि परिगृहीता दाराः। द्वितीया च पत्नी गरीयसामयेनाक्रान्ता, यतीन्द्रमहोदयेन च शस्त्रकुशलेन भिषजा भूयसा व्ययेन तस्याः स्वास्थ्यं सम्पादितम्। ततश्च भिषगामन्त्रणावसरे यतीन्द्रमहोदयमुक्तवान्—शस्त्रप्रयोगो द्वित्रेभ्यो वर्षेभ्यः पूर्वं करणीयमासीदिति। तच्छ्रुत्वा यतीन्द्रमहोदयेनोक्तम्, तदानीं तु मदीया पत्नी कुमारी सती पितृगृहमलङ्कुर्वाणा पितुरेव पालनीया पोषणीया चावर्तत। अत एवेदानीं शस्त्रप्रयोगे यावान् व्ययः सञ्जातः स सर्वस्तदीयेन पित्रैव वोढव्य इति। यतीन्द्रमहोदयस्य निर्बन्धातिशयेन तस्य श्वशुरमहोदयेनागतिकतया पञ्चशती प्रदत्ता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिक्षकस्य दुर्दैवम्

ग्राम्यविद्यालये परिदर्शकः (inspector) समागतः। स च गृहाद् गृहान्तरं गच्छति। एकस्मिन् प्रकोष्ठे तीव्रतरं कोलाहलमाकर्ण्यासौ भृशमुद्विविजे। अन्ततश्च कलकलं सोढुमशक्तः प्रकोष्ठं प्रविश्यान्येभ्यो बालकेभ्यः प्रांशुतरं बालकमेकमत्युच्चै रारटन्तं समुपलभ्य तं स्कन्धे गृहीत्वा कक्षान्निष्कास्य कक्षान्तरं नीत्वा गृहकोणेऽवस्थाप्य इदानीमत्र दण्डायमानः शान्त एधि इत्युक्तवान्। नवदशेभ्यो निमेषेभ्योऽनन्तरं द्वारप्रान्तेऽर्भकः कश्चन प्रादुर्भूय विनम्रवचनेनोक्तवान्, कृपया प्रत्यावर्तयितुमर्हत्यस्माकमध्यापकमार्यः इति।

कल्यवर्तम् *

दर्दुरकः। किमेतत् ?

माथुरः। अयं दशसुवर्णं धारयति।

दर्दुरकः। ननु कल्यवर्तमेतत्।

माथुरः। (दर्दुरस्य कक्षतललुण्ठीकृतं पटमाकृष्य) भर्तः, पश्यत पश्यत। जर्जरपटप्रावृतोऽयं पुरुषः दशसुवर्णं कल्यवर्तं भणति।

दर्दुरकः। अरे मूर्ख ! नन्वहं दश सुवर्णान् कटकरणेन प्रयच्छामि। तत् किं† यस्यास्ति धनं स किं† क्रोड़े कृत्वा दर्शयति ? अरे,

---

* घञ् निष्पन्नोऽयं शब्दः प्रायेण पुंस्येव प्रयुज्यते। अत एव त्रिकाण्डशेषः— "प्रातराशः कल्यवर्तः प्रातर्भोजनमित्यपि" इति।

† मृच्छकटिककारेणात्र पर्यनुयोगदार्ढ्याय द्विः किंशब्दः प्रयुक्त इति प्रतिभाति। प्राचीनग्रन्थेष्वीदृश्यः पुनरुक्तयोऽन्तरान्तरोपलभ्यन्त एव। तथाच पञ्चतन्त्रम्— सारं ततो ग्राह्यमपास्य फल्गु हंसैर्यथा क्षीरमिवाम्बुमध्यात् इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुर्वर्णोऽसि विनष्टोऽसि दशस्वर्णस्य कारणात् ।
पञ्चेन्द्रियसमायुक्तो नरो व्यापाद्यते त्वया ।। २।१३

माथुरः । भर्तः, तव दशसुवर्णं कल्यवर्तः, ममैष विभवः ।

मृच्छकटिकम् ।

Gilbert Frankau-महोदयस्य The Silver Cellar-समाख्यायामाख्यायिकायां दृश्यते—

"It's no good crying over spilt milk, my angel. And anyway what's a little chicken-food as long as one's happy ?" . . . "**Chicken-food.** You call three thousand pounds chicken-food !" इति ।

भट्टिकाव्ये कल्यवर्तशब्दस्य पर्यायः प्रातराशः प्रयुक्तः—

सराधवैः किं बत वानरैस्तै-
यैः प्रातराशोऽपि न कस्यचिन्नः ।
सस्थाणुकैलासधराभिधत्स्व
कि द्यौरधोऽस्तु क्षितिरन्तरिक्षे ।। [१२।१९] इति ।

ऋग्वेदसूक्तम्

[५]

द्यावापृथिवी

[श्रीमहालिङ्ग-शास्त्री]

द्यावापृथिव्यौ चतुरे सुजाते
शंभावयित्र्यौ हि जनस्य देव्यौ ।
ऋतान्विते अग्निसुवौ, सुधर्मा
ययोर्विवस्वान् परिवर्ततेऽन्तः ।।१।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

असज्जमाने वितते महत्यौ
मातापितृत्वादवतो जगन्ति
ये रोदसी धृष्टतमे मनोज्ञे
सृष्टाऽभितो रूपगुणैः प्रक्लृप्ते ॥२॥

दिवः पृथिव्याश्च सुतः स्वपित्रो-
र्वह्निः पवित्रो भुवनं पुनानः ।
वर्षोदकं चद्धिमदुग्ध नित्यं
वृषाच्च धेनोरुभयोर्यथार्हम् ॥३॥

यो रोदसी विश्वशुभंयुवृत्ती
शुभैकतानो जनयांबभूव ।
ममौ दधार ध्रुवमीडग्रतेऽसौ
प्रकृष्टकृत् कृत्यवतां सुराणाम् ॥४॥

द्यावापृथिव्यौ महिते युवां नो
मह्यशो राष्ट्रमपि स्तुवद्भ्यः ।
धत्तं तथा वर्धयतं प्रशस्यम्
ओजः प्रजा यन जयेम नित्यम् ॥५॥

वेदार्थविमर्शः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

Importance of accents.

"परोगव्यूत्यनिरामप क्षुधमग्ने सेध रक्षस्विनः" [ऋ० स० ८।६०।२०] इत्यत्र 'अनिराम्' इति पदं वर्तत । बहुव्रीहि र्वेदं स्यात् तत्पुरुषो वेति विचारे "नञ्सुभ्याम्" [६।२।१७२] (नञ्सुभ्यां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परमुत्तरपदं बहुव्रीहौ समासेऽन्तोदात्तं भवति—काशिका) इति सूत्रम् "तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः" [६।२।१] (तत्पुरुषसमासे तुल्यान्तं तृतीयान्तं सप्तम्यन्तम् उपमानवाचि अव्ययं द्वितीयान्तं कृत्यान्तं च यत् पूर्वपदं तत् प्रकृतिस्वरं भवति—काशिका) इति च सूत्रं स्मृतिपथमधिरोहतः। यद्याद्युदात्तं तर्हि कर्मधारयः, अथान्तोदात्तं तर्हि बहुव्रीहिरिति चावसीयते। प्रोल्लिखिते चार्धर्चे अनिरामित्यस्याद्युदात्तत्वमुपलभ्यते, अत एव सायणाचार्येण 'अनिराम्' इत्यस्य 'अन्नाभावः' इत्यर्थो निर्दिष्टः। ग्रिफिथ्-महोदयेन पुनः To distant pastures drive faint hunger इत्युक्तम्। अत्र faint-शब्दस्य hunger-पदस्य विशेषणत्वात् बहुव्रीहिरेवास्याभिप्रेत इति प्रतिभाति। तत्तु नोचितम्। यदि Griffith-महोदयस्य समर्थन आग्रह स्तर्हीत्थं समाधेयम्—अत्र भाषान्तरारोपयित्राङ्लादिभाषासु सुप्रसिद्धं Hendiadys अलङ्कारमङ्गीकृत्य faintness and hunger इत्यस्य स्थाने faint hunger लिखितम् इति।

आद्युदात्तश्चानिराशब्दः "युयुतमस्मदनिराममीवाम्" [ऋ० सं० ७।७१।२] "अप त्या अस्थुरनिरा अमीवाः" [ऋ० सं० ८।४८।११] "तेनास्मद्विश्वामनिरामनाहुतिमपामीवामप दुष्वप्न्यं सुव" [ऋ० सं० १०।३७।४] इत्यत्रोपलभ्यते।

अनिरेण वचसा फल्ग्वेन प्रतीत्येन कृधुनातृपासः।

अधा ते अग्ने किमिहा वदन्त्यनायुधास आसता सचन्ताम्॥

[ऋ० सं० ४।५।१४] इत्यत्रान्तोदात्तः अनिर-शब्द उपलभ्यते। स च व्यक्तमेव बहुव्रीहिः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाणिनीय-सूत्रविमर्शः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

प्रायेण मुद्रितेषु भाष्यग्रन्थेषु दृश्यते "आज्ञायिनि च" इति सूत्रानन्तरम् "आत्मनश्च पूरणे" इति वार्त्तिकम् । काशिकायां पुनः "आज्ञायिनि च" 'आत्मनश्च पूरणे" "वैयाकरणाख्यायां चतुर्थ्याः" "परस्य च" इति सूत्रसन्निवेशः समुपलभ्यते । रूपावतारे आत्मनश्चेति सूत्रं नोद्धृतम् । भाषावृत्तौ प्रक्रियाकौमुद्यां च काशिकागतम् 'आत्मनश्च पूरणे' इति वार्त्तिकमेव सूत्ररूपेण दृश्यते*। सिद्धान्तकौमुद्यां पुनः 'आत्मनश्च' इति सूत्रपाठः। अयमेव पाठः शुद्धः इति प्रतिभाति। अत एव "आज्ञायिनि च" "आत्मनश्च" "वैयाकरणाख्यायां चतुर्थ्याः" "परस्य च" इति पठनीयम् । गुरुप्रसादशास्त्रिमुद्रिते महाभाष्ये "आत्मनश्च" इति सूत्रं बन्धनीमध्ये सन्निविष्टम्, पादटीकायां चोक्तं "क्वचिन्नेदम्" इति । परं सूत्रमिदमन्तरेण "परस्य च" इति सूत्रं वैयर्थ्यमियात् तद्धितशब्दश्च 'तेभ्योहितः' इत्याकारं परिगृह्णीयात् ।

टीकाकृतस्त्वत्र प्रत्यवतिष्ठन्ते । तथाहि शब्देन्दुशेखरे नागेशपादाः— यथाश्रुतभाष्यस्वरसस्तु "आत्मनश्च पूरणे" इत्यस्य वार्त्तिकत्वे। एवं हि भाष्यम् "आज्ञायिनि च" "आत्मनश्च पूरणे" "आत्मनश्च पूरणे उपसंख्यानं कर्तव्यम्" इति । "वैयाकरणाख्यायाम्" इत्यत्र तु वार्त्तिकस्थस्यैव "आत्मनः" इत्यस्यानुवृत्तिर्बोध्या, काम्ये रोरित्यादेरिव । यद्वा "परस्य च" इत्यनेनैकं सूत्रं, चेन परप्रतिद्वन्द्वितयात्मन्-शब्दस्य ग्रहणमिति तदाशयः । बालमनोरमाकारेणापि नागेशीया पद्धतिरेवानुसृता—"अत्र सूत्रभाष्ये आत्मनश्च पूरण उपसंख्यानम् इति वार्त्तिकं पठितम् । तत्रात्मनश्चेत्यंशं व्याख्यातुं पृथगुपादत्ते।

* वार्त्तिकमेवेदं सूत्ररूपेण पठितम्—हरदत्तः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

... वैयाकरणाख्यायाम् । आत्मन इत्येवेति । अनुवर्तत एवेत्यर्थः । न च "आत्मनश्च" इत्यस्य वार्त्तिकत्वे कथमिह सूत्र एतदनुवृत्तिरिति वाच्यम्, "सोऽपदादौ" [८।३।३८] इति सूत्रे पठितस्य 'काम्ये रोरेवेति वाच्यम्' इति वार्त्तिकस्य "इणः षः" [८।३।३९] इति सूत्रऽनुवृत्तिवदुपपत्तेः" इति ।

यथा वयं पश्यामस्तथा "आत्मनश्च" इति सूत्रानन्तरम् "आत्मनश्च पूरणे" इति वार्त्तिकस्य सद्भावाल्लेखकेन केनचन प्रमादात् सकृदेवात्मनश्चेति विलिखितम्, बहुभिश्च गतानुगतिकतया तदेवानुसृतम् । लेखने भाषणे मुद्रणे चेदृशाः प्रमादा भवन्त्येवेति न खलु नानुभूतमिदं प्रेक्षावद्भिः । वार्त्तिकैकदेशस्य सूत्रेऽनुवृत्तिः कथमपि न सम्भवति वार्त्तिकानां सूत्रेभ्योऽर्वाक्कालिकत्वात् । एतत्तु वङ्गीयानां वावा पेटे, खड़ो हाँटे । आमि तखन वछर आटे(क) ।। पिता तदानीं मातृकुक्षावासीत्, पितुः कनीयान् भ्राता चलितुं शिक्षते स्म, अहं तदानीमष्टवर्षदेशीय इत्याभाणकं संस्मारयति ।

In cur previous number we showed how some Indian commentators assert and maintain that Pāṇini as a great seer was fully aware of what Kātyāyana and Patañjali coming generations after him would say. Here Nāges'abhaṭṭa, one of the greatest scholars India has ever produced, says that a portion of a Vārttika on a previous rule is to be connected by Anuvṛtti with a subsequent rule. With all the deference due to the great scholar, we must dissent from this view. The fact is the Vārttika **आत्मनश्च पूरणे** comes immediately after the rule **आत्मनश्च** and some scribes writing **आत्मनश्च** only once thought they had done their duty. These scribes were followed by others and so the rule **आत्मनश्च** came to be omitted from the Mahābhāṣya in most MSS. We find compositors at the present day doing exactly the same thing with our MSS. So we

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

should read: आम्नायिनि च। आत्मनश्च। वैयाकरणाख्यायां चतुर्थ्याः। परस्य च। In the absence of the rule आत्मनश्च, वैयाकरणाख्यायां चतुर्थ्याः will be a general rule making provision for both परस्मैपद and आत्मनेपद and परस्य च will be unnecessary. Thus Bhaṭṭoji says in his Prauḍhamanoramā:

पूरण इति वक्तव्यमिति। इह आत्मनश्चेत्यंशोऽपि वार्त्तिकान्तर्गतो न तु सूत्रमिति केचिद् भ्राम्यन्ति, तन्नादर्तव्यमिति भावः। तथाहि सति उत्तरसूत्रे आत्मन इति न लभ्येत। 'परस्य च' इति तदुत्तरसूत्रं च व्यर्थमेव स्यादिति स्पष्टमेव विवेकिनाम्।

The absence of a word like उपसंख्यानम् in the Vārttika would appear to show that आत्मनश्च is the rule and आत्मनश्च पूरणे and not merely पूरणे is the Vārttika. Cf. the Vārttika अपो भि मासश्छन्दसि on the sūtra अपो भि vii. 4. 48.

घण्टापथविमर्शः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

किरातार्ज्जुनीयमहाकाव्यस्य त्रयोदशः सर्गो बहुत्र पाठ्यतया निर्धारितो वर्तते। तत्र

आत्मनीनमुपतिष्ठते गुणाः
सम्भवन्ति विरमन्ति चापदः।
इत्यनेकफलभाजि मा स्म भू-
दर्थिता कथमिवार्यसङ्गमे॥

इति श्लोकव्याख्यायां मल्लिनाथसूरिभिरुक्तम्—उपाद्देवपूजेति सङ्गतिकरण आत्मनपदम्। "इको गुणवृद्धी" [१।१।३] इति सूत्रस्थं सिद्धान्तकौमुदीगतं विवरणं "तत्र इक इति षष्ठ्यन्तं पदमुपतिष्ठते" इति व्याचक्षाणेन बालमनोरमाकारेणाप्युक्तम्—उपतिष्ठते इति। सङ्गतं भवतीत्यर्थः। उपाद्देवपूजासङ्गतिकरणेत्यात्मनपदम्। इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्रेदमवधेयम । पाणिनीये शब्दानुशासन "उपान्मन्त्रकरणे" "अकर्मकाच्च" इति सूत्राभ्यामुपतिष्ठतेरात्मनेपदं विहितम् । "उपान्मन्त्रकरणे" [१।३।२४] इति सूत्रस्य भाष्ये दृश्यते--

"उपाद्देवपूजासङ्गतकरणयोः ।

उपाद्देवपूजासङ्गतकरणयोरिति वक्तव्यम् । आदित्यमुपतिष्ठते । चन्द्रमसमुपतिष्ठते । सङ्गतकरणे—रथिकानुपतिष्ठते । अश्वारोहानुपतिष्ठन्ते ॥

बहूनामप्यचित्तानामेको भवति चित्तवान् ।
पश्य वानरसैन्येऽस्मिन् यदर्कमुपतिष्ठते ।
मैवं मंस्थाः सचित्तोऽयमेषोऽपि हि यथा वयम् ।
एतदेवास्य कापेयं यदर्कमुपतिष्ठति ॥

अपर आह— उपाद्देवपूजासङ्गतकरणमित्रकरणपथिषु ।

उपाद्देवपूजासङ्गतकरणमित्रकरणपथिष्विति वक्तव्यम् । देवपूजासङ्गतकरणयोरुदाहृतम् । मित्रकरणे । रथिकानुपतिष्ठते । अश्वारोहानुपतिष्ठते । पथिषु--अयं पन्थाः स्रुघ्नमुपतिष्ठते । अयं पन्थाः साकेतमुपतिष्ठते ।

वा लिप्सायाम् ।

वा लिप्सायाम् इति वक्तव्यम् । भिक्षुको ब्राह्मणकुलमुपतिष्ठते । भिक्षुको ब्राह्मणकुलमुपतिष्ठति ।" इति ।

अत्र सर्वत्रैवोदाहरणेषु सकर्मको धातुरुपलभ्यते, अत एवाकर्मकविषये "अकर्म्मकाच्च" इति सूत्रमेवोपासनीयम् इति प्रतिभाति । अत एव मनीषिप्रवरेण चन्द्राचार्य्येण "पथ्याराधनयोः" [१।४।६८] इति सूत्रं विहितम् । विवृतं च वृत्तिकृता—पथि कर्तर्याराधने च गम्यमाने उपपूर्वात्तिष्ठतेस्तङाना भवन्ति । अयं पन्थाः स्रुघ्नमुपतिष्ठते । आदित्यमुपतिष्ठते । रथिकानुपतिष्ठते । महामात्रानुपतिष्ठते इति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चान्द्रे "अभ्याप्यात्" [१।४।७०] इति सूत्रेण अकर्मकादुपतिष्ठतेरात्मनेपदं विहितम्। जैनन्द्रेऽपि "घेः" [१।२।२७] इति सूत्रं जागर्ति। हैमे पुनः सूत्रमीदृग्विधं नोपलभ्यते। हैमशब्दानुशासन "देवार्चामैत्रीसङ्गमपथिकर्तृकमन्त्रकरणे स्थः" [३।३।६०] इति सूत्रं सन्दृश्यते। तस्य च बृहद्वृत्तिर्यथा—एष्वर्थेषु वर्तमानादुपपूर्वात्तिष्ठतेः कर्तर्यात्मने पदं भवति। देवार्चायाम्। जिनेन्द्रमुपतिष्ठते। बहूनामप्यचित्तानामेको भवति चित्तवान्। पश्य वानरसङ्घेऽस्मिन् यदर्कमुपतिष्ठते। यदा तु नेयं देवपूजा, अपि तु चापलमिति विवक्षितं तदा न भवति। मैवं मंस्थाः सचित्तोऽयमेषोऽपि हि यथा वयम्। एतदप्यस्य कापेयं यदर्कमुपतिष्ठति॥ मित्रतया मित्रं वा कर्तुमाचरणं मत्री उपस्थानस्य हेतुः फलं वा। महामात्रानुपतिष्ठते। रथिकानुपतिष्ठते। मैत्र्या हेतुना फलेन वाराधयतीत्यर्थः। सङ्गम उपश्लेषः। यमुना गङ्गामुपतिष्ठते। पन्थाः कर्ता यस्यार्थस्य स पथिकर्तृकः। अयं पन्थाः स्रुघ्नमुपतिष्ठते। मन्त्रः करणं यस्यार्थस्य स मन्त्रकरणः। ऐन्द्र्या गार्हपत्यमुपतिष्ठते। सावित्र्या सूर्य्यमुपतिष्ठते। आराधयतीत्यर्थः। मन्त्रादन्यत्र भर्तारमुपतिष्ठति यौवनेन। करणग्रहणं किम्? गायत्रीमुपतिष्ठति। अत्र मन्त्रो धात्वर्थविशेषणेनोपसर्जनं धात्वर्थः शेषास्तु प्रधानम्। इति।

व्याख्यातञ्चेदं लघुन्यासे—मित्रतया मित्रं वा कर्तुमिति। "अजर्यं सङ्गतम्" इतिवत् संपूर्वस्य गमेर्मैत्र्यामपि दर्शनात्। मैत्रीसङ्गमयोरर्थाभेद इति यः शङ्कते तं प्रत्युपश्लेषरूपात् सङ्गमात् मित्रतयत्यादिना मैत्र्या भेदं दर्शयति। विनापि हि संश्लेषेण मैत्रीत्यर्थः। मित्रस्य भावो मैत्री, सा उपस्थानस्य धात्वर्थस्य हेतुर्निर्वर्तिका। यदा हि रथिकानुपतिष्ठते इत्यत्रोपस्थाता मित्रं सदुपतिष्ठते तदा मैत्री हेतुः। यदा तु प्रागमित्रः सन् मैत्र्यर्थं प्रवर्तते तदा मैत्री फलम्। ततश्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कारणस्य फलस्य च क्रियां प्रति विषयत्वोपपत्तरुपस्थानस्य विशेषणत्वेन मैत्री गौणो धात्वर्थो भवति । (क्रमशः)

रसमञ्जरी

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

अध्यापकः । वत्साः, निशामुखमधिकृत्य किञ्चिद् विलिख्यताम् ।

माधवः । आर्य, विलिखित खलु मया ।

अध्यापकः । अहो, अत्यल्पेन कालेन श्रीमता विलिखितम् ! वाच्यताम् ।

माधवः । अन्धकार दूरं अभवत् । गगननिर्मलं अभवत् । निर्मलवायु अप्रवहत् । नद्यः धीरं अप्रवहन्ति । अधुना तारका जार्जल्यमानं अभवन् ।

अध्यापकः । अहो अद्य सफलो मे परिश्रमः । परमार्थत एवाज्ञानान्धकारो दूरीकृतो मया श्रीमतो मानसात् । तद् विद्यावारिधिबिरुदेन सम्भावयामि भवन्तम् । अद्य प्रभृति भवान् विद्यावारिधिरिति प्रथितः स्यात्, यच्च त्वयोच्यत तदेव शुद्धतया संस्कृततया च गणयिष्यते । यादव, किंवा भवता विलिखितम् ?

यादवः । सुधांशु समागतम् । अन्धकारं अपलायत—

अध्यापकः । वत्स, अत्रैव विरामोऽस्तु । श्रीमतोऽपि पाण्डित्यमनितरसाधारणम् । परं श्रीमतां रसनिर्भरवचनावलीश्रवणन रसाधिक्याच्छिरोवेदना मे सञ्जाता । विद्यापारावारबिरुदेन भवन्तं सम्भावयामि । वत्स, विचरेदानीं संसारकाननं यथासुखम् । पलायस्व मत्समीपात् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम् ॥

मञ्जूषा

श्रीक्षितीशचन्द्र-चट्टोपाध्यायेन सम्पादिता ।

पञ्चम-वर्षम्

आश्विन १८१२--भाद्र १८७३
September 1950—August 1951.

श्रीविश्वनाथ-चट्टोपाध्यायः
८१, श्यामबाजार स्ट्रीट्, कलिकाता—४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मञ्जूषायाः पञ्चमवर्षस्य संक्षिप्तं सूचीपत्रम्

आभाणकसुभाषितादि

आभाणकादि—३, ३७, ८१, ११६, १४४, १७७, २२५, २५७, २८९

उपदेशरत्नम्—३५

कण्वचरितम्—२३०

गेटे-कविसुभाषितानि—१३

भामतीरत्नसंग्रहः—३८

भारतरत्नसंग्रहः—११३, १४६

सर्वः कान्तमात्मीयं पश्यति—१४६

सुभाषितम् (प्राचीनम्)—२२६

कथा:

परित्यक्ता—२०९

प्रतिज्ञापूरणम्—२४८, २६४

प्रेमरसोद्रेकः—३९

सीमासमस्या—८२, १३३, १४१, १८८, २३४

कथिकाः

१। अपूर्वा युक्तिः ५

२। साहित्यस्य साम्राज्यम् ५

३। अहो कलिकालः ५

४। प्रत्यवायः १८

५। कथाकोषः २०, ९४

६। पत्न्या उपयोगः ५२

७। पारमार्थिकं गणितज्ञानम् १०८

८। परम्परया सम्बन्धः १०८

९। हा भगवन्नग्ने त्वमपि तमाखवे स्पृहयसि १५०

१०। सिञ्च व्यञ्जनावृत्तेस्तिलोदकम् १५१

११। परमं प्रमाणम् १८०

१२। आत्मानं विद्धि १८०

१३। पाणिनीया पद्धतिः १८०

१४। जामातृसंशोधनम् २४३

१५। जामातुर्वैचक्षण्यम् २९१

१६। शिक्षकस्य दुर्दैवम् २९०

कविता

खद्योतः ५१

अनुवादः ९६

अन्योक्तिचतुष्कम् १५३

युद्धप्रशमनप्रार्थना १८२

नूनं द्राक्षा रुक्षा २२६

गण-नामानि १५७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गाथा
- धार्मिको नरपतिः ५२
- "दधिमानय" ५६
- सप्तकुमारिका ५८
- कपटसाधोवृ त्तम् १०३
- उत्तमस्य विशेषेण कलङ्कोत्पादको जनः १२०
- मार्जारमूर्खः २५८

घण्टापथविमर्शः २९७

पाठविमर्शः
- यजुष्युरः (पा० ६।१।११७) ३०
- क्रोधी शाम्यति ५०
- प्रायः पुण्यवता देशे
- शरदियं प्रावृषायते (दुर्घटवृत्तिः ३।१।१११) ९५
- शिरो मे शीर्यते मुखम् (महाभाष्य ६।१।६१) २३३
- आत्मनश्च पूरणे (पा० ६।३।६)

पाणिनि-कात्यायन-पतञ्जलयः-२८३

पाणिनिसूत्राणां पाठभेदाः—२७९

पाणिनेर्महत्त्वम्—२४४

पुस्तक-परिचयः—३१, ७६, १०९, १३६, १७४, २५४

भारविः—२८५

महाभाष्यम्—(आङ्लानुवादादिहितम्) ८-११-संख्यायाम् १-१६, १२-संख्यायां १७—३२

महाभाष्यम्—२५, १६४ (परोक्षे लिट्), १९३ (पितृव्य-मातुल—)

रसमञ्जरी—
- १। वधूवरम्—१५
- २। कस्मै हितो विवाहोऽत्र कन्यायै वा वराय वा—१४
- ३। किंसखेत्य वैज्ञानिकं व्याख्यानम्—१७२
- ४। Arabian nights—२५३
- ५। Language as fossil history २८७
- ६। संस्कृतरचनानैपुण्यम् ३००

वर्णचिकित्सा ६३

वदार्थविमर्शः २९३

व्याकरण-विमर्शः
- परःशतशब्दः ५, ८३
- सूनृता १९
- अनुबन्धाः ६५, २४७
- भ्रातृव्यः ७१
- आङो दोऽनास्यविहरणे—वैज्ञानिकं व्याख्यानम्—१०६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

टिठन्प्रत्ययः (पा० ४।४।६७)—११७
हेतुकरणविवेकः—१२६
व्यक्तिविवेकः—१५४
अनुजज्ञे (भट्टि १।२३)—१८४
The S'ivasūtras and the Sanskrit Alphabet (no. 7) 1-14, (no. 8) 17-30
श्रीशिवनाड़ीहोराशास्त्रम् ९९
संस्कृतप्रतिशब्दः
Horse-power—५५
सायणभाष्य-पाठविमर्शः
१३७, १४९, १९६, २४५, २७३
स्तोत्रादिकम्
उषःसूक्तम् १७८
ऋग्वेदसूक्तानि २२, ४८, १२४, २४२, २९२
तत्त्वमसि १४७
पारसीकानां मन्त्ररत्नानि ७२, हओमो यश्त् २८, २७, १५३, २०२, २५३, २६३
प्राचीनानि खृष्टीयस्तोत्राणि २०४, २४, २३०, २६०
मङ्गलाचरणम् १
रवीन्द्रनाथस्य (१) नमामि नमामि ३
(२) वितर कृपामयि दीनबन्धो ३४
हिन्दुधर्मस्य कुत्साकीर्तनम् ७१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रधानयागाद् पूर्वमिज्यन्ते यैस्ते प्रयाजाः, इष्टिषु पञ्च पशुयागेष्वेकादश।

"The ceremony of re-establishment is prescribed in cases where the fire brings the sacrificer no luck. The old fires are allowed to go out, and, after a break of three days to a year, new fires are established in much the same way as before, but the fire is nourished when produced with Kus´a grass, not with wood. In the fore- and after-offerings which are part of the rite the use of different forms, Vibhakti, of the word Agni is expressly enjoined, doubtless to secure the special attention of the god to the new fires." KEITH, *Religion and Philosophy of the Vedas and Upanishads*, p. 317.

Ordinarily the mantras for the five Prayājas are: समिधोऽग्न आज्यस्य व्यन्तु (वियन्तु), तनूनपादग्न आज्यस्य वेतु, इड़ोऽग्न आज्यस्य व्यन्तु (वियन्तु), बर्हिरग्न आज्यस्य वेतु, स्वाहाग्न आज्यस्य वेतु. Of these the last mantra is to remain as it is. In the other four mantras we have to use the Vocative, Locative, Instrumental and Accusative singular forms of the word Agni immediately before the vocative 'Agne'. Thus the first four mantras in the fore-offerings of the "Punarādheyeṣṭi" will be समिधोऽग्नेऽग्न आज्यस्य वियन्तु, तनूनपादग्नावग्न आज्यस्य वेतु, इडो अग्निनाग्न आज्यस्य वियन्तु, बर्हिरग्निमग्न आज्यस्य वेतु*.

विभक्तयो भवन्ति and विभक्तिं करोति occur in TS. i. 5. 2. 1-2.

---

*This is from Sāyaṇa's commentary on the Taittirīya-Saṁhitā. The Ās'valāyana S'rauta-sūtra [ii. 8] says:

आधानाद् यद्यामयावी, यदि वार्था व्यथेरन् पुनराधेय इष्टिः। तस्यां प्रयाजानुयानान् विभक्तिभिर्यजेत्। समिधः समिधोऽग्नेऽग्न आज्यस्य व्यन्तु, तनूनपादग्निमग्न आज्यस्य वेतु। इलो अग्निनाग्न आज्यस्य व्यन्तु। बर्हिरग्निरग्न आज्यस्य वेत्विति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यो वा इमाम्—

यो वा इमां पदशः स्वरशोऽक्षरशश्च वाचं विदधाति स आर्त्विजीनो भवति। आर्त्विजानाः स्यामेत्यध्येयं व्याकरणम्। यो वा इमाम्।

"Yo vā imām." Whoever utters this speech correctly, word by word, accent by accent, syllable by syllable, becomes fit to perform sacrifice or to officiate as a priest in sacrifices. "Yo vā imām" (is thus explained).

आर्त्विजीन—is formed by adding खञ् to ऋत्विज् acc. to the rule यज्ञर्त्विग्भ्यां घ-खञौ v. 1. 71 and means 'a person deserving (of the services) of a priest i.e. the यजमान himself; it is also formed acc. to the Vārttika: यज्ञर्त्विग्भ्यां तत्कर्मार्हतीत्युपसंख्यानम् v. 1. 71. 1 and means 'fit for priestly duties'. Here both senses may have been intended.

'ऋत्विजमर्हति' इति 'ऋत्विक्कर्मार्हति' इति च व्युत्पत्त्या आर्त्मिजीनपदं याज्ययाजकोभयपरम्। व्याकरणसिद्धान्तसुधानिधिः।

पदशः—पदं पदमिति। "संख्यैकवचनाच्च वीप्सायाम्" [५।४।४३] इति शस्।

चत्वारि—

चत्वारि शृङ्गा त्रयो अस्य पादाः
द्वे शीर्षे सप्त हस्तासो अस्य
त्रिधा बद्धो वृषभो रोरवीति
महो देवो मर्त्यां आ विवेश॥ [ऋ० सं० ४।५८।३]

"चत्वारि शृङ्गा"णि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च। "त्रयो अस्य पादाः" त्रयः काला भूतभविष्यद्वर्त्तमानाः। "द्वे शीर्षे" द्वौ शब्दात्मानौ नित्यः कार्यश्च। "सप्त हस्तासो अस्य"—सप्त विभक्तयः। "त्रिधा बद्धः" त्रिषु स्थानेषु बद्धः—उरसि कण्ठे शिरसीति। "वृषभो" वर्षणात्। "रोरवीति" शब्दं करोति। कुत

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतत् ? रौतिः शब्दकर्मा। "मह्रो देवो मर्त्यां आ विवेश" इति—महान् देवः शब्दः। मर्त्या मरणधर्माणो मनुष्यास्तान् आविवेश। महता देवेन नः साम्य यथा स्यादित्यध्येयं व्याकरणम्।

"Catvāri." Four horns and three feet are his; two heads and seven hands are his. Bound three-fold the bull bellows loudly. The great God has entered the mortals.

"Four horns"—four parts of speech, nouns and verbs, prepositions and particles. "Three feet are his"—the three divisions of time viz., past, future and present. "Two heads" —two kinds of words—eternal and artificial. "Bound threefold"—bound in three places viz. chest, throat and head. Vṛṣabha is so called from showering. Roravīti—roars. How is this? The root *ru* means to roar, to bellow. "Maho devo martyā ā vives'a." The great God is Sound. "Martyāḥ" means mortal men, he entered them. We should study grammar so that we may be like the great God.

रोरवीति—Intens. pr. of *ru* 'to cry'. मर्त्यॉं—Final *n* before आ is changed into ँ in RV. आतोऽटि नित्यम् viii. 3. 3.

"चत्वारि शृङ्गेति वेदा वा एत उक्ताः। "त्रयो अस्य पादाः" इति सवनानि त्रीणि। "द्वे शीर्षे" प्रायणीयोदयनीये। "सप्त हस्तासः" सप्त छन्दांसि। "त्रिधा बद्धः" त्रेधा बद्धो मन्त्र-ब्राह्मण-कल्पैः। "वृषभो रोरवीति" रोरवणमस्य सवनक्रमेण ऋग्भिर्यजुर्भिः सामभिः यदेनमृग्भिः शंसन्ति, यजुर्भिर्यजन्ति, सामभिः स्तुवन्ति। "महो देवः" इत्येष हि महान् देवः यद् यज्ञः "मर्त्यॉं आविवेश" इत्येष हि मनुष्यानाविशति यजनाय। निरुक्तपरिशिष्टम् १३।७।

This stanza has been explained by the adherents of different schools in different ways, but Soma is evidently the the great God mentioned here. In the first place, the hymn is addressed to Soma. Secondly, Soma is often spoken of as entering mortals; e. g., अमर्त्यो मर्त्यॉं आविवेश RV. viii. 48. 12. Thirdly, the sound made by the trickling Soma is often

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

alluded to, generally in hyperbolical language, with verbs meaning to roar or bellow, or even thunder; he is thus commonly called bull among waters, which figure as cows' (Macdonell).

Acc. to the Nirukta Paris'iṣṭa the great God is the sacrifice. Acc. to the Mahābhāṣya He is S'abda. Acc. to Kumārila Bhaṭṭa He is the Sun.

See Sāyaṇa on RV. 4. 58. 3, Uvaṭa and Mahīdhara on VS. 7. 91, Tantravārttika i. 2. 38.

द्वौ शब्दात्मानौ नित्यः कार्यश्च—अथवा जातिर्व्यक्तिश्चेति, अथवा स्फोटो ध्वनिश्च । सप्त विभक्तयः स्वादयः । अथवा सह शेषेण कारकाणि ।

All printed editions read नामाख्यातोपसर्गनिपाताश्च here and Kielhorn notes no variant. But the particle is superfluous and there is no reason why we should have a redundant ca in prose. The Nirukta which is the source of this sentence has नामाख्याते चोपसर्गनिपाताश्च (i. 1. 8, i. 12. 1, Paris'iṣṭa xiii.9) Medhātithi has नामाख्याते चोपसर्गनिपाताश्च under Manu i. 81.

A passage in the Timaes (75 D) mentions the 'teeth' 'tongue' and 'lips' as producing the river of speech which is the fairest and noblest of all streams. SANDYS i. 89.

Cf. वाचा त्रिस्थानव्यञ्जनस्थया Rāmāyaṇa iv. 3. 33.

नामाख्यातनिपातोपसर्गशृङ्गस्त्रिकालपात् ।
कार्यताव्यङ्ग्यतामूर्धा शब्दः सप्तविभक्तिदोः ॥
उरःकण्ठशिरोबद्धो वृषभः कामवर्षणात् ।
महान् देवो महत्त्वाय ज्ञातः स्यादिति च श्रुतिः ॥
नामाख्यातनिपातोपसर्गाञ्जानन्ति शाब्दिकाः ।
एककस्य चतुर्थांशमन्ये विद्वांस इत्यपि ॥

अपर आह—

चत्वारि वाक् परिमिता पदानि
तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति
तुरीयं वाचो मनुष्या वदन्ति ॥ [ऋ० सं० १।१६४।४५]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"चत्वारि वाक् परिमिता पदानि" चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च । "तानि विदुर्ब्राह्मणा ये मनीषिणः" मनस ईषिणो मनीषिणः । "गुहा त्रीणि निहिता नेङ्गयन्ति" गुहायां त्रीणि निहितानि नेङ्गयन्ति न चेष्टन्ते न निमिषन्तीत्यर्थः । "तुरीयं वाचो मनुष्या वदन्ति" तुरीयं वा एतद्वाचो यन्मनुष्येषु वर्त्तते चतुर्थमित्यर्थः ॥ चत्वारि ।

Another says : Speech is measured in four quarters, the Brāhmaṇas who are wise know them. Three (of these quarters) are hidden and do not bestir themselves. Men speak the fourth quarter of speech.

Speech is measured in four quarters—four parts of speech—Nouns and Verbs, Prepositions and Particles. "The Brāhmaṇas who are wise know them." Manīṣiṇaḥ is "manasaḥ īṣiṇaḥ" those who escape from the toils of their minds, or those who have attacked and conquered their minds. Three are placed in the cave and do not bestir themselves. The sense is : they do not move, do not wink. "The fourth quarter of speech men speak." It is the fourth quarter of speech that is current among men "Turīya" means "fourth". "Catvāri" is thus explained.

नेङ्गयन्ति . . . न प्रकाशन्ते । अन्नंभट्टः ।

Cf. S'. B. IV. 1. 3. 16 स होवाच तुरीयं चेन्मामसबोभुजस्तुरीयमेव तर्हि वाङ् निरुक्तं वदिष्यतीति, तदेतत् तुरीयं वाचो निरुक्तं यन्मनुष्या वदन्ति, अथैतत् तुरीयं वाचोऽनिरुक्तं यत् पशवो वदन्त्यथैतत् तुरीयं वाचोऽनिरुक्तं यद्वयांसि वदन्त्यथैतत् तुरीयं वाचोऽनिरुक्तं यदिदं क्षुद्रं सरीसृपं वदति ॥

"कतमानि तानि चत्वारि पदानि ? (१) ओङ्कारो महाव्याहृतयश्चेत्यार्षम् । (२) नामाख्याते चोपसर्गनिपाताश्चेति वैयाकरणाः । (३) मन्त्रः कल्पो ब्राह्मणं चतुर्थी व्यावहारिकीति याज्ञिकाः । (४) ऋचो यजूंषि सामानि चतुर्थी व्यावहारिकीति नैरुक्ताः । (५) सर्पाणां वाग्, वयसां, क्षुद्रस्य सरीसृपस्य, चतुर्थी व्यावहारिकीत्येके । (६) पशुषु तूणवेषु मृगेष्वात्मनि चेत्यात्मप्रवादाः । अथापि ब्राह्मणं भवति —सा वै वाक् सृष्टा चतुर्धा व्यभवत् , एष्वेव लोकेषु त्रीणि, पशुषु तुरीयम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

या पृथिव्यां साग्नौ सा रथन्तरे। यान्तरिक्षे सा वायौ सा वामदेव्ये। या दिवि सादित्ये, सा बृहति, सा स्तनयित्नौ। अथ पशुषु ततो या वागत्यरिच्यत तां ब्राह्मणेष्वदधुः, तस्माद् ब्राह्मणा उभयीं वाचं वदन्ति, या च देवानां या च मनुष्याणामिति*। निरुक्त-परिशिष्टम् १।३।९

On the two explanations of *catvāri* Annaṁbhaṭṭa says:

यद्यपि भाष्यकारस्येदं प्रयोजनानुक्रमणं नान्यदीयं येन व्याख्यानद्वयं भाष्यकारस्य युज्येत, तथापि 'चत्वारि शृङ्गा' इति 'चत्वारि वाक्' इति वा पठनीये चत्वारीति मन्त्रद्वयाभिप्रायेण भाष्यकारेणैवं पठितमित्याशयः। भाष्यात् पूर्वं निबन्धेष्विदं प्रयोजनानुक्रमणम् इत्यपि केचित्।

"Gu'hā" is in reality the inst. sing. of *guh* 'concealment' with adverbial shift of accent and means 'concealed'. Cf. *divā*. The Bhāṣyakāra regards "gúhā" as the loc. sing. of the ā-stem "guhā" with the elision of the ending acc. to "supāṁ su-luk..." vii. 1. 39

तुरीयम् has become rather obscure, so it is explained even in the Brāhmaṇas as "caturtha". The original stem was **quatur*. From the strong grade we get *caturtha* and from the weak grade we get by syncopation of the final syllable "turīya" in Sanskrit and "tūirya" in the Avesta (for *kturīya* and *ktūirya* respectively). Under favourable circumstances the initial consonant reappears in the Avesta. Thus we have *ā-xtūirīm* (lit. up to the fourth time) four times.

---

* The language of the Gods is in some respects different from the language of men. Thus we find in the Aitareya Brāhmaṇa: यद्वै देवानां नेति तदेषामोमिति, what is 'no' for the Gods is 'yes' for these i. e. men. Similarly in the Avesta we have a whole series of Daeva and Ahura words. 'Daeva' is the same word as 'deva' and 'Ahura' as 'asura' but with opposite meanings. The "daeva" words are used of the devils and their creation and the "ahura" words of the creation of the Good Spirit.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनीषिणः—ईषन्ति ते ईषिणः, औणादिक इनिः कर्तरि। शकन्ध्वादित्वात् पररूपम्। मनस इति कर्मणि षष्ठी। सुप्यजातौ इत्यस्य तु न प्राप्तिः, मनः-शब्दस्य जातिवाचकत्वात्॥ छाया। Annaṁbhaṭṭa reads मनस ईशिनः and explains Kaiya'a's मनीषिशब्दः पृषोदरादित्वात् साधुः thus : तस्याकृतिगणत्वादसुनो लोपः शकारस्य च षकारः। Nāges'a says : चित्तशुद्धिक्रमेण वशीकर्तारो विषयान्तरेभ्यो व्यावृत्त्या हिंसका वा। Acc. to Western scholars the agent suffix "sa" has been added to the root "man" with the connenting vowel "i" to form "manīṣā".

उत त्वः—

उत त्वः पश्यन्न ददर्श वाच-
मुत त्वः शृण्वन्न शृणोत्येनाम्।
उतो त्वस्मै तन्वं विसस्रे
जायेव पत्य उशती सुवासाः॥ [ऋ० सं० १०।७१।४]

'उत त्वः अपि खल्वेकः पश्यन्नपि न पश्यति वाचम्, अपि खल्वेकः शृण्वन्नपि न शृणोत्येनामित्यविद्वांसमाहार्धम्। उतो त्वस्मै तन्वं विसस्रे तनुं विवृणुते। जायेव पत्य उशती सुवासाः। तद् यथा जाया पत्ये कामयमाना सुवासाः स्वम् आत्मानं विवृणुते, एवं वाग् वाग्विदे स्वात्मानं विवृणुते। वाङ् नो विवृणुयादात्मानमित्यध्येयं व्याकरणम्। उत त्वः।

"Uta tvaḥ." And one seeing does not see speech, and one hearing does not hear it. And to another she unfolds her body, like a well-dressed and loving wife to her husband.

"And one though seeing does not see speech, and one though hearing does not hear it." This hemistich refers to the ignorant man. "And to one she unfolds her body", she reveals her body. Just as a wife filled with sexual desire, beautifully dressed, discloses herself to her husband, even so speech discloses herself to the man who is learned

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

in speech. We should study grammar so that speech may reveal herself to us. "Uta tvaḥ" (is thus explained).

सक्तुमिव—

सक्तुमिव तितउना पुनन्तो
यत्र धीरा मनसा वाचमक्रत ।
अत्रा सखायः सख्यानि जानते
भद्रैषां लक्ष्मीर्निहिताधि वाचि ॥ [ऋ० स० १०।७१।२]

सक्तुः सचतेर्दुर्धावो भवति, कसतेर्वा विपरीताद् विकसितो भवति। तितउ परिपवनं भवति ततवद्वा तुन्नवद्वा । धीरा ध्यानवन्तः । मनसा प्रज्ञानेन । वाचमक्रत वाचमकृषत । "अत्रा सखायः सख्यानि जानते" अत्र सखायः सन्तः सख्यानि जानते । क्व ? य एष दुर्गो मार्गः, एकगम्यो वाग्विषयः । के पुनस्ते ? वैयाकरणाः । कुत एतत् ? "भद्रैषां लक्ष्मीर्निहिताधि वाचि" एषां वाचि भद्रा लक्ष्मीर्निहिता भवति। लक्ष्मीर्लक्षणाद्भासनात् परिवृढा भवति । सक्तुमिव ।

"Saktum iva" "Where the wise have uttered speech after sifting it with their minds, as if winnowing grain in a sieve, these friends recognize friendships ; the blessed mark is impressed on their speech."

"Saktuḥ" is derived from the root *sac* (to cling) ; it is difficult to wash, or from *kas* (to shine) by metathesis : it is fully blown. "Titau" is a sieve, because it has a hide, or because it is full of holes. "Dhīrāḥ" great thinkers. "Manasā" with their mind i. e., with their intellect. "Vācam akrata" means "vācam akṛṣata" made speech. There friends recognize friendships. Where ? In this path which is difficult to traverse—the province of speech which only one individual can pass. Who are they i. e., those friends ? Those who are well-read in Grammar. How is this ? "Bhadraiṣāṃ lakṣmīr nihitādhi vāci" i. e., eṣām vāci bhadrā

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

lakṣmīr nihitā. In their speech the blessed mark is impressed. Lakṣmī is so called from indicating, from shining, she becomes strong. "Saktum iva" is thus explained.

"सक्तुः सचतेः।"। स हि सूक्ष्मत्वात् सचति संश्लिष्यात अङ्गे। ततः "दुर्धावो भवति" इत्युपपत्तिः। दुःखं धाव्यते प्रक्षाल्यते इत्यर्थः। "कसतेर्वा स्याद् विपरीतस्य।" स हि विकसितः विपुष्पितो भवति। दुर्गः।

तितउ इत्यनवगतम्। परिपवनमभिधेयम्। परिपूयतेऽनेनेति। यल्लोके चालनमिति प्रसिद्धम्। तच्च क्वचित् चर्म क्वचित् विदलं सर्वथा ततेन मध्ये तुन्नैश्छिद्रैस्तिलमात्रैश्च तद्वत्। ... तनोतेर्निष्ठायां मतुपि उपधाया इकारो वकारस्य सम्प्रसारणं परलोपश्च। महेश्वरः।

"Saktu" is derived probably from *sanj* 'to adhere'. The derivation of "titau" is doubtful. Wackernagel (Alt-indische Grammatik I, 37 b) holds that the word is derived from *taṃs* 'to shake' and was originally *titaṃsu*. The elision of the *s* shows that the word was borrowed from an Iranian dialect. Bradke derives it from *tak* 'to move precipitately' and thinks that the word was originally *titaku*. Acc. to Fick the word was *titavu* from *tva* 'to sift'.

सारस्वतीम्—

याज्ञिकाः पठन्ति—"आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेद्" इति। प्रायश्चित्तीया मा भूमेत्यध्येयं व्याकरणम्। सारस्वतीम्।

"Sārasvatīm". Ritualists read : One who has placed the sacrificial fire on the altar shall perform the expiatory ceremony Sārasvatī Iṣṭi (sacrifice consecrated to Sarasvatī), if he happens to use a corrupt word. We should study Grammar so that we may not become liable to perform expiatory ceremonies. "Sārasvatī" is thus explained.

प्रायश्चित्तीयाम्—भवार्थे "वृद्धाच्छः" | ४।२।११४]। प्रायश्चित्तीयाः—प्रायश्चित्ताय पापशोधनाय श्रुतिस्मृतिविहिताय कर्मणे हिताः, तन्निमित्तोत्पादना

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मा भूम । कैयटः । प्रायश्चित्ताय हिताः इत्यर्थे "प्राक् क्रीताच्छः" [५।१।१]..। प्रायश्चित्तनिमित्तमपभाषणम् , तदुत्पादका अपशब्दभाषका मा भूमेत्यर्थः। अन्नंभट्टः । अत्र प्रायश्चित्तपदमन्तःकरणशुद्धिपरम् । छाया ।

दशम्यां पुत्रस्य —

याज्ञिकाः पठन्ति —"दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्याद् घोषवदाद्यन्तरन्तःस्थमवृद्धं त्रिपुरुषानूकमनरि प्रतिष्ठितम् । तद्धि प्रतिष्ठिततमं भवति । द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्य्यान्न तद्धितम्" इति । न चान्तरेण व्याकरणं कृतस्तद्धिता वा शक्या विज्ञातुम्। दशम्यां पुत्रस्य ।

"Das'amyām putrasya" (of the son on the tenth day). Ritualists read : One should name his son on the tenth day from his birth. The name should begin with a voiced letter and should have a semi-vowel in the middle. It must not contain the Vṛddhi vowels *ā*, *ai* or *au* at the beginning. It should go back to *i e.* resemble the names of three ancestors* and should not be one current among his enemies. For such a name becomes most thriving. The name given should consist of two or four syllables and should be formed with a Kṛt (primary) and not with a Taddhita (secondary) suffix. And without a knowledge of Grammar Kṛt and Taddhita cannot be distinguished. "Das'amyām putrasya" (is thus explained).

We do not get this quotation in the form in which it occurs here.

नाम चास्मै दद्युः । घोषवदाद्यन्तरन्तस्थमभिनिष्टानान्तं द्व्यक्षरं चतुरक्षरं ब्रह्मवर्चसकामः । युग्मानि त्वेव पुंसाम् । अयुजानि स्त्रीणाम् । आश्वलायन-गृह्यसूत्र १।१३।५-९ ।

दशम्यामुत्थाप्य ब्राह्मणान् भोजयित्वा पिता नाम करोति। द्व्यक्षरं चतुरक्षरं

*Father, grand-father and great-grand-father.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वा घोषवदाद्यन्तरन्तस्थं दीर्घाभिनिष्टानं कृतं कुर्यान्न तद्धितम्। अयुजाक्षरमाकारान्तं स्त्रियै तद्धितम्। पारस्करगृह्यसूत्र १।१७।१-३

दशम्यां द्वादश्यां वा नामकरणम्।...द्व्यक्षरं चतुरक्षरं षडक्षरमष्टाक्षरं वा। घोषवदाद्यन्तरन्तस्थं दीर्घाभिनिष्टानान्तम्। अपि वा यस्मिन् स्वित्युपसर्गः स्यात् तद्धि प्रतिष्ठितमिति विज्ञायते। ऋष्यणूकं देवताणूकं वा। यथा चैषां पूर्वपुरुषाणां नामानि स्युः। बोधायनगृह्यसूत्र २।१।२-२९

द्व्यक्षरं चतुरक्षरं वा नामपूर्वमाख्यातोत्तरं दीर्घाभिनिष्टानान्तं घोषवदाद्यन्तरन्तस्थम्। आपस्तम्बगृह्यसूत्र ६।१५।९

जननाद्दशरात्रे व्युष्टे शतरात्रे संवत्सरे वा नामधेयकरणम्।...घोषवदाद्यन्तरन्तस्थं दीर्घाभिनिष्टानान्तं कृतं नाम दध्यात्। एतदतद्धितम्। अयुग्दान्तं स्त्रीणाम्। गोभिलगृह्यसूत्रम्। २।८८-१६

दशमेऽहनि...कुमारस्य पिता द्वे नामनी कारयेन्नाक्षत्रिकं नामाभिप्रायिकं च। तत्राभिप्रायिकं घोषवदाद्यन्तस्थान्तमूष्मान्तं वावृद्धं त्रिपुरुषानूकमनरप्रतिष्ठितम् *, नाक्षत्रिकं तु नक्षत्रदेवतासमानाख्यां द्व्यक्षरं चतुरक्षरं वा। चरकसंहिता।

तच्च घोषवदाद्यन्तरन्तस्थ चतुरक्षरम्।
द्व्यक्षरं कृत्प्रत्ययान्तं विसर्गान्तमतद्धितम्॥

Kaiyaṭa explains त्रिपुरुषानूकम् thus : नामकरणे योऽधिकारी पिता तस्य ये त्रयः पुरुषास्ताननुकायति अभिधत्ते इति त्रिपुरुषानूकम्। अन्येषामपि दृश्यते इति दीर्घः। Annambhaṭṭa says: त्रित्वयुक्ताः पुरुषाः त्रिपुरुषा इति विग्रहः, तेन ताननुकायतीति विग्रहोपपत्तिः। अत्र मूलविभुजादित्वात् कः, न तु आतोऽनुपसर्गे इत्यनेन, अनुपसर्ग इति प्रतिषेधात्। केचित्तु तात्पर्यकथनमेतत्, न विग्रहवाक्यम्, अनुकायतीति आतश्चोपसर्ग इति कः। त्रयाणां पुरुषाणां समाहारस्त्रिपुरुषम्। पात्रादित्वान्न स्त्रीत्वम्। त्रिपुरुषानूकमिति षष्ठीसमास इत्याहुः। अत्र कृत्तद्धितसंज्ञयोर्व्याकरणेऽपि पूर्वसिद्धयोरेवोपादानान्न व्याकरणापेक्षेति न वाच्यम्, पूर्वसिद्धिर्व्याकरणान्तरे, न तु लोके शास्त्रान्तरे वा। तथाच व्याकरणापेक्षावश्यक्येव। Nāges'a says: त्रिपुरुषानूकम्। त्रिपुरुषशब्देन द्विगुः। मूलविभुजादित्वात् कः। Similarly under एवं हि याज्ञिकाः पठन्ति दशपुरुषानूकं यस्य गृहे शूद्रा न विद्येरन् स सोमं पिबेदिति (महाभाष्य ४।१।९३।५) Kaiyaṭa

* The printed text has अनवप्रतिष्ठितम् which is due to the extreme similarity of the letters र and व in Bengali script,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

says : अनुपूर्वात् कायतेरनूकानमनूक इति। घञर्थे कविधानमिति कः। अन्येषामपीति दीर्घत्वम्। दशपुरुषा अस्मिन्ननूके इति बहुव्रीहिः। दशपुरुषोऽनूकोऽस्मिन्निति पुनर्बहुव्रीहिः दशपुरुषानुसंशब्दनं दशसु पुरुषेष्विति यावत्। Nages'a explains : अनूकानं शब्दः। अनूकोऽस्मिन्निति। शब्दोऽन्यपदार्थः। अनूकोऽस्मिन्निति। वाचकत्वेनेत्यर्थः। दशपुरुषसमुदायोऽन्यपदार्थः। तत् फलितमाह—दशपुरुषानुसंशब्दनमिति। भाष्ये दशपुरुषानूकमिति यावद्योगे द्वितीया।

These explanations appear to be extremly fanciful.

दशम्युत्तरकालमिति। दशम्या उत्तर इति "पञ्चमी" [२।१।३७] इति योगविभागात् समासः। ततः कालशब्देन बहुव्रीहिः। क्रियाविशेषणं चैतत्। दश दिनान्यशौचं भवतीति दशम्युत्तरकालमित्युक्तम्। येऽपि गृह्यकाराः पठन्ति दशम्यां पुत्रस्येति, तैरपि दशम्यामिति सामीपिकमधिकरणं व्याख्येयम्। घोषवदादि। घोषवन्तो ये वर्णाः शिक्षायां प्रदर्शितास्तदादि। अन्तरन्तःस्थम् मध्ये यरलवा यस्य तदित्यर्थः। कैयटः। "दशम्यां पुत्रस्य" इत्यनुक्रम्य "दशम्युत्तरकालम्" इति पाठान्तरमाश्रितम्। तत्र व्याख्यानपूर्वकं तात्पर्यमाह—दशम्याम् इति। योगेति। भयादिषूत्तरशब्दाभावादित्यर्थः। [सुप्सुपेति तु युक्तम्। उद्द्योतः] तत इति। दशम्युत्तरः कालो यस्मिन्निति बहुव्रीहिः। नामविशेषणत्वासम्भवादाह—क्रियेति। पाठान्तरस्वीकारे प्रयोजनमाह—दशेति। दशम्यामिति पाठस्यासाधुत्वं निराह—येऽपीति। सामीपिकमिति। दशमीसमीपे दशम्युत्तरदिने इत्यर्थः। नवमदिनस्यापि तत्समीपत्वाद्दशम्यामतीतायामित्यध्याहारसूचनाय भाष्ये पाठान्तरानुसरणमिति ज्ञेयम्। घोषवदक्षरम् [हश्] आदौ यस्य तत् घोषवदादि। अन्तर्मध्येऽन्तस्थं [यण्] यस्य तत् अन्तरन्तस्थम्। अन्नंभट्टः। अन्तस्थाशब्द आकारान्तः। छाया।

अनरीति असमनुष्ये अरिभिन्ने इति वार्थः। नागेशः। असमनुष्ये इति देवतादौ पर्यवसितमित्यर्थः। यद्वा अरौ प्रतिष्ठितं न भवतीत्यर्थः। तत्फलितमाह—अरिभिन्ने इति। मित्रादावित्यर्थः। छाया।

एतदुक्तं भवति—नामकरणसंस्कारादारभ्य व्याकरणमुपयुज्यत इति।

सुदेवो असि—

सुदेवो असि वरुण यस्य ते सप्त सिन्धवः।
अनु क्षरन्ति काकुदं सूर्म्यं सुषिरामिव॥ [ऋ० सं० ८।६९।१२]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुदेवो असि वरुण सत्यदेवोऽसि। यस्य ते सप्त सिन्धवः सप्त विभक्तयः अनुक्षरन्ति काकुदम् । काकुदं तालु । काकु जिह्वा सास्मिन्नुद्यत इति काकुदम् । सूर्म्यं सुषिरामिव । तद् यथा शोभनाम् ऊर्मिं सुषिरामग्निरन्तः प्रविश्य दहति, एवं ते सप्त सिन्धवः सप्त विभक्तयस्ताल्वनुक्षरन्ति । तेनासि सत्यदेवः । सत्यदेवाः स्यामेत्यध्येयं व्याकरणम् । सुदेवो असि ।

"Sudevo asi." O Varuṇa, thou art a gracious God into whose palate flow the seven rivers as into a hollow channel. "Thou art a gracious God"—thou art a true God. "Whose your seven rivers"—seven case-endings. "Flow into the palate"—*Kākuda* is *tālu* or palate, for *kāku* is the tongue, and the tongue is thrown upwards into the palate. "As into a hollow channel." Just as fire entering into a nice hollow reed burns it, so the seven rivers—seven case-endings flow along the palate. Therefore thou art a true God. We should study Grammar so that we may be true Gods. "Sudevo asi" (is thus explained).

Bhartṛhari says : त्वं सत्यदेवः . . . . . . यस्माद् व्याकरणज्ञानात् , अतः पठितव्यमिति । Bhaṭṭoji says : यथा सच्छिद्रां लोहमयीं प्रतिमां प्रविश्याग्निः प्रकाशते तथेति । अग्निर्हि तत्रत्यं मलं भस्मीकृत्य प्रतिमां शुद्धां करोति, तथा विभक्तयोऽपि शारीरं पापमपाकुर्वन्तीति भावः । सूर्मी स्थूणायःप्रतिमेत्यमरः । स्मर्यते च—सूर्मीं ज्वलन्तीमालिङ्गेन्मृत्यवे गुरुतल्पग इति । अमि पूर्वः [६।१।१०७] इत्यत्र "वा छन्दसी"त्यनुवृत्तेर्यणादेशः । सुषिरामित्यत्रार्श आद्यच् [५।२।१२७] अभेदोपचारो वेत्याहुः । वस्तुतस्तु ऊषसुषिमुष्कमधो रः [५।२।१०७] इति मत्वर्थीयो रप्रत्ययः । Annaṁbhaṭṭa explains *d* : भाष्ये ऊर्मिं सुषिराम् । ऊर्मितुल्यां सुषिराम् । सुषिरस्य प्रवेशनकर्मत्वे दहनकर्म किञ्चिदध्याहार्यम् । सुषिरस्यैव वोभयकर्मत्वम् । यथाग्निर्दहन् प्रकाशते, तथा विभक्तयोऽपि प्रकाशन्ते, इति दार्ष्टान्तिकसङ्गतिः. Nāgeśa follows Bhaṭṭoji and concludes : स्वर्गप्राप्तिः फलमित्युक्तम् ।

Yāska explains *sūrmī* as कल्याणोर्मि. Patañjali says : शोभनामूर्मिम् They appear to regard it as a compound of सु and ऊर्मि, but

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

the word is not analysed in the Pada-text, so the most plausible derivation is from स्तृ with the primary suffix मी. सुषिराम् is evidently a Bahuvrīhi compound of सु and सिरा meaning having a good tube or channel, perforated, pierced, hollow. The Vedic Mythology has under *avata* : Sometimes these wells appear to have been used for irrigation purposes, the water being led off into broad channels (surmī sursirā).

The fanciful derivation of 'Kākuda' given here goes back to the Nirukta where we find : काकुदं तालिवत्याचक्षते । जिह्वा कोकुवा सास्मिन् धीयते । जिह्वा कोकुवा कोकूयमाना वर्णान्नुदतीति वा कोकूयतेर्वा स्याच्छब्दकर्मण: । This clearly shows, as Bhaṭṭoji points out in his S'abdakaustubha, that सास्मिन्नुद्यते is to be separated as सा अस्मिन् नुद्यते and not as सा अस्मिन् उद्यते.

In RV. ककुद् (summit) and काकुद् (palate) occur as feminine *consonantal* stems. Cf. Lat. *cacūmen* from**cacud-men*.

किं पुनरिदं व्याकरणमेवाधिजिगांसमानेभ्य: प्रयोजनमन्वाख्यायते न पुनरन्यदपि किञ्चित्, ओमित्युक्त्वा वृत्तान्तश: शमित्येवमादीन् शब्दान् पठन्ति ।

पुराकल्प एतदासीत्—संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयते । तेभ्यस्तत्तत्स्थानकरणानुप्रदानज्ञेभ्यो वैदिका: शब्दा उपदिश्यन्ते । तदद्यत्वे न तथा । वेदमधीत्य त्वरिता वक्तारो भवन्ति । "वेदान्नो वैदिका: शब्दा: सिद्धा लोकाच्च लौकिका:, अनर्थकं व्याकरणम्" इति । तेभ्य एवं विप्रतिपन्नबुद्धिभ्योऽध्येतृभ्य: सुहृद् भूत्वाचार्य इदं शास्त्रमन्वाचष्टे—इमानि प्रयोजनान्यध्येयं व्याकरणमिति ।

उक्त: शब्द: स्वरूपमप्युक्तं प्रयोजनान्यप्युक्तानि ।

How is it that the utility of the study is explained to those who are about to study Grammar alone and not (to those who are inclined to study) any other branch of learn-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ing [the Vedas, for instance], for we find students of the Vedas utter the syllable "Om" and then read the words *s'am* (the first word in AV.) etc. Prapāṭhaka by Prapāṭhaka ? The custom prevalent in ancient times was as follows : The Brāhmaṇas used to study Grammar after the sacrament of the sacred thread. When they had learnt the various places of articulation, organs of articulation and secondary efforts, words were taught to them. Now-a-days, however, that old order has changed. They read the Vedas (first) and then hasten to say : Vedic words are learnt by us from the Vedas and secular words from the people. Grammar is useless. To the students possessed of such antagonistic ideas the revered teacher acts as a friend and explains this science—Grammar should be studied for these reasons.

Words have been described, their true nature has been stated and the uses of the study have been set forth.

We have accepted the reading adopted by Kielhorn तत्तत्स्थान-करणानुप्रदानज्ञेभ्यः omitting नाद after करण. Cf. तदाचार्यः सुहृद् भूत्वान्वाचष्टे—इयदुदात्तम् , इयदनुदात्तम् , अस्मिन्नवकाश उदात्तम् , अस्मिन्न-वकाशेऽनुदात्तमिति । यद्ययमेवं सुहृत् किमन्यान्यप्येवंजातीयकानि नोपदिशति । कानि पुनस्तानि ? स्थानकरणानुप्रदानानि । महाभाष्य १।२।३२

अनुप्रदान evidently means प्रयत्न. Cf. श्वासो घोषेष्वनुप्रदानः । नादो घोषवत्स्वरेषु । चतुरध्यायिका १।१२-१३

अधिजिगांसमान—desid. *act.* part. Ātm. of अधि–इ.

Kaiyaṭa whom Nāges'a follows explains ओमित्युक्त्वा as अभ्युपगम्य. Though ओम् is frequently used in this sense, the meaning does not appear to be appropriate here. The reference is evidently to the uttering of the auspicious syllable "Om" at the beginning of all Vedic studies. Cf. Manu II. 74 :

ब्रह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा ।
स्रवत्यनोङ्कृतं पूर्वं परस्ताच्च विशीर्यति ।

"वृत्तान्ताः प्रपाठका उच्यन्ते । तत्राद्यादित्वात् [५।४।४४] तसिः । वृत्तान्तैः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रपाठकैः पठन्ति । अन्येषां वृत्तान्तश इति पाठः । त एवं पठन्ति [व्याचक्षते ?]—वृत्तान्तं वृत्तान्तं पठन्तीति वृत्तान्तशः पठन्तीति । भर्तृहरिः । वृत्तान्तः प्रपाठक उच्यते । वृत्तान्तं वृत्तान्तं पठन्तीत्यर्थः । कैयटः । प्रपाठ इति । प्रकर्षेण पाठः। पाठस्य प्रकर्षो नाम स्वाधीनोच्चारणसम्पादकत्वम् । वृत्तान्तमिति क्रियाविशेषणम्, स्वाधीनोच्चारणक्षमं यथा भवति तथा पठन्तीत्यर्थः । एतेन "वृत्तान्तं शमित्येवमादीन्" इति भाष्यपाठः प्रामाणिकः, वृत्तान्तशः शमित्येवमादीन् इति शसन्तपाठः प्रामादिक इति ज्ञेयम्" । अन्नंभट्टः ।

Bhartṛhari mentions two readings वृत्तान्ततः and वृत्तान्तशः. Annaṁbhaṭṭa holds that the reading वृत्तान्तम् is the correct reading. वृत्तान्तशः formed with the distributive suffix *śas* would, however, appear to be the correct reading here. Cf. *ante* पदशः स्वरशः Cf. Gk. *andrakás* 'man by man'.

इह यन प्रयोजनं पृष्टं ततोऽन्य एव तटस्थ इत्थं प्रत्यवतिष्ठते । ननु यथा "अधीष्व" इत्याचार्य्येणोक्ते प्रयोजनप्रश्नमकृत्वैव वेदमधीयते, तद्वदङ्गभूतं व्याकरणमप्यध्येष्यन्ते, तत् किं प्रयोजनवर्णनक्लेशेन इति ? अत्रेदमुत्तरम्—प्रायेणेदानीन्तनानामल्पायुष्कत्वाद्विघ्नबहुलत्वाच्च प्रधानभूतो वेदस्तावत् पाठ्यते । तदध्ययनकाले च बाल्यात् प्रयोजनादिकं प्रष्टुमसमर्थाः शिष्या गुरुणोपदिश्यमानं वेदं गृह्णन्ति इति युक्तम् । ततो गृहीतवेदाः प्रौढिमापन्ना विवाहार्थं त्वरमाणा व्याकरणाध्ययनाय गुरुणा प्रेर्यमाणा अपि न सहसा प्रवर्त्स्यन्ते । "वेदान्नो वैदिकाः शब्दाः सिद्धा लोकाच्च लौकिकाः, अनर्थकं व्याकरणम्" इति प्रत्यवतिष्ठन्ते । तान् प्रति युक्तमेव प्रयोजनादिवर्णनम् । पूर्वकल्पेषु व्याकरणशिक्षादीनि लक्षणानि प्रथमं पाठयित्वा तल्लक्षणानुसन्धानपूर्वकं लक्ष्यभूतं वेदं ग्राहयन्तः स्थिताः । तदा परं बाल्यावस्थायां व्याकरणपाठात् प्रयोजनप्रश्नविरहे तत्प्रतिपादनमपि न कर्तव्यमेवेति । यद्यपि

श्रावण्यां प्रोष्ठपद्यां वाप्युपाकृत्य यथाविधि ।
युक्तश्छन्दांस्यधीयीत मासान् विप्रोर्ध्वपञ्चमान् ॥
ततः परं तु छन्दांसि शुक्लेषु नियतः पठेत् ।
वेदाङ्गानि रहस्यञ्च कृष्णपक्षेषु सम्पठेत् ॥

इति मनुवचनस्य "इत ऊर्ध्वमनध्यायेष्वङ्गान्यधीयीत" इत्यादिस्मृत्यन्तराणां च पर्यालोचनया वेदवेदाङ्गाध्ययनसमकालता लभ्यते, तथापि ऋषिवचनत्वाविशेषात् भाष्यकारोक्तेर्मानवादेश्च व्रीहियववद्विकल्प एवेति तत्त्वम् । (Ś. K.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Dr. Suniti Kumar Chatterji, M.A., D.LITT. (London) Professor, Calcutta University, writes :

The *Manjusha* is run by Dr. Kshitish Chandra Chatterjee of the University of Calcutta, who is one of our most erudite authorities on the technical and other niceties of Sanskrit grammar. He is a student of languages and, in addition, he handles Sanskrit with ease. It has been his love of Sanskrit that has made him carry on the work of editing and bringing out this paper since its inception by himself. Financially it has been a thankless task. It has brought other disadvantages also—the editing and financing of a journal without much wide appeal because of its language has been a source of worry which has had its repercussions on his health. But he has not given in, because he is an incorrigible optimist when he is convinced his cause is noble. Prof. Chatterjee is quite an institution in himself. Then, he has been able to enist a number of disinterested colleagues who help him with contributions and who are enthusiasts for Sanskrit like himself. And he himself writes. It is a remarkable thing that although he finds joy in unravelling the intricacies of Sanskrit grammar, he is not in his mental make-up a dry-as dust grammarian. He has a wonderful sense of humour supported by an inexhaustible fund of anecdotes and stories which he brings out in racy Sanskrit. So the pages of the *Manjusha* at times sparkle with laughter. Comparative linguistic he brings in frequently in his articles, and this is a remarkable "special feature" of this little paper. Further, it does not confine itself to Sanskrit alone. Proverbs, *Bon-mots*, wise sayings, *Mahavakyas*, etc. from different languages, English, French, German, Latin, etc., are rendered appropriately into Sanskrit, demonstrating the capacity of the language of the Gods to keep pace with turns of expression peculiar to various languages. One can say also that there is an "English Section" to this magazine, devoted as it is entirely to the culture of Sanskrit. Thus, the editor himself is bringing out through this magazine, in instalments, his English translation and commentary on the *Mahabhashya* of Patañjali which, when completed, will be a valuable contribution to the study of Sanskrit grammar through English.

A journal like this deserves a much wider appreciation which is its due. I think our high school students reading Sanskrit will find much of interest, pleasure and profit in it.

Printed and published by Sri Jyotish Chandra Chatterjee, B. A. from 81, Shyambazar Street, Calcutta—4. Printed at the Elm Press 63, Beadon Street, Calcutta—6.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

MANJUSHA (Sanskrit Monthly Magazine)

Registered No. C. 3278

কাব্যালঙ্কারসূত্রবৃত্তিঃ (বামনবিরচিতা ৫।২)

অভিনববিশদবিস্তৃতটীকোপেতা Rs. 2

Convocation Address in Ancient India -8-

স্ত্রীপ্রশংসা—The original slokas of Varāhamihira with a splendid Sanskrit commentary Re. 1/-

Popular Etymology Re. 1/-

শব্দকথা—সরস সরল ভাষাতত্ত্ব— ২৲

ঊষার আলো—হাসির গল্পের সমষ্টি— ৸০

নক্ষত্রমালা—ধর্মবিষয়ক শ্লোক ও অনুবাদ— ।৵০

Several complete sets of Vol. IV of the Manjusha are still available for Rs. 6/- and only a few sets of Vols. I-III are available at Rs. 5/12/- for the lot.

TECHNICAL TERMS AND TECHNIQUE OF

SANSKRIT GRAMMAR

A Critical, Comparative and Historical Study

BY

KSHITISH CHANDRA CHATTERJI, SASTRI, M. A., D. LITT.

Lecturer, Calcutta University ;
Formerly Editor, Calcutta Oriental Journal,
Surabharati, Oriental Literary Digest, etc., etc.

"We have nothing but admiration for this masterpiece of scholarship." *Modern Review.*

Price Rupees Ten only. *Foreign Rs. 12/-*

Postage Extra.

VISVANATH CHATTERJI

81, Shyambazar Street,

CALCUTTA—4

Phone : B. B. 4049

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Approved by the Directors of Public Instruction, Madras, Bihar and Mysore.

श्रीशिवः शरणम्

षष्ठ-वर्षे] Sep.-Nov., 1951 [प्रथमादि संख्यात्रयम्

मञ्जूषा

सम्पादकः—श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

Special Articles in this number.

S'aṅkarācārya's unpublished writings.

Mahābhāṣya with English Translation, notes, extracts from various commentaries including the hitherto-unpublished Bhāṣya-pradīpikā of Bhartṛhari (pp. 17-3).

An interesting Sanskrit drama.

Sanskrit translation of Longfellow's "Psalm of life."

इवेन सह समासः—a critical study.

Look out for the Special Dewali No. of the Manjusa which will be posted on Dec. 1.

Vol. V of the Mañjūṣa contains 300+32+32 pages including "The S'iva sūtras and the Sanskrit alphabet" "Mahābhāṣya" "Critical studies on the text of S'āyaṇa's commentary on the Rigveda" etc. etc. Rs. 6/8/-

Office : 81, Shyambazar Street, Calcutta—4

Annual Subscription : Rupees Six only.

Foreign—Rupees Nine.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

The Madhuravāṇi (Bagalcott) writes: स्वागतं मञ्जूषायै। कलकत्तानगरतः शब्दाब्धिलब्धवैदग्ध्यस्य कवितावनितास्वयंवरवृतवरस्य पण्डितप्रवरस्य श्रीक्षितीशचन्द्रचट्टोपाध्यायस्य सम्पादकत्वे प्रतिमासं नियतमाविष्क्रियमाणा मञ्जूषानामिका पत्रिका शिञ्जानमञ्जरीमञ्जुलपदैः गीतगुञ्जारवैश्च रञ्जयति रसिकपुञ्जम्। क्वचित् महाभाष्य-शब्देन्दुशेखरादिगत-सूक्ष्मतम-विषयसमीक्षणसंरम्भेण महामहापण्डितपुण्डरीकाणामपि शिरःकण्डूतिम् उपजनयति। कदाचित् कुशलग्रामवृद्धेव सरसकथाकथनेन कौतुकमुत्पादयति। कुत्रचिच्च प्राचीन-सरस-सुन्दर-सुभाषितानाम् आंग्लानुवादान् प्रकटीकृत्य उपकरोति छात्रवृन्दम्। क्वचिदपि च वेदवेदान्तमन्त्रतन्त्रादीनां भावार्थादिकं जिज्ञासते। मध्ये मध्ये तनुतरविनोदिकथाभिः हास्यलहरीरपि उद्भावयति। तत्र तत्र च शब्दशक्तिप्रकाशेन शब्दशुद्धिविचारैः पुरातनसाहित्यप्रकटीकरणेन च भिन्नभिन्नरुचिमपि वाचककुलं सम्यगाराधयति। प्रायः सर्वत्र सरलतमा सुबोधा च अत्रत्या भाषा विदुषामिव विद्यार्थिनामपि सविशेषं परितोषं जनयति। 'पण्डिता च पतिव्रता' इति ख्यातायाः क्षमादेवीरावमहोदयायाः "परित्यक्ता" इति विचित्रा चैत्राङ्कगता चारुतमकथा चमत्कुरुते सचेतसां चेतांसि हृदयङ्गमया निरूपणभङ्ग्या। तस्मिन्नेव मञ्जूषायाः चैत्राङ्के 'शिवसूत्रस् एण्ड संस्कृत आल्फाबेट्' इति विचारप्रचुरः सम्पादकानाम् आंग्लभाषायां लिखितः विवेचनात्मकः लेखः सर्वेषामपि विपश्चिदपश्चिमानां प्रशंसापात्रं भवतीति निश्चप्रचम्। वयं तु सादरं संसूचयामः "यावच्छक्यं संस्कृतभाषायामेव लेखा लेखनीयाः" येन शुद्धसंस्कृतविदुषामपि उपयोगो भवेत्।

शिञ्जन्मञ्जीरमञ्जूक्तिगुञ्जितै रसिकरञ्जिनी।
क्षितीशकृतिमञ्जूषा केषामेषा न तोषदा॥

सुवर्णकांक्षिभिः सवरर्थलुब्धैर्मनीषिभिः।
अलङ्कारप्रियैरेषा मञ्जूषा गृह्यतां रसात्॥

उत्कृष्टलेखरत्नानां मञ्जूषैषा विशोभते।
सर्वथा समुपादेया सर्वैः सहृदयैरपि॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम् ॥

मञ्जूषा

Sept.-Nov. 1951.	१८७३-शकीयाश्विनादीनाम् षष्ठ-वर्षस्य प्रथमादिसंख्यात्रयम्	Vol. VI. Nos. 1-3.

श्रीमच्छङ्कराचार्यविरचितं

श्रीनीललोहितपादादिकेशान्तस्तोत्रम्

॥ श्रीगणेशाय नमः ॥

कल्याणं वो विधत्तां कटकतटलसत्कल्पवाटीनिकुञ्ज-
क्रीडासंसक्तविद्याधरनिकरवधूगीतरुद्रावदानः ।
तारैर्हेरम्बनादैस्तरलितनिनदत्तारकारातिकेकी
कैलासः शर्वनिर्वृत्यभिजनकपदं सर्वदा पर्वतेन्द्रः ॥१॥

यस्य प्राहुः स्वरूपं सकलदिविषदां सारसर्वस्वयोगं
यस्येषुः शार्ङ्गधन्वा समजनि जगतां रक्षणे जागरूकः ।
मौर्वी दर्वीकराणामपि च परिवृढः पूस्त्रयी सा च लक्ष्यं
सोऽव्यादव्याजमस्मानशुभभिदनिशं नाकिनां श्रीपिनाकः ॥२॥

आतङ्कावेगहारी सकलदिविषदामङ्घ्रिपद्माश्रयाणां
मातङ्गाद्युग्रदैत्यप्रकरतनुगलद्रक्तधाराक्तधारः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रूरः शूरायुधानामपि च परिभवं स्वीयभासा वितन्वन्
घोराकारः कुठारो दृढतरदुरिताख्याटवीं पाटयेन्नः ॥३॥

कालारातेः कराग्रे कृतवसतिरुरःशाणशातो रिपूणां
काले काले कुलाद्रिप्रवरतनयया कल्पितस्नेहलेपः ।
पायाद्वः पावकार्चिःप्रसरसखमुखः पापहन्ता नितान्तं
शूलः श्रीपादसेवाभजनरसजुषां पालनैकान्तशीलः ॥४॥

देवस्याङ्काश्रयायाः कुलगिरिदुहितुर्नेत्रकोणप्रचार-
प्रस्तारानत्युदारान् पिपठिषुरिव यो नित्यमत्यादरेण ।
आधत्ते भाङ्गतुङ्गैरनिशमवयवैरन्तरङ्गं समोदं
सोमापीडस्य सोऽयं प्रदिशतु कुशलं पाणिरङ्गः कुरङ्गः ॥५॥

कण्ठेप्रान्तावसज्जत्कनकमयमहाघण्टिकाघोरघोषैः
कण्ठारावैरकुण्ठैरपि भरितजगच्चक्रवालान्तरालः ।
चण्डप्रोद्दण्डभृङ्गः ककुदकवलितोत्तुङ्गकैलासशृङ्गः
कण्ठेकालस्य वाहः शमयतु शमलं शाश्वतः शाक्वरेन्द्रः ॥६॥

निर्यद्दानाम्बुधारापरिमलतरलीभूतलोलम्बपाली-
झङ्कारैः शङ्कराद्रेः शिखरशतदरीः पूरयन् भरिघोषैः ।
शार्वः सौवर्णशैलप्रतिमपृथुवपुः सर्वविघ्नापहर्ता
शर्वाण्याः पूर्वसूनुः स भवतु भवतां स्वस्तिदो हस्तिवक्त्रः ॥७॥

यः पुण्यैर्देवतानां समजनि शिवयोः श्लाघ्यबीजैकमत्याद्
यन्नाम्नि श्रूयमाणे दितिजभटघटा भीतिभारं भजन्ते ।
भूयात्सोऽयं विभूत्यै निशितशरशिखापाटितक्रौञ्चशैलः
संसारागाधकूपोदरपतितसमुत्तारकस्तारकारिः ॥८॥

आरूढः प्रौढवेगप्रविजितपवनं तुङ्गतुङ्गं तरङ्गं
चैलं नीलं वसानः करतलविलसत्काण्डकोदण्डदण्डः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रागद्वेषादिनानाविध[रिपु]पटलीभीतिकृद्भूतभर्ता
कुर्वन्नाखेटलीलां परिलसतु मनःकानने मामकीने ॥९॥

नृत्तारम्भेषु हस्ताहतमुरवधिमि[द्]धिक्कृतैरत्युदारै-
श्चित्तानन्दं विधत्ते सदसि भगवतः सन्ततं यस्य नन्दी ।
चण्डीशाद्यास्तथाऽन्ये चतुरगुणगणप्रीणितस्वामिसत्का-
रोत्कर्षोद्यत्प्रसादाः प्रमथपरिवृढाः पान्तु सन्तोषिणो वः ॥१०॥

अम्भोजाभ्यां च रम्भारथचरणलताद्वन्द्वकुम्भीन्द्रकुम्भै-
र्बिम्बेनेन्दोश्च कम्बोरुपरि विलसता विद्रुमेणोत्पलाभ्याम् ।
अम्भोदेनापि सम्पादितमुपजनिताऽऽडम्बरं शम्बरारेः
शम्भोः सम्भोगयोग्यं किमपि घनमिदं सम्भवेत्सम्पदे नः ॥११॥

वेणीसौभाग्यविस्मापिततपनसुताचारुवेणीविलासान्
वाणीनिर्धूतवाणीकरतलविधृतोदारवीणाविरावान् ।
एणीनेत्रान्तभङ्गीनिरसननिपुणापाङ्गकोणानुपासे
शोणान् प्राणानुदूढप्रतिनवसुषमाकन्दलानिन्दुमौलेः ॥१२॥

मुक्तामाणिक्यजालैः परिकलितमहासालमालोकनीयं
प्रत्यप्तानर्घरत्नैर्दिशि दिशि भवनैः कल्पितं दिक्पतीनाम् ।
उद्यानैरद्रिकन्यापरिजनवनितामाननीयैः परीतं
हृद्यं हृद्यस्तु नित्यं मम भुवनपतेर्धाम चन्द्रार्धमौलेः ॥१३॥

स्तम्भैर्जम्भारिरत्नप्रवरपरिचितैः सम्भृतोपान्तभागं
शुम्भत्सोपानमार्गं शुचिमणिनिचयैर्गुम्फितानल्पशिल्पम् ।
कुम्भैः सम्पूर्णशोभं शिरसि सुघटितैः शातकौम्भैरकम्पैः
शम्भोः सम्भावनीयं सकलमुनिजनैः शातदं स्यात्सदो नः ॥१४॥

न्यस्तो मध्ये सभायाः परिसरविलसत्पादपीठाभिरामो
हृद्यैः पादैश्चतुर्भिः कनकमणिमयैरुच्चकैरुज्ज्वलात्मा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वासो रत्नेन केनाप्यधिकमृदुतरेणास्तृतो विस्तृतश्रीः
पीठः पीडाभरं नः शमयतु शिवयोः स्वैरसंवासयोग्यः ॥१५॥

आसीनस्यापि पीठे त्रिजगदधिपतेरङ्घ्रिपीठानुषक्तौ
पाथोजाभोगभागौ परिमृदुलतरोल्लासिपद्मादिरेखौ ।
पातां पादावुभौ तौ नमदमरकिरीटोल्लसच्चारुहीर-
श्रेणीशोणायमानोन्नतनखदशकोद्भासमानौ समानौ ॥१६॥

यन्नादो वेदवाचा निगदति निखिलं लक्षणं पक्षिकेतु-
र्लक्ष्मीसम्भोगसौख्यं विरचयति ययोश्चापरे रूपभेदे ।
शम्भोः सम्भावनीये पदकमलसमासङ्गतस्तुल्यशोभं
मङ्गल्यं नः समग्रं सकलसुखकरे नूपुरे पूरयेताम् ॥१७॥

अङ्गे शृङ्गारयोनेः सपदि शलभतां नेत्रवह्नौ प्रयाते
शत्रोरुद्धृत्य तस्मादिषुधियुगमहो न्यस्तमेतत्किमग्रे ।
इत्थं शङ्कानतानाममरपरिषदामन्तरङ्कुरयत्तत्-
संघातं चारुजङ्घायुगमखिलपतेरंहसः संहरेन्नः ॥१८॥

जानुद्वन्द्वेन मीनध्वजनृवरसमुद्गोपमानेन साकं
राजन्तौ राजरम्भाकरिकरकनकस्तम्भसम्भावनीयौ ।
ऊरू गौरीकराम्भोरुहसरससमामर्दनानन्दभाजौ
चारू दूरीक्रियेतां दुरितमुपचितं जन्मजन्मान्तरे नः ॥१९॥

आमुक्तानर्घरत्नप्रकरकरपरिष्वक्तकल्याणकाञ्ची-
दाम्ना बद्धेतु दुग्धद्युतिनिचयमुषा चीनपट्टाम्बरेण ।
संवीते शैलकन्यासुचरितपरिपाकायमाणे नितम्बे
नित्यं नर्नर्तु चित्तं मम निखिलजगत्स्वामिनः सोममौलेः ॥२०॥

सन्ध्याकालानुरज्यद्दिनकरसरुचा कालधौतेन गाढं
व्यानद्धः स्निग्धमुग्धः सरसमुदरबन्धेन वीतोपमेन ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उद्दीप्रैः स्वप्रकाशैरुपचितमहिमा मन्मथारेरुदारो
मध्यो मिथ्यार्धसध्र्यङ् मम दिशतु सदा सङ्गतिं मङ्गलानाम् ॥२१॥

नाभीचक्रालवालान्नवनवसुषमादोहदश्रीपरीताद्
उद्गच्छन्ती पुरस्तादुदरपथमतिक्रम्य वक्षः प्रयान्ती ।
श्यामा कामागमार्थप्रकथनलिपिवद्भासते या निकामं
सा मा सोमार्धमौलेः सुखयतु नितरां रोमवल्लीमतल्ली ॥२२॥

आश्लेषेष्वद्रिजायाः कठिनकुचतटीलिप्तकाश्मीरपङ्क-
व्यासङ्गादुद्यदर्कद्युतिभिरुपचितस्पर्धमुद्दामहृद्यम् ।
दक्षारातेरुदूढप्रतिनवमणिमालावलीभासमानं
वक्षो विक्षोभिताङ्गं सततमतिजुषां रक्षतादक्षतं नः ॥२३॥

वामाङ्के विस्फुरन्त्याः करतलविलसच्चारुरक्तोत्पलायाः
कान्ताया वामवक्षोरुहभरशिखरामर्दनं व्यग्रमेकम् ।
अन्यांस्त्रीनप्युदारान् वरपरशुमृगालङ्कृतानिन्दुमौले-
र्बाहूनाबद्धहेमाङ्गदमणिकटकानन्तरालोकयामः ॥२४॥

संभ्रान्तायाः शिवायाः पतिविलयभयात्सर्वलोकोपतापात्
संविग्नस्यापि विष्णोः सरभसमुभयोर्वारणप्रेरणाभ्याम् ।
मध्ये त्रैशङ्कवीयामनुभवति दशां यत्र हालाहलोष्मा
सोऽयं सर्वापदां नः शमयतु निचयं नीलकण्ठस्य कण्ठः ॥ २५ ॥

हृद्यैरद्रीन्द्रकन्यामृदुदशनपदैर्मुद्रितो विद्रुमश्री-
रुद्योतन्त्या नितान्तं धवलधवलया मिश्रितो दन्तकान्त्या ।
मुक्तामाणिक्यजालव्यतिकरसदृशा तेजसा भासमानः
सद्योजातस्य दद्यादधरमणिरसौ सम्पदां सञ्चयं नः ॥ २६ ॥

कर्णालङ्कारनानामणिनिचयरुचां सञ्चयैरञ्चितायां
वर्ण्यायां स्वर्णपद्मोदरपरिविगलत्कर्णिकासन्निभायाम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पद्धत्यां प्राणवायोः प्रणतजनहृदम्भोजवासस्य शम्भो-
र्नित्यं नश्चित्तमेतद्विरचयतु सुखेनाऽऽसिकां नासिकायाम् ॥ २७॥

अत्यन्तं भासमाने रुचिरतररुचां सङ्गमात्सन्मणीनाम्
उद्यच्चण्डांशुधामप्रसरनिरसनस्पष्टदृष्टावदाने ।
भूयास्तां भूतये नः करिवरजयिनः कर्णपाशावलम्बे
भक्तालीभालसज्जज्जनिभरणलिपेः कुण्डले कुण्डले ते ॥२८॥

याभ्यां कालव्यवस्था भवति तनुमतां यो मुखं देवतानां
येषामाहुः स्वरूपं जगति मुनिवरा देवतानां त्रयीं ताम् ।
रुद्राणीवक्त्रपङ्केरुहसततविहारोत्सुकेन्दिन्दिरेभ्य-
स्तेभ्यस्त्रिभ्यः प्रणामाञ्जलिमुपरचये त्रीक्षणस्येक्षणेभ्यः ॥२९॥

वामं वामाङ्कगत्या वदनसरसिजव्यालगद्वल्लभाया
व्यानम्रेष्वन्यदन्यत्पुनरलिकभवं वीतनिःशेषरौक्ष्यम् ।
भूयो भूयोऽतिमोदान्निपतदतिदयाशीतलं चूतबाणे
दक्षारेरीक्षणानां त्रयमपहरतादाशु तापत्रयं नः ॥ ३० ॥

यस्मिन्नर्धेन्दुमुग्धद्युतिनिचयतिरस्कारनिस्तन्द्रकान्तौ
काश्मीरक्षोदसङ्कलिपतमिव रुचिरं चित्रकं भाति नेत्रम् ।
तस्मिनुल्लोलचिल्लीनटवरतरुणीलास्यरङ्गायमाणे
कालारेर्भालदेशे विहरतु हृदयं वीतचिन्तान्तरं नः ॥ ३१ ॥

स्वामिन् गङ्गामिवाङ्गीकुरु तव शिरसा मामपीत्यर्थयन्तीं
धन्यां कन्यां खरांशोः शिरसि वहसि किं न्वेष कारुण्यशाली ।
इत्थं शङ्कानतानां जनयदतिघनं कैशिकं कालमेघ-
च्छायं भूयादुदारं त्रिपुरविजयिनः श्रेयसे भूयसे नः ॥ ३२ ॥

शृङ्गाराकल्पयोग्यैः शिखरिवरसुतासत्सखीहस्तलूनैः
सूनैराबद्धमालावलिपरिविगलत्सौरभाकृष्टभृङ्गम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तुङ्गं माणिक्यकान्त्या परिहसितसुरावासशैलेन्द्रशृङ्गं
सङ्घं नः सङ्कटानां विघटयतु सदा काङ्कटीकं किरीटम् ॥३३॥

वक्राकारः कलङ्की जडतनुरहमप्यंघ्रिसेवानुभावाद्
उत्तंसत्वं प्रयातः सुलभतरघृणास्यन्दिनश्चन्द्रमौलेः ।
तत्सेवन्तां जनौघाः शिवमिति निजयाऽवस्थयैवं ब्रुवाणं
वन्दे देवस्य शम्भोर्मुकुटसुघटितं मुग्धपीयूषभानुम् ॥३४॥

कान्त्या संफुल्लमल्लीकुसुमधवलया व्याप्य विश्वं विराजन्
वृत्ताकारो वितन्वन् मुहुरपि च परां निर्वृतिं पादभाजाम् ।
सानन्दं नन्दिदोष्णा मणिकटकवता वाह्यमानः पुरारेः
श्वेतच्छत्राख्यशीतद्युतिरपहरतादापदस्तापदा नः ॥३५॥

दिव्याकल्पोज्ज्वलानां शिवगिरिसुतयोः पार्श्वयोराश्रितानां
रुद्राणीसत्सखीनां मदतरलकटाक्षाञ्चलैरञ्चितानाम् ।
उद्वल्गद्बाहुवल्लीविवलनसमये चामरान्दोलिनीनाम्
उद्भूतः कङ्कणालीवलनकलकलो वारयेदापदो नः ॥३६॥

स्वर्गौकःसुन्दरीणां सुललितवपुषां स्वामिसेवापराणां
वल्गद्भूषाणि वक्त्राम्बुजपरिविगलन्मुग्धगीतामृतानि ।
नित्यं नृत्तान्युपासे भुजविधृतिपदान्यासभावावलोक-
प्रत्युद्यत्प्रीतिमाद्यत्प्रमथनटनटीदत्तसम्भावनानि ॥३७॥

स्थानप्राप्त्या स्वराणां किमपि विशदतां व्यञ्जयन्मञ्जुवीणा-
स्वानावच्छिन्नतालक्रममममृतमिवास्वाद्यमानं शिवाभ्याम् ।
नानारागातिहृद्यं नवरसमधुरस्तोत्रजातानुविद्धं
गानं वीणा महर्षेः कलयति ललितं कर्णपूरायतां नः ॥३८॥

चेतो जातप्रमोदं सपदि विदधती प्राणिनां वाणिनीनाम्
पाणिद्वन्द्वाग्रजाग्रत्सुललितरणितस्वर्णतालानुकूलाम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वीयारावेण पाथोधररवपटुना नादयन्ती मयूरीं
मायूरी मन्दभावं मणिमुरवभवा मार्जना मार्जये[द्] नः ॥३९॥
देवेभ्यो दानवेभ्यः पितृमुनिपरिषत्सिद्धविद्याधरेभ्यः
सिद्धेभ्यश्चारणेभ्यो मनुजपशुपतज्जातिकीटादिकेभ्यः।
श्रीकैलासप्ररूढास्तृणविटपमुखाश्चापि ये सन्ति तेभ्यः
सर्वेभ्यो निर्विवादं नतिमुपरचये शर्वपादाश्रयेभ्यः ॥४०॥
इत्थं ध्यायन् प्रभाते प्रतिदिवसमिदं स्तोत्ररत्नं पठेद्यः
किं वा ब्रूमस्तदीयं सुचरितमथवा कीर्तयामः समासात्।
सम्यग् जातं समग्रं सदसि बहुमतिं सर्वलोकप्रियत्वं
संप्राप्यायुःशतान्ते पदमयति परब्रह्मणो मन्मथारेः ॥४१॥

इति श्रीमच्छङ्कराचार्यविरचितं नीललोहितपादादि-
केशान्तस्तोत्ररत्नं समाप्तम्।

श्रीमच्छङ्कराचार्यविरचितं

व्योमकेशकेशादिपादान्तस्तोत्रम्

देयासु र्मूर्ध्नि राजत्सरससुरसरित्पादपर्यन्तनिर्यत्-
प्रांशुस्तम्वाः पिशङ्गास्तुलितपरिणतारवतशालीलता वः।
दुर्वारापत्तिगर्ते श्रितनिखिलजनोत्तारणे रज्जुभूता
घोराघोर्वीरुहालीदहनशिखिशिखा शर्म शार्वाः कपर्दाः ॥१॥
कुर्वन्निर्वाणमार्गप्रगमपरिलसद्रूप्यसोपानशङ्कां
शक्रारीणां पुराणां त्रयविजयकृतस्पष्टरेखायमाणम्।
अव्यादव्याजमुच्चैरलिकहिमधराधित्यकातस्त्रिधोद्यज्
जाह्नव्याभं मृडानीकमितुरुडुपरुक् पाण्डुरं वह्निपुण्ड्रम् ॥२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रुध्यद्गौरीप्रसादानतिसमयपराङ्गुष्ठसंक्रान्तलाक्षा-
बिन्दुस्पर्धि स्मरारेः स्फटिकमणिदृषन्मग्नमाणिक्यशोभम् ।
मूर्ध्न्युद्यद्दिव्यसिन्धोः पतितशफरिकाकारि वो मास्तकं स्ताद्
अस्तोकापत्तिकृत्यै हुतवहकणिकामोक्षरुक्षं सदाक्षि ॥३॥

भूत्यै दृग्भूतयोः स्याद्यदहिमहिमरुग्बिम्बयोः स्निग्धवर्णो
दैत्यौघध्वंसशंसी स्फुट इव परिवेषावशेषो विभाति ।
स्वर्गस्थित्यन्तवृत्ति मयि समुपगतेऽतीवनिर्वृत्तगर्वं
शर्वाणीभर्तुरुच्चैर्युगलमथ दधद्विभ्रमं तद् भ्रुवो वः ॥४॥

युग्मे रुक्माब्जपिङ्गे ग्रह इव पिहिते द्राग् ययोः प्राग् दुहित्रा
शैलस्य ध्वान्तनीलाम्बररचितबृहत्कञ्चुकोऽभूत् प्रपञ्चः ।
ते त्रैनेत्रे पवित्रे त्रिदशवरघटामित्रजैत्रोग्रशस्त्रे
नत्रे नेत्रे भवेतां द्रुतमिह भवतामिन्द्रियाश्वान्नियन्तुम् ॥५॥

चण्डीवक्त्रार्पणेच्छोस्तदनु भगवतः पाण्डुरुक् पाण्डुगण्ड-
प्रोद्यत्कण्डूं विनेतुं वितनुत इव ये रत्नकोणैर्विघृष्टिम् ॥
चण्डार्चिर्मण्डलाभे सततनवजगद्ध्वान्तखण्डातिशौण्डे
चाण्डीश ते श्रिये स्तामधिकमवनताखण्डले कुण्डले वः ॥६॥

खट्वाङ्गोदग्रपाणे स्फुटनिकटपुटो वक्त्ररन्ध्रप्रवेशः
प्रेप्सूदञ्चत्फणोरुश्वसदतिधवलाहीन्द्रशङ्कां दधानः ।
युष्माकं कम्रवक्त्राम्बुरुहपरिलसत्कर्णिकाकारशोभः
शश्वत्त्राणाय भूयादलमतिविमलोत्तुङ्गकोणः स घोणः ॥७॥

क्रुध्यत्यद्धा ययोः स्वां तनुमतिलसतो बिम्बितां लक्षयन्ती
भर्त्रे स्पर्धातिनिघ्ना मुहुरितरवधूशङ्कया शैलकन्या ।
युष्मांस्तौ शश्वदुच्चैरबहुलदशमीशर्वरीशातिशुभ्रा-
वव्यास्तां दिव्यसिन्धोः कमितुरवनमल्लोकपालौ कपोलौ ॥८॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यो भासा भात्युपान्तस्थित इव निभृतं कौस्तुभो द्रष्टुमिच्छन्
सोऽथ स्नेहान्नितान्तं गलगतगरलं पत्युरुच्चैः पशूनाम् ।
प्रोद्यत्प्रेम्णा यमार्द्रा पिबति गिरिसुता सम्पदः सातिरेका
लोकाः शोणीकृतान्ता यदरुणमहसां सोऽधरो वो विधत्ताम् ॥९॥

अत्यर्थं राजते या वदनशशधरादुद्गलच्चारुवाणी
पीयूषाम्भःप्रवाहप्रसरपरिलसत्फेनबिन्द्वावलीव ।
देयात्सा दन्तपङ्क्तिश्चिरमिह दनुदायाददौवारिकस्य
द्युत्या दीप्तेन्दुकुन्दच्छविरमलतरप्रोन्नताग्रा मुदं वः ॥१०॥

न्यक्कुर्वन्नुर्वराभृन्निभघनसमयोद्घुष्टमेघौघघोषं
स्फूर्जद्वाध्युत्थितोरुध्वनितमपि परब्रह्मभूतो गभीरः ।
सुव्यक्तो व्यक्तमूर्तेः प्रकटितकरणः प्राणनाथस्य सत्याः
प्रीत्या वः संविदध्यात्फलविकलमलं जन्म नादः सनादः ॥११॥

भासा यस्य त्रिलोकी लसति परिलसत्फेनबिम्बार्णवान्त-
र्यामग्नेवातिगौरस्तुलितसुरसरिद्वारिपूरप्रवाहः ।
पीनात्मा दन्तभाभिर्भृशमहह हकारादिभीमः सदेष्टां
तुष्टिं पुष्टां कृषीष्ट द्रुतमिह भवतामट्टहासोऽष्टमूर्तेः ॥१२॥

सद्योजाताख्यमास्यं यदु विमलमुदग्वृत्ति यद्वामदेवं
नाम्ना हेम्ना सदृक्षं जलदनिभमघोराह्वयं दक्षिणं यत् ।
यद्बालार्कप्रभं तत्पुरुषनिगदितं पूर्वमीशानसंज्ञं
यद्दिव्यं तानि शम्भोर्भवदभिलषितं पञ्च दद्युर्मुखानि ॥१३॥

आत्मप्रेम्ण मृडान्याः स्वयमिव रचिताः सादरं सांवनन्या
मध्या तिस्रः सुनीलाञ्जननिभगररेखाः समाभान्ति यस्याम् ।
आकल्पानल्पभासा भृशरुचिरतरा कम्बुकल्पाऽम्बिकायाः
पत्युः साऽत्यन्तमन्तर्विलसतु सततं मन्थरा कन्धरा वः ॥१४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वक्त्रेन्दोर्दन्तलक्ष्म्याश्चिरमधरमहाकौस्तुभस्याप्युपान्ते
सोत्थानां प्रार्थयन् यः स्थितिमचलभुवे वारयन्त्यै निवेशम् ।
प्रायुङ्क्तेवाशिषो यः प्रतिपदिममृतत्वोत्थित:(?) कालशत्रोः
कालं कुर्वन् गलं वो हृदयमलमलं क्षालयेत्कालकूटः ॥१५॥

प्रौढप्रेमाकुलाया दृढ़तरपरिरम्भेषु पर्वेन्दुमुख्याः
पार्वत्याश्चारुचामीकरवलयपदैरङ्कितं कान्तिशालि ।
रिङ्गन्नागाङ्गदार्ढ्य प्रसभमविहितं कर्म निर्मूलयेत्तद्
दोर्मूलं निर्मलं यद्धृदि दुरितमपास्यार्जितं धूर्जटे र्वः ॥१६॥

कण्ठाश्लेषार्थमाप्ता दिव इव कमितुः स्वर्गसिन्धोः प्रवाहाः
कान्त्यै संसारसिन्धोः स्फटिकमणिमहासंक्रमाकारदीर्घाः ।
तिर्यग्विष्कम्भभूतास्त्रिभुवनवसतेर्भिन्नदैत्येभदेहा
बाहा वस्ता हरस्य द्रुतमिह निवहानंहसां संहरन्तु ॥१७॥

वक्षो दक्षद्विषोऽलं स्मरभरविनमद्दक्षजाक्षीणवक्षो
जान्तर्निक्षिप्तशुम्भन्मलयजमिलितोद्भासिभस्मोक्षितं यत् ।
क्षिप्रं तद्रूक्षचक्षुःश्रुतिगणफणरत्नौघभाभीक्षणशोभं
युष्माकं शश्वदेनः स्फटिकमणिशिलामण्डलाभं क्षिणोतु ॥१८॥

मुक्तामुक्ते विचित्राकुलवलिलहरीजालशालिन्यवाञ्चन्
नाभ्यावर्ते विलोठद्भुजगवरयुते कालशत्रोर्विशाले ।
युष्मच्चित्तत्रिधामाप्रतिनवरुचिरे मन्दिरे कान्तिलक्ष्म्याः
शेतां शीतांशुगौरे चिरतरमुदरक्षीरसिन्धौ सलीलम् ॥१९॥

वैयाघ्री यत्र कृत्तिः स्फुरति हिमगिरेर्विस्तृतोपत्यकान्तः
सान्द्रावश्यायमिश्राः परित इव वृता नीलजीमूतमाला ।
आबद्धाहीन्द्रकाञ्चीगुणमतिपृथुलं शैलजाक्रीडभूमिं
तद्वो निःश्रेयसे स्याज्जघनमतिघनं बालशीतांशुमौलेः ॥२०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुष्टावष्टम्भभूतौ पृथुतरजघनस्यापि नित्यं त्रिलोक्याः
सम्यग्वृत्तौ सुरेन्द्रद्विरदवरकरोदारकान्तिं दधानौ ।
साराबूरू पुरारेः प्रसभमरिघटाघस्मरौ भस्मशुभ्रौ
भक्तैरप्यार्द्रचित्तैरधिकमवनतौ वाञ्छितं वो विधत्ताम् ॥२१॥

आनन्दायेन्दुकान्तोपलरचितसमुद्गायिते ये मुनीनां
चित्तादर्शं विधातुं निदधति चरणे ताण्डवाकुञ्चनानि ।
काञ्ची भोगीन्द्रमूर्ध्ना प्रतिमुहुरुपधानायमानेक्षणं ते
कान्ते स्तामन्तकारे र्द्युतिविजितसुधाभानुना जानुनी वः ॥२२॥

मञ्जीरीभूतभोगिप्रवरगणफणामण्डलान्तर्नितान्त-
व्यादीप्तानर्घरत्नद्युतिकिसलयिते स्तूयमाने द्युसद्भिः ।
बिभ्रत्यौ विभ्रमं वः स्फटिकमणिबृहद्दण्डवद्भासते ये
जङ्घे शङ्खेन्दुशुभ्रे भृशमिह भवतां मानसे शूलपाणेः ॥२३॥

अस्तोकस्तोमशस्त्रैरुपचितममलं भूरिभावोपहारैः
कुर्वद्भिः सर्वदोच्चैः सततमभिवृतौ ब्रह्मविद्देवलाद्यैः ।
सम्यक् संपूज्यमानाविह हृदि सरसीवानिशं युष्मदीये
शर्वस्य क्रीड़तां तौ प्रपदवरबृहत्कच्छपावच्छभासौ ॥२४॥

याः स्वस्यैकांशपातादतिबहलगलद्रक्तवक्त्रं प्रणुन्न-
प्राणं प्राक्रोशयन् प्राङ् निजमचलवरं चालयन्तं दशास्यम् ।
पादाङ्गुल्यो दिशन्तु द्रुतमयुगदृशः कल्मषप्रोषकल्याः
कल्याणं फुल्लमाल्यप्रकरविलसिता वः प्रणद्धाहिवल्ल्यः ॥२५॥

प्रह्व-प्राचीनबर्हिःप्रमुखसुरवरप्रस्फुरन्मौलिसक्त-
ज्यायोरत्नोत्करोऽस्त्रैरविरतमसला भूरि नीराजिता या ।
प्रोदग्राग्रा प्रदेया[त्] ततिरिव रुचिरा तारकाणां नितान्तं
नीलग्रीवस्य पादाम्बुरुहविलसिता सा नखाली सुखं वः ॥२६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सत्याः सत्याननेन्दावपि सविधगते ये विकाशं दधाते
स्वान्ते स्वान्ते लभन्ते श्रियमिह सरसीवामरा ये दधानाः ।
लोलं लोलम्बकानां कुलमिव सुधियां सेवते ये सदास्तां
भूत्यै भूत्यैणपाणे विमलतररुचस्ते पदाम्भोरुहे वः ॥२७॥
येषां रागादिदोषाक्षतमतियतयो यान्ति मुक्तिं प्रसादे
ये वा नम्रात्ममूर्ति-द्युसदृषिपरिषन्मूर्ध्नि शेषायमाणाः ।
श्रीकण्ठस्यारुणोद्यच्चरणसरसिजप्रोत्थितास्ते परागा
यष्मान् सन्तारयेयुश्चिरतरविततताज्जन्मसंसारपाशात् ॥२८॥
भूम्ना यस्यास्तभूम्ना भुवनमनुसृतं यत्पुरं धाम धाम्नां
साम्नामाम्नायतत्त्वं यदपि च परमं यद् गुणातीतमाद्यम् ।
यश्चांहोहन्निरीहं गहनमिति मुहुः प्रातरुच्चैर्महान्तं
माहेशं तन्महोऽत्र महितमहरहर्मोहरोहं निहन्तुम् ॥२९॥

इति श्रीशङ्कराचार्यविरचितं व्योमकेशकेशादिपादान्तस्त्रोत्रं संपूर्णम् ॥

श्रीभवानीशङ्करार्पणमस्तु ॥

राजापुरनगरात् क्रोशषट्कदूरवर्ति खारेपाटणपुरवासिभिः नाइणकरकुलसंभूतलक्ष्मणतनयैर्बालकृष्णशास्त्रिभिर्लिखितमिदं श्रीशङ्कराचार्यविरचितं स्तोत्रयुगलम् ।

यस्येयं प्रतिकृतिस्तत्प्रशिष्येण श्रीद्वैकुण्ठवासिगुरुवर्यविद्यारत्न-निगुडकरोपाह्वदत्तात्रेयशास्त्रिशिष्येण पाटणकरोपाह्वश्रीमत्कृष्णस्य तनुजेन रघुनाथशर्मणा १८७३ शके खरेऽब्दे ज्येष्ठासितैकादश्यां भृगौ कृता ॥

लेखकप्रदत्ताः स्तोत्रद्वयगतानां दुर्बोधशब्दानामर्थाः ।

१ श्रीनीललोहित (शिव) पादादिकेशान्तस्तोत्रम् ।

६ श्लोके "वाडवेयः सौरभेयो भद्रः शक्वरशाक्वरौ" इत्यभिधान-चिन्तामणौ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१२ श्लोके "वेणी सेतुप्रवाहयोः । देवताडे केशबन्धे" इति हलायुधः ।
१४ ,, "शुम्भत्—भासमान ।"
१८ ', "मनःश्रृङ्गारसंकल्पात्मानो योनिः"—इति हेमचन्द्रः ।
श्रृङ्गारो योनिर्यस्येति श्रृङ्गारयोनिः ।
२० श्लोके "कल्याणं काञ्चने शुभे" इति त्रिकाण्डशेषः ।
३३ ,, "कटप्रूः कङ्कटीकश्च जटाटीरो दशाव्यय" इति वैजयन्ती।
३९ ,, "मार्जनं शुद्धिकरणे मार्जना मुरजध्वनौ" इति हेमचन्द्रः ।

अत्रैव मद्दत्ता दुर्बोधशब्दार्थाः ।

१-२८ श्लोकयोः "अवदानं तु सत्कृत्ये शौर्य आचरणे शुभे"
७ श्लोके "समौ रोलम्बलोलम्बौ"
२९ ,, "इन्दिन्दिरोऽली रोलम्बो द्विरेफोऽस्य षडङ्घ्रयः" इति अभिधानचिन्तामणिः ।
३९ ,, "वाणिन्यौ नर्तकीदूत्यौ" इत्यमरः ।

श्रीव्योमकेश-केशादिपादान्तस्तोत्रम् ।

५ श्लोके "नेत्रो नतरि वाच्यवत्" इति मेदिनी ।
८ ,, "बहुलः कृष्णपक्षेऽपि" इति त्रिकाण्डशेषः ।
११ ,, "उर्वरा सर्वसस्याढ्यभूमौ स्याद्भूमिमात्रके" इति मेदिनी।
१३ ,, "उकारः क्षत्रिये नेत्रे हारमूले हरे हरौ" इति एकाक्षरनिघण्टुः ।
१४ ,, "मन्थरः सुन्दरे मन्दे" इति त्रिकाण्डशेषः ।
१४ ,, "सांवनन्या वशीकरणसम्पादिन्या" ।
१७ ,, "भुजा बाहा च बाहौ स्यात्" इति त्रिकाण्डशेषः ।
१८ ,, "अभीक्ष्णं तु भृशे नित्ये" इति मेदिनी ।
१९ ,, "त्रिधामा त्रिविक्रमः" ।
२६ श्लोके "प्राचीनबर्हिः पुरुहूतवाडवौ" इति हेमचन्द्रः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याकरणविमर्शः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

"क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः" [१।४।३७] इति सूत्रस्य तत्त्वबोधिन्यां दृश्यते—[द्रुहादयोऽपि] कोपप्रभवा एव [गृह्यन्ते] इति। कथं तर्हि कुप्यसि कस्मैचित् इति। न हि कोपः कोपप्रभवः। अत्र व्याचख्युः। कुपिरत्र द्रोहार्थ इति। लघुशब्देन्दुशेखरे नागेशभट्टेनाप्युक्तम्—न ह्यकुपितः क्रुध्यति इति भाष्येण प्ररूढकोप एव क्रोधः इति कुपेस्तदर्थत्वाभावेन न तद्योग इदम्। "कुप्यति कस्मैचित्" इत्याद्यसाध्वेव। इति। शब्दरत्ने प्रौढमनोरमागतस्य "क्रोधोऽमर्षः" इत्यस्य व्याख्यानं दृश्यते—वाक्चक्षुरादिविकारानुमेयः प्ररूढकोप इत्यर्थ इति। तच्च ज्योत्स्नायां व्याख्यातम्—"यावद्वाचः स्फुरणं चक्षुषोः रक्तत्वं दन्तानां घर्षणमित्यादयो विकारा नाभिव्यज्यन्ते किन्तु सूक्ष्मरूपेणावस्थिताः, तावच्चित्तस्य कोपावस्था" इति। भावप्रकाशकारेण नागेशभट्टशिष्येण वैद्यनाथनोक्तम्—न ह्यकुपितः क्रुध्यति इति भाष्येण प्ररूढतादृशकोपस्यैव क्रोधत्वबोधनेन, कुपेरतदर्थत्वेन न तद्योग इदम्। "कुप्यति कस्मैचिदित्याद्यसाध्वेव।" एतेन तदङ्गीकुर्वन् दण्डी परास्तः। इति। भैरवमिश्रेण पुनश्चन्द्रकलायां कुप्यति कस्मैच्चिदित्यादीनां साधुत्वं समर्थितम्। तद् यथा—कुपधातुयोगे सम्प्रदानसंज्ञां वारयति—न ह्यकुपित इति। क्रोध इतीति बोधनेन इति शेषः। तदर्थत्वाभावेन क्रोधार्थत्वाभावेन। कुपधातुयोगे सम्प्रदानत्वं न, किन्तु तद्योगे कर्मसंज्ञेति शेषः। अत एव भाष्यकैयटोक्तं व्याकुप्येत इति कर्मप्रयोगो मनोरमोक्त उपपद्यते। यदि च—

शनिरशनिश्च तमुच्चैर्निहन्ति कुप्यसि नरेन्द्र यस्मै त्वम्।
यस्मै प्रसीदसि पुनः स भात्युदारोऽनुदारश्च ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति काव्यप्रकाशस्थप्रयोगानुपपत्तिरिति विभाव्यते तदा महाकविप्रयोग-दर्शनेन प्ररूढकोपार्थकत्वं कुपधातोरपि कल्पनीयम्। कोपसामान्यार्थक-कुपधातुयोग तु नेति समर्थनीयम्। इति।

प्रकृतसूत्रस्य भाष्यं यथा—किमेत एकार्था आहोस्विन्नानार्थाः। यद्येकार्थाः किमर्थं पृथङ् निर्दिश्यन्ते। अथ नानार्थाः कथं कुपिना शक्यन्ते विशेषयितुम्। एवं तर्हि नानार्थाः, कुपौ त्वेषां सामान्यमस्ति। न ह्यकुपितः क्रुध्यति न वाकुपितो द्रुह्यति न वाकुपित ईर्ष्यति न वाकुपितोऽसूयति इति।

कोप-क्रोधयोरवान्तरभेदो वर्ततां वा मा वा कुपधातोः क्रोधार्थकत्वे लेशतोऽपि संशयो नास्ति। यो हि कुपित स क्रुद्धः एव इति भाष्य-कारस्याशयः। न खलु तावता तयोर्भेदः संसिध्यति। सूत्रस्य व्याख्यान-सौकर्याय भगवतेदमुक्तमित्यपि न विस्मरणीयम्। भट्टोजिदीक्षितेन "द्रुहादयः कोपप्रभवा एव" इत्युक्तं न तु क्रोधादयः कोपप्रभवा इति, इत्यपि न विस्मरणीयम्। अत एव विस्पष्टमेव चन्द्राचार्येण "कोपस्थात-ऽनाप्ये" [२।१।७६] इति सूत्रितम्। अत एव कातन्त्रवृत्तौ दुर्गसिंहे-नोक्तम्—छात्राय क्रुध्यति, मित्राय द्रुह्यति, मित्रायेर्ष्यति, मित्राया-सूयति। यस्मै कुप्यतीति वक्तव्यम् इति। हेमचन्द्रेणापि क्रुध-द्रुहेर्ष्यासूयार्थैर्यं प्रति कोपः [२।२।२०] इति सूत्रस्य बृहद्वृत्तावुक्तम्—कोप इति किम्? शिष्यस्य कुप्यति विनयार्थम् इति। व्याख्यात-ञ्च तल्लघुन्यासे—शिष्यसम्बन्धिनोऽविनयस्योपरि कोपः, न तु शिष्यस्य ......अत्रेदं विचार्यते। कोपाद् द्रोहादयो भिन्नस्वभावा व्याख्याताः। तत् कथं तदर्थानां यं प्रति कोप इति सामान्येनैतद्विशेषणमुपपद्यते। तेषां हि 'यं प्रति द्रोहः' 'यं प्रतीर्ष्या' 'यं प्रत्यसूया' इत्येव घटते। नैष दोषः। क्रोधस्तावत् कोप एव। द्रोहादयस्तु द्विप्रकाराः। केचित् कोपहेतुकाः केचिद्वस्त्वन्तरहेतुकाः। तत्रहे पूर्वेषां ग्रहणं यथा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्यात् उत्तरेषां मा भूदित्येवमर्थं "यं प्रति कोपः" इति सामान्येन विशेषणमुक्तम्, अन्यथा व्यभिचारादिदमनुपादेयं स्यात् इति।

(क्रमशः)

श्रीमर्कटमार्दलिको नाम भाणः

[श्रीमहालिङ्ग-कवि-प्रणीतः]

लङ्कापुरोद्दीपनदीपदण्डं
　　कीनाशपाशं पिशिताशनानाम्।
आस्फोटशब्दत्रुटदद्रिकूटं
　　हनूमतो वालमनुस्मरामः॥

सूत्रधारः। भोः सभासदः, "विनायकं प्रकुर्वाणो रचयामास वानरम्" इत्याभाणकमनुसृत्य किमप्युपक्रमितुं चिन्तितम्, किमप्युपक्रान्तमस्माभिः। भवतु, एवमपि भवतामवश्यं चित्तविनोदः संपाद्यते, यदस्य रूपकस्य रचयिता,

　　महालिङ्गकविः सोऽयं यद्वा तद्वाप्युदारधीः।
　　विशोधयन्नुपादत्ते वस्तु यस्तून्नयत्यपि॥

अपि च वयं रङ्गप्रयोगेषु परिनिष्ठितकौशलाः। (श्रुतिभभिनीय) अये कोऽयं सीत्करोति निःसहमस्मदात्मश्लाघाममृष्यमाण इव (दृष्ट्वा), ह ह ह, विदितं भोः,

　　उदस्यन् लोललाङ्गूलमुत्पतन् विलुठन् भ्रमन्।
　　अयं वनमृगः कश्चिदावेदयति वेदनाम्॥

धिक् कष्टम्। अति हि व्यथते वराकः। भवतु, आर्तस्य पुरो न स्थातव्यम्। तदितो निष्क्रामामि। 　　इति निष्क्रान्तः।

प्रस्तावना।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(ततः प्रविशति यथानिर्दिष्टो वानरः)

वानरः। अहो धिक्! चापलात्कण्टकवृतिमुदग्रां लङ्घयतो मे लाङ्गूलं कण्टकाविद्धमभूत्, असह्या चेयं वेदना। तत्कुत्र नु खलु प्रतीकारमन्विष्यामि? (दृष्ट्वा) अये एष नापितः करणसमुद्गकं कक्षे निक्षिप्य आगच्छन् दृश्यते। नूनमनेन मे कार्यं साधयिष्यते। (उच्चैः) भो भो नापितमहत्तर, अस्ति मे कार्यम्। वेतनं ते दास्यामि। पश्य मे लाङ्गूलमूलम्। अत्र लग्नं कण्टकमुद्धर। त्वं हि मनुष्याणां शस्त्रचिकित्सामपि करोषि। वेदनार्तस्त्वां शरणं प्रपन्नोऽस्मि। किं ब्रवीषि? "भवतु पश्यामि" इति। अहो सुजनो भवान्। किन्तु खलु सुदृढं विद्धं कण्टकमशस्त्रोपायेनोद्धरिष्यति भवान्? स्वैरं प्रयुङ्क्ष्व शस्त्रम्! किं ब्रवीषि? "अवस्थितो भव शस्त्रं प्रयुञ्जानस्य मे" इति। एष स्थिरोऽस्मि। अविहा अविहा, भवान् मां मारयति! स्फारीभवति वेदना। अयि भो धूर्त किं मे पुच्छं त्वया चिकित्साच्छलेन समूलमुच्छिन्नम्? इदानीं न भवसि। उत्पाटयामि ते अक्षिणी, विदारयामि ते नासाम्। किं ब्रवीषि भयविह्वलः, "भो मर्कटराज, न मेऽत्रापराधः। कण्टकमुत्कर्षतो मे भवान् तथा उत्प्लुत्योत्प्लुत्यानर्तीत् यथा अवशान्मे छुरिका पुच्छमूले प्रहृतवती" इति। भोः अवितथम्, इयं च नः प्रकृतिः। किंतु न वयं नृशंसाः। त्वं तावन्मुच्यसे। मत्पुच्छविच्छेदी निस्त्रिंशस्त्वया मह्यं देयः। किं ब्रवीषि "गृह्णातु महाभागः" इति। ह ह ह दत्त्वा चासौ प्रधावितः (आत्मानं निवर्ण्य)।

भोः कष्टम्! छिन्नलाङ्गूलो मर्कटः कस्य न हास्यास्पदं भविष्यामि? भवतु वहामि निस्त्रिंशम्। उपस्थिता खलु सम्पदनुमोदितव्या। अथवा कथमेनं वहामि? न मे कक्ष्याबन्धः। विकोशश्चायमनिपुणेन मयोह्यमानो मा तावद्धस्तपादं मे निकृन्ततु। किं दूरत

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एनमुत्सृजामि ? अयं मे पुच्छप्रतिनिधिः कथमुत्सृज्यते ? (इति परिक्रामति)

अये कैषा जरती या शिम्बीपिटकं निष्पादयन्ती छुरिकाया अलाभान्नखैरेव वंशीशिम्बिका विदारयति ? अनुकम्पयाम्येनाम् (उपसृत्य) अयि मातः, मास्तु ते क्लेशः, एष निस्त्रिंशस्ते कर्मलाघवमातनोतु । न च मेऽस्मिन् स्पृहा । किं ब्रवीषि, "कस्त्वम्" इति । अहं हि पूर्वं वानरः, पुच्छच्छेदादिदानीं नर एव । तिष्ठत्वतिप्रसङ्गः । अस्ति निस्त्रिंशेन प्रयोजनं न वा ? किं ब्रवीषि "क इदानीं भवन्तमन्तरेणेदृशमुपकारं चिन्तयति" इति । तिष्ठतु श्लाघा । न वयं प्रत्यक्षस्तवमभिनन्दामः । गृह्णात्वत्तिका । साधयत्वेतेन कर्म । किं ब्रवीषि, "चिरं जीव" इति । अतिसाध्वी खल्वसि । साधयामस्तावत् । (किञ्चिदन्तरं गत्वा) अहो मे लाङ्गूलमोक्षाद् गतिवैचित्र्यं सञ्जातम् । (श्रुत्वा) अये कोऽयं चटच्छब्दः ? इयं च जरती परितप्यते । (निवृत्य) अयि मातः, किमापतितम् ? किं ब्रवीषि "पिटकग्रथने व्यापारितेयं छुरिका भग्नेति । अयि मूढे लब्धपरिपालनासमर्थे, धिक् त्वाम् । मत्पुच्छप्रतिनिधिं निस्त्रिंशं त्रोटितवत्यसि । किं ब्रवीषि "कृपालो, अशरणाहं किं करिष्ये" इति । तर्हि एनमेव पिटं मूल्यं कल्पयित्वा आत्मानं मोचय । किं ब्रवीषि "दिष्ट्या प्रसन्नो भवान्, कुरु यथेच्छम्" इति । एषा पिटं विसृज्य व्यपेता । अहो बत जरत्यामपि शुल्कनिष्ठुरो जातोऽहम् । अथवा ईदृशो व्यवहारः । तदिदानीं दैवनियोगात् पिटवाही संवृत्तोऽस्मि । कुतः पिटः कुतो मर्कटः ? फुरुफुरायन्ते ममाङ्गुल्यः एनं पिटमवयवशः प्रविलोप्तुम् (परिक्रामति) ।

अये को मामाह्वयति ? (विभाव्य) दिष्ट्या न माम् । कोऽप्यसावुपच्छन्दयति बलीवर्दयुगलं पिण्याककार्पासकवलैः कटे भूमावास्तृतैः । भवतु द्रक्ष्याम्येनम् । (परिक्रम्य) भद्रमुख, कोऽयं निर्बन्धः ? किं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बलीवर्दौ भूतलप्रक्षिप्तं पिण्डं भोक्ष्येते ? किं ब्रवीषि "पिण्याकपिटोऽचिरादाभ्यां ध्वंसितः। एवमेव प्रत्यहं शृङ्गाशृङ्गि कुर्वाणावेतौ दुर्दान्तावशनपिटं नाशयतः। किमहं करवाणि ? अर्हत एतावुपेक्षाम्" इति। सखे मा शुचः, किमहमनेन पिटेन करोमि। आदत्स्व स्वैरमुपयुङ्क्ष्व। किं ब्रवीषि, "मा मा भवान्। दुष्टावेतौ बलीवर्दावर्हतोऽवज्ञाम्" इति। भद्र, न मे प्रणयस्त्वया विच्छेदनीयः। किं ब्रवीषि "यदि ते निर्बन्धः ग्रहीष्यामि" इति। गृहाण गृहाण। (दत्त्वा) अहह यदसाववदत् तदमिथ्यैव। दुष्टावेतौ बलीवर्दौ परस्परसङ्घर्षेण द्रुतमवघट्य आच्छिद्य विमृद्य च पिटं क्षणात् ध्वंसितवन्तौ, अहो मे, पिटको विपन्नः, अहो मे पुच्छप्रतिरूपको विपन्नः, न मृष्याम्येनं पुरत एवावस्थितमपराधिनम्। (सक्रोधम्) भो दुर्मते, गृहीतस्त्वया मे पिटकः। न च किंचिन्मूल्यं दत्तम्। प्रत्यर्पय पिटकम्। किं ब्रवीषि "त्वयानिच्छतो मे प्रतिपादितः, नाशितो बलीवर्दाभ्याम्। कस्त्वं मामभियोक्तुम् ? कोऽहं ते दातुम् ? पृच्छ बलीवर्दाविव" इति। एवं नु भणसि ? भवतु। बलीवर्दौ मे पिटकप्रतिभुवौ न्यायस्थलेऽभियोक्ष्ये। एतम्, बलीवर्दौ मे प्रतिवादिनावेतम्। अधिकरणं नेष्यामि वाम्। अरे मूर्ख, किमवगृह्णासि ? तिष्ठ दूरतः। कोऽहं तव ? त्वं वा को मम ? अहं बलीवर्दौ प्रक्ष्यामि किल। यदि मन्मार्गं निरोत्स्यसि तदा त्वन्नयने उत्पाटयिष्यामि। नासापुटं विदारयिष्यामि। श्रवसी निकर्तयिष्यामि। केशान् विलोप्स्यामि। हहह! एष भीषितो मया प्रनष्ट एव। हे हे बलीवर्दौ हे हे।

(परिक्रम्य श्रुतिमभिनीय) अयं कश्चिन्मामाह्वयति। कस्यैषा धीरता ? एष खलु चक्रोपजीवी वणिक्। भो वणिग्वर, कुतो मां शब्दाययसि ? किमहं ते परिचितपूर्वः ? किं ब्रवीषि "कुतस्ते इमौ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वलीवर्दौ" इति । यतः कुतो वा । किमियं ते विचिकित्सा ? किं ब्रवीषि, "मारिष, मा कुप्य । ममास्ति प्रयोजनमेताभ्याम् । किं न पश्यसि मां स्वयमुद्युज्यमानमेतस्य तैलयन्त्रस्यावर्तने" इति । पश्यामि, भाव, पश्यामि । किं मया करणीयम् ? किं ब्रवीषि "यदि मे मारिषः प्रसीदति, ग्रहीष्याम्येतौ मुहूर्तमात्रं यन्त्रपरिवर्तनाय" इति । भाव, अनेन प्रस्तावेन साप्तपदीनमावयोः सख्यं संवृतम् । बन्धुरिव मधुरं त्वं मामाह्वयसि । किं ब्रवीषि सादरम् "अथ किम्, अथ किम् । कः सन्देहः?" इति । भाव, न खलु अतिमात्रमायास्य पादानेतयोर्भङ्क्ष्यसि । किं ब्रवीषि "न न, अरुग्णौ पुनरेतौ बाढं ते निर्यातयिष्यामि" इति । तेन हि नियोजयतु भाव एतौ युगन्धरौ । किं ब्रवीषि, "अतिदृढावेतौ कर्मसहौ नैतयोर्विपत्तिशङ्का" इति । तथाप्यस्ति खलु पुरुषप्रमादः परिहरणीयः । भोः, मा तावत् तोत्रेण दृढं प्रहर । अयि भोः मैवं वालनालमवरुज । किमसौ न शृणोति ? अहो धिक् परिकृष्यमाणस्य यन्त्रहतकस्य दुःश्रवोऽयं क्रेङ्कारवः (उपसृत्य किञ्चिदुच्चैः) भाव, जिगमिषा मे जाता, प्रत्यर्पय धवलौ । किं ब्रवीषि "अहो मारिष, किं न जानीषे, सांप्रतमेव निष्पीड्यमानास्तिला निश्च्योतयितुमारभन्ते । प्रतिपालयतु मारिषः" इति । भाव, कियत् प्रतिपालयितव्यम् ? अक्षमा वयं जातिस्वभावेन प्रतिपालनकर्मणि । तद् भावो मां विसर्जयतु । किं भणसि, "एष विसर्जयामि" इति । कदा ? किं ब्रवीषि, "कलशमात्रं तैलमुद्धृतम्, अवरतस्त्रयोदशकलशा उद्धर्तव्याः । यदि मारिषः कार्यान्तरं स्मरति गत्वा श्वः प्रातरागम्यताम्," इति । अरेरे जाल्म, किं निक्षेपमात्रे स्वाम्यमभिमन्यसे ? अपेहि रे दुर्मते अपेहि । कस्य स्वं केन भुज्यते ? किमहं ते श्वः प्रातरागमिष्यामि ? मय्यपि भो वैयात्यं प्रदर्शयसि ! किं त्वत्प्रतीक्षया मया रात्रिर्जागरितव्या, कितवस्य तव हस्ते लग्नाविमौ मे धवलौ कथं प्रत्युपेष्यतः इति । विरम रे परवञ्चक,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हीनमते, विरम। अथवा स्वयमेवाहं मोचयित्वा ग्रहीष्यामि धवलौ (इति साटोपमुपधावति)।

(प्रतिहतिमभिनीय) हा धिक् किमयं दुष्टवणिग्युगमूलमुपारूढो हस्तगतेन सशलाकेन तोत्रेण मां तर्जयते। साहसिकश्चायं वणिक्पाशः। अहो वैशसम्! तदिदं प्राप्तकालम्। योऽयमुद्धततैलोपेतः कलशस्तमपहरामि। दिष्ट्या आसादितः कलशः। अरे वैश्यापसद, मृत्तिका निपततु ते वाणिज्ये। अरे परस्वापहारिन् भज्यन्तां ते यन्त्रोपस्काराः। म्रियेतां बलीवर्दौ! मृत्युमुखं द्रक्ष्यसि। एष हसन् किं ब्रवीषि, "ध्वंसस्व अपुनर्निवर्तनाय" इति। अहो चोरस्यापि चोरः! ईदृशैः खलु धूर्तकै दुःसञ्चरो हीनप्रभावाणां संसारवर्त्मा। भवतु यथालाभपरितोषिणा भवितव्यम्। (परिक्रामति)।

अहो नु खलु भोः किमिदं कष्टात् कष्टतरं मयोपार्जितम्। एष तैलपूर्णः कलशः गत्युद्घातवशात् अकृत्यकारिणं मामङ्कयन्निव, झलज्झलायमानतैलबिन्दुवर्षैः स्नपयति। न च प्लवङ्गमेन मया सुलभा समविक्षेपसरला मानुषाणां गतिः। दुर्वहश्चायं भारः। कुतः खल्वात्मानं क्लेशयामि? तदस्मिन् वृक्षोपान्ते क्षणमेतमवतार्य विश्रमसुखमनुभवामि। (विश्रम्य पुरः सदृष्टिक्षेपम्) अदूरे चायमुटजः। किमत्र यः कश्चिद् वसति, उत आवासयामि? (विलोक्य) अये एषा कापि बहिरुद्ग्रीविकां कुर्वती जरती किमप्यन्तर्घुरुघुरायते, किमपि परिभ्रान्तेव दुःखमास्ते। भवतु सम्बोधयाम्येनाम्। (उपसृत्य) मातः, कीदृशी वार्ता? किं विषण्णेव दृश्यसे? किं ब्रवीषि "अहं किलापूपिकी। प्रत्यग्रनिष्पादितैः क्रय्यैरपूपैर्वृत्तिं सम्पादयामि। तस्या ममाद्य चुल्लीं प्रज्वाल्य सज्जीकृत्य च पिष्टं चक्रिका निष्पादयितुं तैलभाण्डमाहरन्त्या हस्तात् सहसा भ्रष्टं भग्नं भाण्डं विनष्टाखिलतैलं जातम्" इति। अहो दैवनिर्घातः! जननि, मा शुचः। अस्ति मन्निकटे प्रभूतं प्रत्यग्रं तैलम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आदत्स्व, निर्वर्तय चक्रिकाः। किं भणसि, "आयुष्मान् भूयाः, भद्राणि पश्य" इति। प्रतिगृहीतास्ते आशिषः। परोपकारपरायणं मे जन्माद्यैव कृतार्थं भवति। एतत्तैलभाण्डम्, स्वीकरोत्वत्तिका (दत्त्वा विश्राम्यति)।

(विलोक्य) अहो परःशताश्चक्रिका मुहूर्त्तमात्रेणानया निष्पादिताः। अयि मातः, किं तैलं शिष्यते उत पिष्टम्? किं ब्रवीषि, "पिष्टमेव शिष्यते, कुतस्तैलम्" इति। किं सर्वं मम तैलं त्वयाऽस्यामायसफलकायामाहुतीकृतम्? कच्चिदपूपान्येव मह्यं दास्यसि? किमाह भवती "एतानि मे विक्रेयाणि" इति। हुं! एवं नु! कस्य तैलमुपयुज्यते? का त्वमेता विक्रेष्यसे? अहो कालस्य कौटिल्यं, यत्परद्रव्येणात्मभरणम्। अयि दुराशापिशाचग्रस्ते, दुष्टजरति, अपेहि। निष्क्राम! उत्सर! पलायस्व! अहमस्योटजस्याधिपतिरन्यथा नखदंष्ट्राविपाटितविकीर्णां त्वां वृकवायसेभ्यो बलिं कल्पयिष्यामि। ही ही ही विद्रुतेयमापूपिकी विक्लवं परिदेवयन्ती। (विहस्य) अहो बत जरत्यामपि मया सुभटायितम्। (अन्तः प्रविश्य) किमिदं भूगृहमिवाल्पानिलप्रचारं विरलरविरश्मि सङ्कटावकाशं दुरावसथमतिमहता प्रयासेन मया सम्पादितमस्ति। तत्तूर्णं पिष्टापूपजातमभ्यवहार्यं स्वजातिसमुचितं शाखानिलयमपाश्रये। अहो उत्सेधवानपूपराशिः। किं भुनजै अथवा अतिथीनन्वेषै? नैकाकिना किल स्वादु भोक्तव्यम् (द्वारमासाद्य) कः कोऽत्र भोः स्वागतमतिथिभ्यः! (दृष्ट्वा) अये एते पञ्चषा इतोमुखमुपसर्पन्ति नूनं सम्भावयिष्यन्ति मदाह्वानम्। एते किल माङ्गलिकवाद्यसंमेलकर्तारः। तेन हि सफलं मे सुव्रतम्। अयि भोः अलं शङ्कया। स्वगृहमेतदतिथीनाम्। आगच्छत। निषीदत। पवित्रीकुरुत मन्निकेतनम्। धन्योऽस्मीदानीं भवतामतिथीनां लाभात्। किं ब्रूथ, "कुत्र सापूपिकी जरती" इति। अलं विचारेण। अयमस्मि तस्याः पुत्रकृतकः। किं वः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कार्यं तया ? किं ब्रूथ "रे वानरमहत्तर क्षुधिता वयमापूपिकीमन्विष्यामः" इति। बाढं वानरोऽस्मि, तथापि विश्वसित भोः, अहं तस्या अनन्तर आपूपिकः संवृत्तः। किन्तु न मया अपूपानि विक्रीयन्ते, तैरतिथिव्रातमाराध्य धर्मार्जनमिष्यते। तेन हि स्वागतं वः! सज्जाः पिष्टापूपचक्रिकाः, निषेवध्वं यथेच्छम्। किं ब्रूथ, "प्रियं नः" इति। तेन ह्यादद्ध्वम्, अत्त, जक्षित, खादत, भुङ्ग्ध्वम्, ग्रसध्वम्, अश्नीत, निगिरत, अभ्यवहरत, भक्षयत, गृह्णीत, गृह्णीत, पुनर्गृह्णीत। (अपवार्य) अये अहमपि क्षुधितः। (प्रकाशम्) किं भोस्तृप्ताः स्थ ? किं ब्रूथ, "अहो सौष्ठवम्! अहो स्वादुता! अहो पाकसंयोगः! पुनः पुनर्ददातु भवान्" इति। अये दास्याःपुत्राः, किं पुनः पुनर्ददामि ? नावशेषयथ मह्यमेकामप्यपूपिकाम् ? अहमपि क्षुधितः। ननु भवन्तो भणथ, 'भाव कुतस्त्वमपि नाश्नासि' इति। अहो नु भोः,घस्मराः, उदरम्भरयः, स्वार्थपराः, बडवाविशिष्टोदराः, वराकाः, किं पुनर्दद्याम् ? इदं वो दद्याम्, काष्ठं दद्याम्, अङ्गारं दद्याम्, गोमयपिण्डं दद्याम्, सम्मार्जनीं दद्याम्, चपेटां दद्याम्, गलहस्तिकां दद्याम्! अपेत! विद्रवत! नश्यत! ध्वंसध्वम्! पलायध्वम्! ह ह ह हा हा हा प्रनष्टमेतैर्महाशिभिः! अहो नु खलु भोः! के बकभीमकुण्डोदराणामेते ?

(निपुणमपूपभाण्डं निर्वर्ण्य) यत्सत्यं समग्रमेवापूपकूटं निःशेषतामनेष्यन्, यद्यहमत्यन्तलोपात् प्रागेव नावारयिष्यम्। दिष्ट्या स्तोकमवशिष्टम्। (उपविश्याभ्यवहार्य) धावद्भिराकीर्णानि शकलान्यप्यद्य बहुमन्तव्यानि। (उच्चित्य भुक्त्वा) श्रान्तोऽस्मि भोः अनेन मानुषसंसर्गदौर्गत्येन। (दृष्ट्वा) अये किमिदम्! परित्यज्य खलु धावितं तैरेनं मर्दलम्। अस्ति मे कुतूहलमस्मिन्। विश्रमहेतोः सङ्गीतकं सेवे। कुत्र विश्रमोऽस्माकं मुक्त्वा तरुशिखरम् ? तदादाय मर्दलमस्य महान्यग्रोधस्य स्कन्धे सुखासीना भवामि। (तथा कृत्वा) अये अदूरे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च मे सगोत्राः। त्वरयति मामुत्कण्ठा मानुषेष्वोजायितं मे सगोत्रेषु प्रख्यापयितुम्, यथा न ते छिन्नपुच्छं मामुपहसेयुः। तद्वादयामि मर्दलम्।

टंटं टटंटं टटटं टटंटम्

अये मर्दलशब्दाहूताः मद्वयस्या बान्धवाश्च मामाश्चर्यविस्फारितदृशः परिवृण्वन्ति, तदेवमभिव्याहराम्येनान्। (सावष्टम्भगम्भीरम्) अयि भोः हनूमदन्ववायवारिनिधिपारिजाता रामदेवपादानुध्यातारः परबल-विजेतारः शाखासहस्रनिलया वनालयाः, अद्य मानुषवर्गसंसर्गं दैवगत्या समधिगत्य तद्विश्वासहेतोः परित्यक्तपुच्छभारोऽहम् वानरत्वान्नरत्वमु-पारूढः गूढचारः सन् सङ्गीतकभङ्गिं शिक्षितवानस्मि। श्रूयतामवसरप्राप्तं किमपि गीतवस्तु। किं ब्रूथ भोः पुच्छमास्फोटयन्तः किलकिलारावैः कोलाहलं कुर्वन्तश्च "भ्रातः शृणुमः शृणुमः" इति। तेन हि दृढमात्म-निग्रहेण साधितस्पन्दविरहाः किलकिलां बलान्मुद्रयन्तः शृणुत। (गायति)

वालं विहाय च्छुरिकोपलब्धा
निस्त्रिंशमूल्यं पिटको गृहीतः।
पिटस्य नाशे वृषभावुपात्तौ
तयोः प्रहाणेन घटः सतैलः॥
टं टं टटं टं टटटं टटं टं
टं टटं टं टटटं टटं टम्॥

Musical Notes.

पापाम रीगारि रीसा ; ;
मामाम मामाम गागारि सरिगा॥

स्वरविशेष-सूची—

शुद्धर्षभः प्रथमः साधारणगान्धारः अनन्तरगान्धाराः शुद्धमध्यमः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तैलव्ययेनाप्तमपूपजातं
दत्त्वा तदर्थिष्वथ मर्दलोऽयम् ।
न वानरो मार्दलिको न भूयात्
टटं टटटं टटटं टटं टम् ॥

अये, शाखाडोलान्दोलनमपि विस्मृत्य विस्मयपरवशाः सारस्यभूमानमनुभवन्तः शृण्वन्ति मां सुहृदः । तदिदमपरं गीतवस्तु—

जेता बली राजतेऽन्धे
लोके तमुच्छिद्य धूर्तः समिन्धे ।
सर्वः परद्रव्यलोलः
पूर्वं भवेच्चारुसंलापशीलः ।
टटं ट टटं टटटं
टं टटं टटटटंट टटम् ॥

दीनेषु दैन्यं निविष्टं
स्यात्साहसे श्रीर्हि सर्वत्र दृष्टम् ।
स्वार्थं स्वयं चेन्न मन्ता
कस्येतरस्य प्रसज्येत चिन्ता ॥
टटंटटंटटटटं
टटंटटंटटटंटटटंटम् ॥

मूढा निरस्यानृशंस्यं
सत्यं दयां पापचिन्तामवश्यम् ।
स्वार्थे स्वयं व्याप्रियध्वं
स्वेष्टं परस्माद् यथेच्छं हरध्वम् ॥
टटंटटंटटं
टटंटटंटटटंटटटंटम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लोकं विगाह्याविलाम्भः-
कासारकल्पं विनिर्णीतदम्भः ।
श्रीमन्महालिंगनामा
कविर्व्याख्यदेवं* गभीरार्थधामा ।
टंटंटटंटंटटंटं
टंटंटटंटंटटंटंटटंटम् ।

अहो आनन्दमन्थराः सगन्धा मन्मर्दलटङ्कारानुहरणस्फोटितशाखा-शतविधूतफलपर्णनिचया लोलवालहस्तावष्टब्धतरुस्कन्धविगलत्कलेवर-विवशान्दोलनकन्दलितहेलासमुल्लासाः किं ब्रूथ। "सखे निर्भरमाराधिता वयं तव गीतमधुना मत्ता इवेदानीं विभ्रमामः" इति। अहो भोः कृतार्थोऽस्मि। एवं च भोः सुहृदः प्रियबान्धवाः किं वो भूयः प्रियमुपहरामि ? किं ब्रूथ "किमतः परमपि प्रियं यदास्माकीनस्त्वं मानुषकल्पः कलाशिक्षया कायलक्षणेन च नित्यमेव नो गोष्ठीमुकुट-मणिर्जातः" इति। अत्युदारमभिनन्दनम्, अनुगृहीतोऽस्मि भोः। तथापीदमस्तु भरतवाक्यम्।

येषां न लक्ष्म त्रुटितं न येषां
क्रियान्तरायः करणप्रणाशः ।
आधारमुन्मृज्य न भुज्यते यै-
र्ये निग्रहस्थानविदः परेषाम् ॥
लग्नं न यैर्दुर्जनवागुरासु
लग्नैश्च वात्मोद्ध्रियते कथञ्चित् ।
आर्तानुकम्पाकृत आतिथेया
ये ये च ते सन्त्विह संप्रहृष्टाः ॥

इति निष्क्रान्तः

---

* "व्याख्यत्तदेवं" इति पाठान्तरम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्याख्येयानि वार्त्तिकानि

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

१। इवेन सह समासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वञ्च।

कस्य वा न विदितं वैयाकरणस्य "इवेन सह समासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वञ्च" इति सहसुपा-सूत्रगतं द्वैतीयीकं वार्त्तिकम्? तच्च भाष्यकृता व्याख्यातम्—इवेन सह समासो विभक्त्यलोपः पूर्वपद-प्रकृतिस्वरत्वञ्च वक्तव्यमिति। "कुगतिप्रादयः" इतिसूत्रस्य [२।२।१८] भाष्येऽपि वार्त्तिकमुदाहरणद्वितयञ्च सन्दृश्यते। काशिकायां सह सुपेति सूत्रे वार्त्तिकमिदं नोपलभ्यते, कुगतिप्रादय इति सूत्रे पुनर्दृश्यते— "इवेन सह समासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वञ्च वक्तव्यम्। वाससा इव।" इति। व्याख्यातञ्चेदं काशिकाविवरणपञ्चिकायाम् —" 'सर्वधातुभ्योऽसुन्' इत्यनुवर्तमाने "वसेर्णिच्च" [उ०४।२२३] इत्य-सुन्प्रत्ययान्तो वासस्शब्दो व्युत्पादितः। वस्त्रशब्दोऽप्यौणादिकष्ट्रन्-प्रत्ययान्तः, तेन द्वावप्येतौ 'ञ्नित्यादिर्नित्यम्'[६।१।१९७] इत्याद्युदात्तौ।" इति। पदमञ्जर्य्यामपि दृश्यते—वसेर्णिच्च इत्यसुन्प्रत्ययान्तो वासःशब्दः, वस्त्रशब्दष्ट्रन्-प्रत्ययान्तः, द्वावपि नित्त्वादाद्युदात्तौ* इति। अत एव "वाससी इव" "वस्त्रे इव" इति जिनेन्द्रबुद्धिहरदत्तसम्मतः काशिकपाठ इति प्रतिभाति। परं भाष्यगतमुदाहरणद्वितयमेव समीचीनतरम्, आद्युदात्तत्वस्यान्त्यस्वरितत्वस्य च द्विविधस्य स्वरस्य प्रदर्शनात्।

यथास्माभिर्दृष्टं तथा प्राचीनेन केनापि टीकाकृतात्र समासस्वीकारे बीजं न विचारितम्। समासे ऐकपद्याद्विभक्तिलोपः सञ्जायते ऐकस्वर्यं

---

* मुद्रितायां पदमञ्जर्यां "नित्याद्युदात्तौ" इति पाठः, स च स्पष्टमेव प्रामादिकः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च सङ्घटते, अत्र पुनरन्तरेणापि समासमुभयमपि तत् सुघटम्, इवशब्दस्य सर्वानुदात्तत्वात्, समासेऽपि विभक्त्यलोपस्य पूर्वपदप्रकृतिस्वरत्वस्य च विधानात्। यदि पूर्वपदस्योत्तरपदस्य च यथायथमवस्थानं तर्हि समासस्वीकारपुरःसरं विभक्त्यलोपविधानं पूर्वपदप्रकृतिस्वरविधानं च शिरोवेष्टनपूर्वकनासिकाप्रदर्शनन्यायं संस्मारयति।

मैत्रेयरक्षितेन तन्त्रप्रदीप उक्तम्—इवेन* समासवचनं विभक्त्यलोपश्चेति समासाश्रितस्य लुकः प्रत्यासत्त्यायं निषेधः इतीवाद्† अव्ययाल्लुग् भवत्येव। उत्तरपदप्राधान्यात् तत्पुरुषस्य समासे कृते इवान्तस्याव्ययत्वमिति समुदायादपि सोर्लुक्। स चाप्यत्रार्थो वस्त्वन्तरमुपमेय इति वक्ष्यते। समासत्वे चात्र पूर्वपदप्रकृतिस्वरे सति विशेषणस्य समासस्यानुदात्तः प्रयोजनम्। इति।

व्याख्यातञ्चेदं तन्त्रप्रदीपप्रभायाम्—"इवेन समासवचनं विभक्त्यलोप इत्युक्तम्। यद्येवम् इवशब्दात् सोर्लुगभावे विभक्तेः श्रवणं प्राप्नोतीत्यत आह—स चात्रेत्यादि। यदि विभक्त्यलोपस्तदा समासेन किं प्रयोजनम्? अन्तोदात्तार्थमिति चेत्, न, पूर्वपदप्रकृतिस्वरस्योच्यमानत्वात् इत्यत आह—समासत्वे चात्रेत्यादि। यदि समासत्वादेव पूर्वपदव्यवहारस्तदैव पूर्वपदप्रकृतिस्वर इति" इति।

एतत्तु सर्वथा चिन्त्यमेव। मा भूत् समासः मा च भूत् पूर्वपदव्यवहारः, किं नश्छिन्नं तावता? पृथक्पदत्वेऽपि सुतरां विभक्तिश्च स्वरश्च सिध्यतः, इवशब्दस्य स्वत एव सर्वानुदात्तत्वात् "अनुदात्तं पदमेकवर्जम्" इति परिभाषामन्तरेणैव तस्य निघातः सिद्ध एव।

सृष्टिधरेण भाषावृत्त्यर्थविवृतावन्यथैव समासविधानं समर्थितम्।

---

* हस्तलिखितपुस्तके 'इतरेण' इति पाठः।

† इतरात् इति हस्तलिखितपुस्तकपाठः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथाहि "कुगतिप्रादयः" इतिसूत्रीयवृत्तेर्विवृतिः--"इवेन सह नित्यसमासो विभक्त्यलोपश्चेति गणसूत्रम् । चन्द्र इव । वाससी इव । उत्तरपदार्थस्य प्राधान्यादिवान्तस्याव्ययत्वमिति समुदायादपि सुपो लुक् । इन्द्र इव चासौ राजा चेति विशेषणसमासे इन्द्रइवराजः । राजाहःसखिभ्यष्टच् इति टच् । इति ।" एतदप्यभित्तिचित्रायितम्, एतादृशस्य समासस्यैवानभिधानात् ।

हेमचन्द्रेण "नाम नाम्नैकार्थ्ये समासो बहुलम्" [३।१।१८] इति सूत्रस्य बृहद्वृत्तावुक्तम्—तथा कन्ये इव, दम्पती इव, वाससी इव, रोदसी इवेत्यादिष्विवेनालुप्समासः, ऐकपद्यं च समासफलम् । इति ।

कातन्त्रपरिशिष्टकृता "इवेनालोपश्च स्यादेः" [समास १०५] इति सूत्रं निर्माय वृत्तावुक्तम्—इवेन सहोपमानस्य तत्पुरुषो भवति, पूर्वस्य स्यादेर्लोपश्च न भवति । अग्निरिव, वायुरिव, परमोच्चैरितिवदव्ययम् । क्रुङ्ङिव सुगण्णिव पचन्निव उत्तरपदे नित्यत्वाद् द्विर्न स्यात्, समासे सति तद्धितान्तो वृत्त्यन्तश्च(?) स्यात्, अग्निरिवपाशम्, वायुरिवपाशम्, अग्निरिवसखः, वायुरिवसखः, अग्निरिवमन्यः, वायुरिवमन्यः, अग्निरिवगुः, वायुरिवगुः, अग्निरिवराजः, वायुरिवराजः । समासान्तोऽत् स्यात् । तत् कथं वाक्यमेवेदमिति मत्वा चान्द्रेण प्रत्याख्यातमिदम् । इति ।

अत्र गोपीचन्द्रटीका समुदायेऽव्ययार्थप्राधान्यादव्ययोऽयं समुदाय इत्याह—परमेति । समासप्रयोजनमाह—उत्तरेति । "ङणनानामुत्तरपदे वा द्वित्वम्" इत्युक्तमेव ।

भट्टोजिदीक्षितेन सह सुपेति सूत्रस्य कौस्तुभ उक्तम्—इवेन समास इत्यपि सुप् सुपेत्यनेन सिद्धमित्युक्तम् । युक्तं चैतत् । अन्यथा वार्तिकरीत्या नित्यसमासतापत्तौ...जीमूतस्येवेत्यादौ तैत्तिरीयाणां पदद्वयत्वेन पाठासङ्गतिप्रसङ्गाच्च । अत एव "उद्बाहुरिव" [रघु० १।४]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यादौ व्यस्तव्यवहितप्रयोगोऽपि सङ्गच्छते। यथोत्तरं मुनीनां प्रामाण्यात्। ..."वागर्थाविव" [रघु० १।१] इत्यादाविवशब्दस्तु समस्तः पृथग्वा। "उद्बाहुरिव वामनः" "कचाचितौ विष्वगिवागजौ गजौ" [किरात १।३६] इत्यादौ पृथगेवेति तत्त्वम्। यत्तु कश्चिदिवेन समासश्छान्दस इत्याह, तन्निर्मूलं तैत्तिरीयपृथक्पाठविरुद्धं च, इवसमासे समासगां श्रौतीमुपमामुदाहरतामालङ्कारिकाणां प्रतिकूलं च। किञ्च, "हरीतकीं भुङ्क्ष्व राजन् मातेव हितकारिणीम्" "अद्वैतमप्यनुभवामि करस्य बिल्वतुल्यं शरीरम्" "अहिनिर्ल्वयनीव वीक्षे" इत्यादयः समस्त-प्रयोगा "न ह्यस्ति प्रथमान्तेनैव" इत्यन्यपदार्थसूत्रस्थभाष्यसम्मताः। अत एव "अग्निरिवराजो" "वायुरिवपाशः" इत्यादि परिशिष्टोदाहरण-मपि सङ्गच्छत इत्यास्तां तावत्। (पृः ५८५) इति। (क्रमशः)

"उत्तिष्ठत जाग्रत"

[श्री जी. बी. पलसुले]

'मिथ्या माया भ्रमो जीवनं'
मा गासीरिति दीनं गानम्।
मृतायतेऽसौ यस्तन्द्रयते
वस्तुरूपमपि बहु वञ्चयते ॥१॥

सदेव सौम्याऽऽवेहि जीवनं
तथास्य मरणं नान्त्यं शरणम्।
'मृदेव जीवो मृदं प्रयाति'
आत्मानं तन् नाभिप्रैति ॥२॥

कर्म स्वं स्वं समाचरेम
दिवसे दिवसे पुरः सरेम।
इतीह सृष्टाः, सुखं न भोक्तुं
जगदसारतां न वा शोचितुम् ॥३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इयं यामिनी क्षणस्थायिनी
यत्र नाटकं दीर्घदशाङ्कम् ।
हृदि यः स्पन्दो यदप्यमन्दः
स महायात्रापटहो मन्द्रः ॥४॥
जगन्नाम्नि विस्तृतरणाजिरे
घोरेऽस्मिन् संसारसङ्गरे ।
जय तरसाऽरीन् भव वीरस्त्वं
परोत्सार्यमेषो मा भूस्त्वम् ॥५॥
अनागते वा समतीते वा
मा भज काले मुदं शुचं वा ।
वर्तमानमात्रमाद्रियस्व
श्रीशसाक्षिकं कर्म कुरुष्व ॥६॥
जीवितक्रमा महाजनानां
कुर्वन्त्येवं सदा स्मारणम् ।
शक्यं जीवितमुच्चैः कर्तुं
पदचिह्नानि च परिरक्षयितुम् ॥७॥
कालवालुकातले विशाले
विलोक्य यानि च भविष्यकाले ।
भवाब्धिपथिको भग्ननौरपि
धृतिं धारयेदसहायोऽपि ॥८॥
उत्थानरतो भव तस्मात् त्वं
भावि भवत्विति निर्भीकत्वम् ।
भजस्व, शीलय तथाऽखण्डितां
कर्मशीलतां, फले धीरताम् ॥९॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Cf. व्याकरणं नामेयमुत्तरा विद्या। सोऽसौ छन्दःशास्त्रेष्वभिविनीत उपलब्ध्याधिगन्तुमुत्सहते। महाभाष्य १।२।३२

स्थानानि कण्ठादीन्यष्टौ, करणमाभ्यन्तरप्रयत्नः, अनुप्रदानं बाह्यप्रयत्नः। नागेशः। यदुपक्रम्यते तत् स्थानम्। येनोपक्रम्यते तत् करणम्। "Two organs are always concerned in the production of a sound, and by their contact or approximation the sound receives its character: of these, the more immovable one is called the sthāna, or place of production, and it is from this that the sound derives its class designation; the more movable or active one is called the *karaṇa* or instrument of production." WHITNEY.

अनुप्रदानात् संसर्गात् स्थानात् करणविन्ययात्।
जायते वर्णवैशेष्यं परिमाणाच्च पञ्चमात्॥ तै० प्रा० २३।२

करणविन्ययात्=करणविन्यासात्।

[*Grammar—its method—only correct words are to be taught.*]

शब्दानुशासनमिदानीं कर्त्तव्यम्। तत् कथं कर्त्तव्यम्—किं शब्दोपदेशः कर्त्तव्यः, आहोस्विदपशब्दोपदेशः, आहोस्विदुभयोपदेश इति?

अन्यतरोपदेशेन कृतं स्यात्। तद् यथा भक्ष्यनियमेनाभक्ष्यप्रतिषेधो गम्यते। 'पञ्च पञ्चनखा भक्ष्याः' इत्युक्ते गम्यत एतद्—अतोऽन्येऽभक्ष्या इति। 'अभक्ष्यप्रतिषेधेन वा भक्ष्यनियमः, तद् यथा 'अभक्ष्यो ग्राम्यकुक्कुटः, अभक्ष्यो ग्राम्यसूकरः'* इत्युक्ते गम्यत एतद् आरण्यो भक्ष्य इति। एवमिहापि। यदि तावच्छब्दोपदेशः क्रियते गौरित्येतस्मिन्नुपदिष्टे गम्यत एतद्—गाव्यादयोऽपशब्दा इति।

* ननु च भो य एव ग्रामस्तन्नगरम्। कथं ज्ञायते? लोकतः। तद् यथाभक्ष्यो ग्राम्यकुक्कुटः, अभक्ष्यो ग्राम्यसूकर इत्युक्ते सुतरां नागरोऽपि न भक्ष्यते। महाभाष्यम् ७।३।१४

३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथाप्यपशब्दोपदेशः क्रियते गाव्यादिषूपदिष्टेषु गम्यत एतद् गौरित्यप शब्द इति ।

किं पुनरत्र ज्यायः ?

लघुत्वाच्छब्दोपदेशः । लघीयाञ्छब्दोपदेशो गरीयानपशब्दोपदेशः । एकैकस्य शब्दस्य बहवोऽपभ्रंशाः । तद् यथा गौरित्यस्य शब्दस्य गावीगोणीगोतागोपोतलिकेत्येवमादयोऽपभ्रंशाः । इष्टान्वाख्यानं खल्वपि भवति ।

Words have now to be taught. How is that to be done ? Are the correct words to be taught or the incorrect ones or both ?

Our purpose will be served by the teaching of either. Thus by the restriction of food fit to be eaten is implied the prohibition of food not fit to be eaten. When we say "five five-nailed animals are fit to be eaten", it is implied that five-nailed animals other than these are not fit to be eaten. Or by the prohibition of food not fit to be eaten is implied the restriction of food fit to be eaten. Thus, when we say, the domestic fowl should not be eaten, the domestic pig should not be eaten, it is implied that the wild variety of these two animals is fit for food. The same is the case here also. If the correct words are taught, when the word "gauḥ" is taught it is implied that "gāvī" etc. are corruptions. If again, the corrupt words are taught, when "gāvī" etc. have been taught, it is implied that "gauḥ" is the correct form.

Now, which of these two alternatives is preferable ? Instruction on correct words is to be preferred on the ground of succinctness. Instruction on correct words is more succinct. Instruction on incorrect words is more prolix, for each correct word has many corrupt forms. Thus "gāvī,"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"goṇī," "gotā," "gopotalikā" etc. are corruptions of the correct word "gauḥ." Moreover, [by the instruction on correct words] there will also be the direct exposition of the (words) required.

पञ्च पञ्चनखा भक्ष्याः—This is the stock example of what मीमांसक's term परिसंख्या. Injunctions have been divided into three classes, viz., विधि, नियम and परिसंख्या. The distinction between these is set forth in the following Karikā :

विधिरत्यन्तमप्राप्तौ नियमः पक्षिके सति ।
तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते ॥

That which enjoins something not at all known from other sources is a विधि (i.e. अपूर्व-विधि) e.g., व्रीहीन् प्रोक्षति. But for this injunction the sprinkling of water over the wheat could not have been known at all. This injunction tells us for the first time that in the Dars'a-Pūrṇamāsa sacrifices wheat has to be sprinkled with water.

That which restricts us to one of two or more possible alternatives competing for the mastery is known as नियमविधि e. g., व्रीहीनवहन्ति. What is wanted, here, is clearly the separation of the chaff from the grains of wheat. Now this can be done in three ways–first, by अवघात *i.e.* pounding with the pestle in the mortar, secondly by मर्द्दन or rubbing together with force, and thirdly by नखविदलन or peeling off with nails. In this case any one of these three alternatives is possible but not more than one. The injunction व्रीहीन् अवहन्ति restricts us to अवघात i.e. pounding by means of pestle and mortar. Hence it is a नियम.

A Parisaṁkhyā is an injunction which restricts us to one of two or more possible things which may take place simultaneously and which are known independently of the present injunction ; e.g. पञ्च पञ्चनखा भक्ष्याः. Man naturally wants

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

to eat the five animals शशक, शल्लक etc. with five nails as well as other animals with five nails and it is possible to eat both kinds of animals at one sitting. The injunction पञ्च पञ्चनखा भक्ष्याः restricts us to only five particular species of animals with five nails thereby forbidding the eating of other animals with five nails. We must note in this connexion that this injunction does not *enjoin* the eating of the five animals with five nails—one may eat them or not just as one pleases, but *forbids* the eating of all other animals with five nails.

We should note here that since in both नियम and परिसंख्या there is the common element of restriction to one out of many possible alternatives, the terms are often used interchangeably. Thus in grammar a परिसंख्या includes cases which strictly speaking come under नियम. As Paṇḍitarāja Jagannātha points out : नियमोऽप्यस्मिन् दर्शने [i. e. अलङ्कारशास्त्रे] निरुक्त-लक्षणाक्रान्तत्वात् ["सामान्यतः प्राप्तस्यार्थस्य कस्माच्चिद्विशेषाद्व्यावृत्तिः परिसंख्या"] परिसंख्यैव, पाक्षिकप्राप्तियुगपत्प्राप्तिरूपस्यावान्तरविशेषस्याविवक्षणात् । अत एव वैयाकरणानां मते परिसंख्यापि नियमशब्देनोच्यते । तथाहि—"कृत्तद्धितसमासाश्च" [१।२।४६] इत्यत्र समासग्रहणं नियमार्थमिति हि तेषां सिद्धान्तः । तत्र हि समासे पाक्षिक्याः प्रातिपदिकसंज्ञायाः प्राप्तेरभावात् कथं नाम पराभिमतनियम उपपद्यते । युगपद्धि समास-समासेतरपदसङ्घातयोः "अर्थवत्—" [१।२।४५] सूत्रं प्राप्तमिति परिसंख्या भवितुमर्हति । पूर्वतन्त्रे तु नियमपरिसंख्ययोर्भेदन परिभाषणम् । यदाहुः [तन्त्रवार्त्तिके]—

विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्ते परिसंख्येति गीयते ॥

विधिः—स्वर्गकामो यजेत इत्यादिः । यागादेः प्रकारान्तरेणाप्राप्तेः । नियमः—व्रीहीनवहन्ति, समे देशे यजेत इत्यादिः । पुरोडाशनिर्माणफलोपधायकतावच्छेदककोटिप्रविष्टाया वितुषतायाः सम्पादकत्वेनावहननस्य प्राप्तेर्नखविदलनसमवधानकालावृत्तित्वेन, यागाधिकरणतया समदेशप्राप्ते विषमदेशसमवधानकालावृत्तित्वेन च पाक्षिकत्वात् । परिसंख्या—इमामगृभ्णन् रशनामृतस्य इत्यश्वाभिधानी-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मावत्ते [तै० सं० ५।१।२।१] पञ्च पञ्चनखा भक्ष्याः [महाभारत, शान्तिपर्व १४१।७०] इत्यादि। रशनाग्रहणलिङ्गेनाश्वाभिधानीगर्दभाभिधान्योरादानस्य युगपत् प्राप्तत्वात्।

पञ्च पञ्चनखा भक्ष्याः—The quotation is from Mahābhārata, S'āntiparvan, 141, 70. The stanza runs thus :

पञ्च पञ्चनखा भक्ष्या ब्रह्मक्षत्रस्य वै विशः।
यथा शास्त्रं प्रमाणं ते माभक्ष्ये मानसं कृथाः॥

With this we may compare Manu V. 17-18:

न भक्षयेदेकचरानज्ञातांश्च मृगद्विजान्।
भक्ष्येष्वपि समुद्दिष्टान् सर्वान् पञ्चनखांस्तथा॥
श्वाविधं शल्यकं गोधां खड्गकूर्मशशांस्तथा।
भक्ष्यान् पञ्चनखेष्वाहुरनुष्ट्रांश्चैकतोदतः॥

[ननु च श्वावित्प्रभृतीनां पञ्चनखानां भक्ष्यत्ववचनादन्येषामभक्ष्यतासिद्धः सर्वान् पञ्चनखानिति प्रतिषेधवचनमनर्थकम्। नैष दोषः। सर्वशब्देन प्रतिषेधे स्पष्टा प्रतिपत्तिर्भवति। भक्ष्यविशेषनिर्देशेन तदन्येषां याभक्ष्यताप्रतिपत्तिः सानुमानिकी प्रतिपत्तिः। गौरवं हि तथा स्यात्। मेधातिथिः।]

Baudhāyana says : भक्ष्याः श्वाविद्-गोधा शश-शल्यक-कच्छप-खड्गाः खड्गवर्जाः पञ्चनखाः। i. 5. 131.

Gautama says: पञ्चनखाश्चाशल्यक-शश-श्वाविद्-गोधा-खड्ग-कच्छपाः। काक-कङ्क-गृध्र-श्येना जलजा रक्तपादतुण्डा ग्राम्य-कुक्कुट-शूकराः २८।२७, २९

The five five-nailed animals are : शशक (hare), शल्लक (porcupine), गोधा (Iguana), खड्ग (rhinoceros) and कर्म (tortoise).

A poet has composed the following Samasyā-pūraṇa stanza:

दूति किं तेन पापेन शास्त्रातिक्रमकारिणा।
पञ्च पञ्चनखा भक्ष्याः षष्ठी त्वं येन भक्षिता॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

This is explained by

बहुनात्र किमुक्तेन दूति मत्कार्यसिद्धये ।
स्वमांसान्यपि दत्तानि वस्तुष्वन्येषु का कथा ॥

सुभाषितावलिः १४३५

Manu also mentions 'domestic fowl' (ग्राम्यकुक्कुट) in the list of animals not fit to be eaten : कलविङ्कं प्लवं हंसं चक्राङ्गं ग्राम्यकुक्कुटम् V. 12. Medhātithi says : ग्राम्यग्रहणादारण्याभ्यनुज्ञानम् । कुतः पुनरारण्यकस्याभक्ष्यताशङ्का ? स्मृत्यन्तरे हि "कुक्कुटो विकिराणाम्" [गौ० ध० सू०] इति पठ्यते, अतश्चाविशेषेणाभक्ष्यता प्राप्ता, वचनेन तस्य सामान्यप्रतिषेधस्य विशिष्टविषयता प्रज्ञायते । ननु विकल्पः कस्मान्न भवति, अनेन शास्त्रेणास्याभ्यनुज्ञानात्, शास्त्रान्तरेण चाविशेषेण तस्यापि प्रतिषेधात् । नायं विकल्पस्य विषयः । विरोधे हि तुल्यबलानां विकल्पः, न चात्र विरोधोऽस्ति । न ह्यनयोः स्मृत्योः शास्त्रभेदोऽपि, सामान्यस्य विशेष उपसंहर्तुं न्याय्यत्वात्, शाखान्तरतस्तृतीयस्याप्येकशास्त्रस्य दर्शितत्वात् ।

[*Grammar—its method—impossibility of studying each separate word and form*]

अथैतस्मिञ् शब्दोपदेशे सति किं शब्दानां प्रतिपत्तौ प्रतिपदपाठः कर्तव्यः—गौरश्वः पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इत्येवमादयः शब्दाः पठितव्याः ?

नेत्याह । अनभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः । एवं हि श्रूयते—"बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं* प्रोवाच नान्तं जगाम ।" बृहस्पतिश्च प्रवक्ता इन्द्रश्चाध्येता दिव्यं वर्षसहस्रमध्ययनकालो न चान्तं जगाम, किं पुनरद्यत्वे यः सर्वथा चिरं जीवति स वर्षशतं जीवति । चतुर्भिश्च प्रकारैर्विद्यो-

---

* "रूढियोंगमपहरति" इति न्यायेन रूढ्या यौगिकार्थस्य निगरणान्नात्र पौनरुक्त्यम् । Cf. सिद्धशब्दस्य कः पदार्थः [पस्पशा], गन्धवहः सुगन्धः [भट्टि २।१०], गणानां त्वा गणपतिं हवामहे [ऋ० सं० २।२३।२]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पयुक्ता भवति—आगमकालेन, स्वाध्यायकालेन, प्रवचनकालेन, व्यवहारकालेनेति। तत्र चास्यागमकालेनैवायुः कृत्स्नं पयु पयक्तं स्यात्। तस्मादनभ्युपायः शब्दानां प्रतिपत्तौ प्रतिपदपाठः।

Now (it being settled that the correct words are to be taught) in this exposition of correct words, are all the individual words to be stated for a knowledge of the correct words, are correct words like "gauḥ", "as'vaḥ", "puruṣaḥ", "hastī", "s'akuniḥ," "mṛgaḥ", "Brāhmaṇah" etc. to be read ?

No, says the author, this reading of each single word is not the means to the acquisition of correct words. The tradition goes thus: Bṛhaspati spoke to Indra for a thousand divine years the complete collection of individual words, yet he could not come to the end (of the collection). With a teacher of the erudition of Bṛhaspati and a scholar of the calibre of Indra and the period of study extending over a thousand divine years, the end could not be reached, not to speak of the present day when he who lives the utmost length of life lives for a hundred years. Learning is harnessed to the needs of life in four different ways: at the time of its acquisition (from the preceptor), at the time of svādhyāya, at the time of teaching and at the time of employing it in sacrifices. And in the case of the reading of individual words, the whole span of life will be spent at

---

* अधीतिबोधाचरणप्रचारणैर्दशाश्चतस्रः प्रणयन्नुपाधिभिः।
चतुर्दशत्वं कृतवान् कुतः स्वयं न वेद्मि विद्यासु चतुर्दशस्वयम्॥

Why should I not know how Nala himself imparted *caturdas'atva* (the state of having four stages) to the *catur-das'a* (fourteen) branches of knowledge by creating four stages (*catur-das'a*) by means of the four attributes—study, understanding, practice and teaching ? *Naiṣadha* i.4.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

the time of acquisition. Hence the reading of individual words is not a means to the acquisition of words.

शब्दानां शब्दपारायणम्—Such expressions are fairly common in early literature. Bhartṛhari says : रूढ़िशब्दोऽयं कस्यचिद् ग्रन्थस्य वाचकः। यथा शिरोरोगः कुक्षिं बाधते इति। शिरोरोगशब्दः कुक्षिरोगशब्दः स्वव्याधिविशेषस्य रूढ़िः। स शिरः कृत्स्नं कृत्स्नं च कुक्षिं बाधते इति। एवं शब्दपारायणं नाम ग्रन्थः। Kaiyaṭa says : शब्दानामिति। शब्दपारायणशब्दो योगरूढ़ः शास्त्रविशेषे। तत्र प्रतिपदोक्तानामिति विशेषणाभिधानाय गम्यमानार्थस्यापि शब्दानामित्यस्य प्रयोगः। Annambhaṭṭa explains : ननु शब्दपारायणशब्दो यौगिको रूढ़ो वा? आद्ये शब्दानामिति व्यर्थम्, समासेनैव प्राप्तत्वात्; द्वितीये शब्दपारायणमिति व्यर्थम्, 'प्रतिपदोक्तान् प्रोवाच' इत्येव वक्तव्यत्वात्, अत आह—शब्देति। केवलयौगिकत्वे शब्दप्रतिपादकग्रन्थमात्रस्य तच्छब्दवाच्यत्वं स्यात्, अतो रूढिरप्यङ्गीकृता। तत्र शब्दपारायणं प्रोवाच इत्येव विवक्षितम्। तत्र प्रतिपदोक्तत्वाप्रतीतेस्तदर्थं प्रतिपदोक्तानाम् इति विशेषणम्। तावतैव समासावयवशब्दविशेषणत्वप्रतीतौ स्पष्टप्रतिपत्तये शब्दानाम् इत्युपात्तम्, शब्दानां प्रतिपदोपदेशकग्रन्थविशेषमध्यापयामासेति समुदायतात्पर्यम्।

Indra is regarded as the author of the earliest treatise on grammar. We find in the Taittirīya Saṁhitā [vi. 4. 7.3] वाग् वै पराच्यव्याकृतावदत्। ते देवा इन्द्रमब्रुवन्—"इमां नो वाचं व्याकुरु" इति। सोऽब्रवीत्—"वरं वृणै। मह्यं चैवैष वायवे च सह गृह्यातै" इति। तस्मादैन्द्रवायवः सह गृह्यते। तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्। तस्मादियं व्याकृता वागुद्यते। Sāyaṇa explains : "अग्निमीळे पुरोहितम्" [ऋ० सं० १।१।१] इत्यादि वाक् [वै] पूर्वस्मिन् काले पराची समुद्रादिध्वनिचदेकात्मिका सती अव्याकृता प्रकृतिः प्रत्ययः पदं वाक्यमित्यादिविभागकारिग्रन्थरहितासीत्। तदानीं देवैः प्रार्थित इन्द्र एकस्मिन्नेव पात्रे वायोः स्वस्य च सोमरसग्रहणरूपेण वरेण तुष्टस्तामखण्डां वाचं मध्ये विच्छिद्य प्रकृतिप्रत्ययादिविभागं सर्वत्राकरोत्। तस्मादियं वागिदानीमपि पाणिन्यादिमहर्षिभिर्व्याकृता सर्वैः पठ्यत इत्यर्थः।

The legend of Indra and Bṛhaspati reminds one of the story of Bharadvāja in TB. iii. 10. 11. 3-5 भरद्वाजो ह त्रिभिरायुर्भिर्ब्रह्मचर्यमुवास। तं ह जीर्णिं स्थविरं शयानमिन्द्र उपव्रज्योवाच—भरद्वाज, यत्ते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चतुर्थमायुर्दद्याम्, किमेनेन कुर्या इति। ब्रह्मचर्यमेवैनेन चरेयमिति होवाच। तं ह त्रीन् गिरिरूपानविज्ञातानिव दर्शयाञ्चकार। तेषां हैकैकस्मान्मुष्टिमाददे। स होवाच भरद्वाजेत्यामन्त्र्य। वेदा वा एते। अनन्ता वै वेदाः। एतद्वा एतैस्त्रिभिरायुर्भिरन्ववोचथाः। अथ त इतरदननूक्तमेव। एहीमं विद्धि। अयं वै सर्वविद्येति। तस्मै हैतमग्निं सावित्रमुवाच। तं स विदित्वामृतो भूत्वा स्वर्गं लोकमियाय। आदित्यस्य सायुज्यम्। Sāyaṇa explains: पुरा कदाचिद्भरद्वाजाख्यो महर्षिः सर्वेषां वेदानामध्ययने कृतप्रयत्न इन्द्रं प्रसाद्य तत्प्रसादाच्छतसंवत्सरपरिमितानि त्रीण्यायूंषि लब्ध्वा तैरायुर्भिर्ब्रह्मचर्यमुवास वेदाध्ययनमुद्दिश्य गुरुकुले वासं कृतवान्। शतत्रयस्यान्ते जीर्णशरीरं वृद्धमशक्तत्वेन शयानं तं भरद्वाजं प्रतीन्द्र उपेत्योवाच। यच्चतुर्थमायुस्तुभ्यं दद्यामेतेनायुषा किं कुर्याः कं पुरुषार्थं साधयसीति? स च वेदाध्ययनमेव करिष्यामीत्युवाच। ततः सर्ववेदाध्ययनकृतयत्नं तं भरद्वाजमुद्दिश्य सर्वाध्ययनस्याशक्यत्वं बोधयितुमृग्यजुःसामवेदानां त्रयाणां स्वकीययोगसामर्थ्येन पर्वताकारत्वं सम्पाद्य गिरित्रयरूपान् पूर्वमविज्ञातानेव वेदानस्मै दर्शयामास। ततस्तेषां पर्वतानां मध्ये एकैकस्मात् पर्वतान्मुष्टिना पांसूनाददे। आदायैवमुवाच—हे भरद्वाज, एते त्रयः पर्वता वेदा एव। तत्रैकैकः पांसुरेको वेदस्तस्मादनन्ता वेदाः, तेषां मध्ये त्वमेतैस्त्रिभिरायुर्भिरेतन्मुष्टित्रयपरिमितं वेदजातं गुरूपदेशमन्वधीतवानसि। अथानन्तरं तवेतरद्वेदजातमनधीतमेव। तस्मात् सर्ववेदाध्ययनमशक्यमेव।

Similarly Haradatta says under Gautama Dharma-sūtra 1.9.62: आनन्त्यादाचाराणां प्रतिपदपाठो न शक्यः।

दिव्यं वर्षसहस्रम्—One human year corresponds to one divine day and night, so a thousand divine years would be equivalent to 365,000 human years. दैवे रात्र्यहनी वर्षम्—Manu 1.67. Commentators hasten to point out that this ākhyāyikā is not to be taken literally but should be regarded as an *arthavāda* showing the extreme difficulty, if not absolute impossibility, of acquiring a highly inflected language by going through each single form as it occurs.

लक्षणेन तु सिद्धानामन्तं नास्ति विपश्चितः। महामतेरतम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपशब्दा हि प्रतिदेशं प्रतिगृहं प्रतिपुरुषं प्रत्यवस्थं भिन्नाश्चानवस्थिताश्च। न ते लक्षणेनानुगन्तुं शक्यन्ते। Haradatta, p. 10

[*Grammar—its method—rules, general and special*]

कथं तर्हीमे शब्दाः प्रतिपत्तव्याः ?

किञ्चित् सामान्यविशेषवल्लक्षणं प्रवर्त्यम्। येनाल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन्।

किं पुनस्तत् ?

उत्सर्गापवादौ। कश्चिदुत्सर्गः कर्तव्यः कश्चिदपवादः।

कथंजातीयकः* पुनरुत्सर्गः कर्तव्यः कथंजातीयकोऽपवादः ?

सामान्येनोत्सर्गः कर्तव्यः। तद् यथा—"कर्मण्यण्" [३।२।१]। तस्य विशेषेणापवादः। तद् यथा—"आतोऽनुपसर्गे" कः [३।२।३]।

How are then the correct words to be acquired ?

Some work containing general rules and exceptions has to be composed so that men may acquire vast collections of words with slight effort.

What, again, is that ?

General rule and its exception. Some general rule has to be framed and some exception.

What kind of general rule is to be framed and what kind of exception ?

Some rule should be framed in a general way, e. g., a root preceded by an object admits the suffix *aṇ* and its exception in a special way, e. g., the primary suffix *ka* is added to a root ending in *ā*, provided the root is preceded by an upasarga.

Mādhava explains this very lucidly in his Pāṇini-dars'ana : तस्माच्छब्दानुशिष्टिः संस्कारपदवेदनीया शब्दानुशासनस्य प्रयोजनम्। नन्वेवमप्य-

---

* प्रकारमात्रे थमुः तद्वति जातीयर् इत्यत्र जातीयरेव निर्वाहेऽपि सामान्योपक्रमाच्छिंशपा वृक्ष इतिवत् प्रयोगः। छाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भिमतं प्रयोजनं न लभ्यते, तदुपायाभावात्। अथ प्रतिपदपाठ एवाभ्युपाय इति मन्येथास्तर्हि स ह्यनभ्युपायः शब्दानां प्रतिपत्तौ प्रतिपदपाठो भवेत्। शब्दापशब्द-भेदेनानन्त्याच्छब्दानाम्। एवं हि समाम्नायते—बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदपाठविहितानां शब्दानां शब्दपारायणं प्रोवाच, नान्तं जगाम। बृहस्पतिश्च प्रवक्ता, इन्द्रोऽध्येता, दिव्यं वर्षसहस्रमध्ययनकालः, न च पारावाप्तिरभूत्, किमुताद्य, यश्चिरं जीवति स वर्षशतं जीवति। अधीतिबोधाचरणप्रचारणैश्चतुर्भिर्हि-पायैर्विद्योपयुक्ता भवति। तत्राध्ययनकालेनैव सर्वमायुरुपयुक्तं स्यात्। तस्मादनभ्यु-पायः शब्दानां प्रतिपत्तौ प्रतिपदपाठ इति प्रयोजनं न सिध्येदिति चेत्, मैवम्। शब्दप्रतिपत्तेः प्रतिपदपाठसाध्यत्वानङ्गीकारात्, प्रकृत्यादिविभागकल्पनावत्सु लक्ष्येषु सामान्यविशेषरूपाणां लक्षणानां पर्जन्यवत् सकृदेव प्रवृत्तौ बहूनां शब्दानामनु-शासनोपलम्भाच्च। तथाहि "कर्मण्यण्" इत्येकेन सामान्यरूपेण लक्षणेन कर्मोप-पदाद्धातुमात्रादण्प्रत्यये कृते कुम्भकारः काण्डलाव इत्यादीनां बहूनां शब्दानामनु-शासनमुपलभ्यते। एवम् "आतोऽनुपसर्गे कः" इत्येकेन विशेषलक्षणेनाकारान्ताद्धातोः कप्रत्यये कृते धान्यदो धनद इत्यादीनां बहूनां शब्दानामनुशासनमुपलभ्यते। बृहस्पतिरिन्द्रायेति प्रतिपदपाठस्याशक्यत्वप्रतिपादनपरोऽर्थवादः।

"In the same way the end of the exposition of words is instruction concerning words *i. e.*, the propriety of speech. "But," an objector may say, "will not the desired end be still unattained for want of the true means to it? Nor can it be said that reading of the words one by one is the true means; for this cannot be a means for the understanding of words, since their number is infinite, so divided into proper and improper words. Thus there is a tradition that Bṛhaspati for a thousand divine years taught to Indra the study of words as used in their individual forms when the Veda is read word by word, and still he came not to the end. Here the teacher was Bṛhaspati, the pupil was Indra, and the time of study a thousand years of the gods; and yet the termination was not reached,—how much less, then, in our day, when a man who lives ever so long lives for a hundred years? Learning is

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

rendered efficient by four appropriate means,—reading, understanding, practising, and handing on to others; but in the proposed way life would only suffice for the bare time of reading; therefore the reading word by word is not a means for the knowledge of words, and consequently, as we said at first, the desired end is not established." We reply, however, that it was never conceded that the knowledge of words was to be attained by this reading word by word. And again since general and special rules apply at once to many examples, when these are divided into the artificial parts, called roots, etc., (just as one cloud rains over many spots of ground); in this way we can easily comprehend an exposition of many words. Thus, for instance, by the general rule iii, 2, 1, *karmaṇi*, the affix *aṇ* is enjoined after a root when the object is in composition with it; and by this rule we learn many words, as *kumbhakārah*, "a potter", *kaṇḍalāvah*, "a cutter of stems", etc. But the supplementary special rule (iii. 2. 3), *āto'nupasarge kah*, directing that the affix *ka* is to be used after a root that ends in long ā when there is no *upasarga*, enables us to get instruction on many words like *dhānyadah* "giver of paddy", *dhanadah* "giver of wealth" etc. "Bṛhaspatirindrāya" etc. is an arthavāda establishing the impossibility of reading word by word."

[*Meaning of words—genus or individual*]

किं पुनराकृतिः पदार्थ आहोस्विद् द्रव्यम् ? उभयमित्याह । कथं ज्ञायते ?

उभयथा ह्याचार्येण सूत्राणि पठितानि । आकृतिं पदार्थं मत्वा "जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्" [१।२।५८] इत्युच्यते;

क्वचिज्जातिः क्वचिद्व्यक्तिः पाणिनिस्तूभयं मतम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्रव्यं पदार्थं मत्वा "सरूपाणाम्—"[१।२।६४] इत्यकशेष आरभ्यते ।

Does a word denote a genus or an individual ?

Both says the grammarian.

How is this known ? Because the author has framed his rules in both ways. He says "jātyākhyāyām ekasmin bahuvacanam anyatarasyām," regarding the meaning of a word as genus; taking the meaning as individual the ekas'eṣa rule "sarūpāṇām ekas'eṣa ekavibhaktau" is commenced.

When Pāṇini lays down that to denote a class the plural may be optionally used for the singular, he is naturally thinking of the meaning of a word as genus; for if the word denotes individuals, then it will be naturally used in the plural and no useful purpose is served by prescribing the plural in the place of the singular. On the other hand, when the great grammarian says that of words having the same form, only one remains when a single case-ending follows, he is evidently espousing the Vyakti-theory, for if the word denotes the genus, naturally one would suffice to express the whole sense and there is no reason why Pāṇini should go out of his way to make provision for what is known to everybody. व्यक्तौ पदार्थे सम्पन्ना व्रीहय इति व्यक्तिबहुत्वाद्बहुवचनं सिद्धमेवेति व्यर्थं तत् स्यादिति भावः । आकृतेरेकत्वादेवैकशब्दप्रयोगोपपत्तौ तदुक्तिसम्भवो व्यक्तिपक्ष एवेति भावः । नागेशः ।

Mādhava summarises the views of Vyāḍi and Vājapyāyana in his Sarvadars'anasaṁgraha thus :

जातिशब्दार्थवादिनो वाजप्यायनस्य मते गवादयः शब्दा भिन्नद्रव्यसमवेतजातिमभिदधति । तस्यामवगाह्यमानायां तत्सम्बन्धाद् द्रव्यमवगम्यते । शुक्लादयः शब्दा गुणसमवेतां जातिमाचक्षते । गुणे तत्सम्बन्धात् प्रत्ययः । द्रव्ये सम्बन्धिसम्बन्धात् । संज्ञाशब्दानाम् उत्पत्तिप्रभृत्या विनाशाच्छैशवकौमारयौवनाद्यवस्थाभेदेऽपि स एवायमित्यभिन्नप्रत्ययबलात् सिद्धा देवदत्तत्वादिजातिरभ्युपगन्तव्या ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रियास्वपि जातिरालक्ष्यते। सैव धातुवाच्या, पचतीत्यादावनुवृत्तप्रत्ययस्य प्रादुर्भावात्। द्रव्यपदार्थवादिव्याड़िनये शब्दस्य व्यक्तिरेवाभिधेयतया प्रतिभासते, जातिस्तूपलक्षणतयेति नानन्त्यादिदोषावकाशः। पाणिन्याचार्यस्योभयं मतम्। यतो जातिपदार्थमभ्युपगम्य "जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्" [१।२।५८] इत्यादिव्यवहारः। द्रव्यपदार्थमङ्गीकृत्य "सरूपाणामेकशेष एकविभक्तौ" [१।२।६४] इत्यादिः। व्याकरणस्य सर्वपार्षदत्वान्मतद्वयाभ्युपगमे न कश्चिद्विरोधः।

"According to the opinion of Vājapyāyana, who maintains that all words mean a genus, words like "cow," etc., denote a genus which resides by intimate relation in different substances; and when this genus is apprehended, through its connection with it we apprehend the particular substance in which it resides. Words like "white" etc. denote a genus which similarly resides in qualities; through the connection with the genus we apprehend the quality, and through the connection with the quality we apprehend the individual substance. So in the case of words expressing particular names, in consequence of the recognition that "this is the same person from his first coming into existence to his final destruction, in spite of the differences produced by the various states of childhood, youth, adolescence, etc.," we must accept a fixed genus as Devadatta-hood, etc. [as directly denoted by them].

So, too, in words expressing "action" a genus is denoted; this is the root-meaning, as in *paṭhati*, "he reads", etc., since we find here a meaning common to all who read.

In the doctrine of Vyāḍi, who maintained that words meant individual things [and not classes or genera], the individual thing is put forward as that which is primarily denoted, while the genus is implied [as a characteristic mark]; and he thus avoids the alleged faults of "indefiniteness" and "wandering away from its proper subject.""

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Both views are allowed by the great teacher Pāṇini : since in 1. 2. 58 he accepts the theory that a word means the genus, where he says that "when the singular is used to express the class, the plural may be optionally used" [as in the sentence, "A Brahman is to be honoured" which may equally run, "Brahmans are to be honoured]; while in 1. 2. 64 he accepts the theory that a word means the individual thing, where he says, "In any individual case there is but one retained of things similar in form" [*i. e.*, the dual means Rāma and Rāma, and the plural means Rāma and Rāma and Rāma ; but we retain only one, adding a dual or plural affix]. Grammar, in fact, being adapted to all assemblies, can accept both theories without being compromised. Therefore both theories are in a sense true ; but the real fact is that all words ultimately mean the Supreme Brahman". COWELL.

व्रीहीन् अवहन्ति, पशुमालभेत, गाम् आनय, ब्राह्मणो न हन्तव्यः इत्यादि-प्रयोगेषु किं व्यक्तिः शब्दार्थ उताकृतिरिति ? व्यक्तिरिति तावत् प्राप्तम् । कुतः ? अवहननादिभिः क्रियाभिर्व्यक्तेरन्वेतुं योग्यत्वात् । न ह्याकृतिरवहन्तुम् आलब्धुम् आनेतुं हन्तुं वा योग्या । ननु आनन्त्यव्यभिचाराभ्यां न व्यक्तौ व्युत्पत्तिः सम्भवति । अनन्ता हि गोव्यक्तयः । अतीतानागतानाम् अनेकदेशवर्तिनां गवाम् इयत्ताया अभावात् । किञ्च शुक्लव्यक्तौ व्युत्पन्नो गोशब्दः कृष्णव्यक्तौ प्रयुज्यमानः स्वार्थं व्यभिचरेत् । तत्र कथं व्युत्पत्तिरिति चेत् । एवं व्युत्पत्तिकाले सा व्यक्तिराकृत्योपलक्ष्यतामिति प्राप्ते ब्रूमः, अन्वयव्यतिरेकाभ्याम् आकृतेः शक्तिग्रहणनिमित्तत्वाच्छब्दार्थत्वं तस्या एवोचितम् । किञ्च गोशब्दे उच्चारिते व्यक्तिवादिनः संशयो भवेत् । तस्मादाकृतेरेवाभिधेयत्वम् । यद्याकृताववहननादिक्रिया न पर्यवस्येत् तर्हि व्यक्तिस्तत्रोपलक्षणीया । किञ्च "श्येनचितं चिन्वीत" इत्यादावाकृतेरेव सादृश्यप्रतियोगिकतया कार्यारम्भो दृश्यते । तस्मात् आकृतिः शब्दार्थः । जैमिनीयन्यायमालाविस्तरः ।

[*Eternality of sounds*]

किं पुनर्नित्यः शब्द आहोस्वित् कार्य्यः ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संग्रह एतत् प्राधान्येन परीक्षितम्—नित्यो वा स्यात् कार्य्यो वेति। तत्रोक्ता दोषाः प्रयोजनान्यप्युक्तानि। तत्र त्वेष निर्णयः—यद्येव नित्यः अथापि कार्य्यः, उभयथापि लक्षणं प्रवर्त्त्यम् इति।

Then again, is sound eternal or artificial? The question as to whether sound is eternal or artificial has been threshed out in the *Saṃgraha*. There the defects of the latter view have been pointed out and the reason for the acceptance of the view have been stated. The conclusion there arrived at is that even though sound is eternal, it is artificial and rules of grammar are to be framed or applied both ways.

कथं पुनरिदं भगवतः पाणिनेराचार्यस्य लक्षणं प्रवृत्तम्?

[सिद्धे शब्दार्थसम्बन्धे लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः, यथा लौकिकवैदिकेषु* ।]

सिद्धे शब्दार्थसम्बन्ध*—

सिद्ध शब्देऽर्थे सम्बन्ध चेति।

अथ सिद्धशब्दस्य कः पदार्थः ?

नित्यपर्यायवाची सिद्धशब्दः।

कथं ज्ञायते ?

यत् कूटस्थेष्वविचालिषु भावेषु वर्तते ; तद् यथा सिद्धा द्यौः, सिद्धा पृथिवी, सिद्धमाकाशमिति।

ननु च भोः कार्येष्वपि वर्तते ; तद् यथा सिद्ध ओदनः, सिद्धः सूपः, सिद्धा यवागूरिति। यावता कार्येष्वपि वर्तते, तत्र कुत एतन्नित्यपर्यायवाचिनो ग्रहणम्, न पुनः कार्ये यः सिद्धशब्द इति।

संग्रहे तावत् कार्यप्रतिद्वन्द्विभावान्मन्यामहे नित्यपर्यायवाचिनो ग्रहणमिति। इहापि तदेव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Dr. Suniti Kumar Chatterji, M.A., D.LITT. (London) Professor, Calcutta University, writes :

· The *Manjusha* is run by Dr. Kshitish Chandra Chatterjee of the University of Calcutta, who is one of our most erudite authorities on the technical and other niceties of Sanskrit grammar. He is a student of languages and, in addition, he handles Sanskrit with ease. It has been his love of Sanskrit that has made him carry on the work of editing and bringing out this paper since its inception by himself. Financially it has been a thankless task. It has brought other disadvantages also—the editing and financing of a journal without much wide appeal because of its language has been a source of worry which has had its repercussions on his health. But he has not given in, because he is an incorrigible optimist when he is convinced his cause is noble. Prof. Chatterjee is quite an institution in himself. Then, he has been able to enlist a number of disinterested colleagues who help him with contributions and who are enthusiasts for Sanskrit like himself. And he himself writes. It is a remarkable thing that although he finds joy in unravelling the intricacies of Sanskrit grammar, he is not in his mental make-up a dry-as dust grammarian. He has a wonderful sense of humour supported by an inexhaustible fund of anecdotes and stories which he brings out in racy Sanskrit. So the pages of the *Manjusha* at times sparkle with laughter. Comparative linguistic he brings in frequently in his articles, and this is a remarkable "special feature" of this little paper. Further, it does not confine itself to Sanskrit alone. Proverbs, *Bon-mots*, wise sayings, *Mahavakyas*, etc. from different languages, English, French, German, Latin, etc., are rendered appropriately into Sanskrit, demonstrating the capacity of the language of the Gods to keep pace with turns of expression peculiar to various languages. One can say also that there is an "English Section" to this magazine, devoted as it is entirely to the culture of Sanskrit. Thus, the editor himself is bringing out through this magazine, in instalments, his English translation and commentary on the *Mahabhashya* of Patañjali which, when completed, will be a valuable contribution to the study of Sanskrit grammar through English.

A journal like this deserves a much wider appreciation which is its due. I think our high school students reading Sanskrit will find much of interest, pleasure and profit in it.

Printed and published by Sri Jyotish Chandra Chatterjee, B. A. from 81, Shyambazar Street, Calcutta—4. Printed at the Elm Press 63, Beadon Street, Calcutta—6

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

MANJUSHA (Sanskrit Monthly Magazine)

Registered No. C. 3278

काव्यालङ्कारसूत्रवृत्तिः (वामनविरचिता ५।१)

अभिनवविशदविस्तृतटीकोपेता Rs. 2

Convocation Address in Ancient India -8-

स्त्रीप्रशंसा—The original slokas of Varāhamihira with a splendid Sanskrit commentary Re. 1/-

Popular Etymology Re. 1/-

শব্দকথা—সরস সরল ভাষাতত্ত্ব— ২৲

ঊষার আলো—হাসির গল্পের সমষ্টি— ৸০

নক্ষত্রমালা—ধর্ম বিষয়ক শ্লোক ও অনুবাদ— ।৵০

Several complete sets of Vol. IV of the Manjusha are still available for Rs. 6/- and only a few sets of Vols. I-III are available at Rs. 5/12/- for the lot.

TECHNICAL TERMS AND TECHNIQUE OF

SANSKRIT GRAMMAR

A Critical, Comparative and Historical Study

BY

KSHITISH CHANDRA CHATTERJI, SASTRI, M. A., D. LITT.

Lecturer, Calcutta University ;
Formerly Editor, Calcutta Oriental Journal,
Surabharati, Oriental Literary Digest, etc., etc.

"We have nothing but admiration for this masterpiece of scholarship." *Modern Review.*

Price Rupees Ten only. *Foreign Rs. 12/-*
Postage Extra.

VISVANATH CHATTERJI

81, Shyambazar Street,

CALCUTTA—4

Phone : B. B. 4049

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Approved by the Directors of Public Instruction, Madras, Bihar and Mysore.

श्रीशिवः शरणम्

षष्ठ-वर्षे] **Special Dewali Number** [चतुर्थी संख्या

मञ्जूषा

सम्पादकः—श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

Special Articles in this number.

S'aṅkarācārya's unpublished writings.

Mahābhāṣya with English Translation, notes, extracts from various commentaries including the hitherto-unpublished Bhāṣya-pradīpikā of Bhartṛhari (pp. 49-64).

Kālidāsa and Bhavabhūti—a critical and comparative study.

A second Bhrāja Stanza.

Critical observations on the text of the Mahābhāṣya.

An interesting Sanskrit drama.

इवेन सह समासः—a critical study.

Vol. V of the Mañjūṣa contains 300+32+32 pages including "The S'iva sūtras and the Sanskrit alphabet" "Mahābhāṣya" "Critical studies on the text of S'āyaṇa's commentary on the Rigveda" etc. etc. Rs. 6/8/-

Office : 81, Shyambazar Street, Calcutta—4

Annual Subscription : Rupees Six only.

Foreign—Rupees Nine.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

The Madhuravāṇī (Bagalcott) writes: स्वागतं मञ्जूषायै। कलकत्तानगरतः शब्दाब्धिलब्धवैदग्ध्यस्य कवितावनितास्वयंवरवृतवरस्य पण्डित-प्रवरस्य श्रीक्षितीशचन्द्रचट्टोपाध्यायस्य सम्पादकत्वे प्रतिमासं नियतमाविष्क्रि-माणा मञ्जूषानामिका पत्रिका शिञ्जानमञ्जरीमञ्जुलपदैः गीतगुञ्जारवैश्च रञ्जयति रसिकपुञ्जम्। क्वचित महाभाष्य-शब्देन्दुशेखरादिगत-सूक्ष्मतर-विषयसमीक्षणसंरम्भेण महामहापण्डितपण्डरीकाणामपि शिरःकण्डूतिम् उप-जनयति। कदाचित् कुशलग्रामवृद्धेव सरसकथाकथनेन कौतुकमुत्पादयति। कुत्रचिच्च प्राचीन-सरस-सुन्दर-सुभाषितानाम् आंग्लानुवादान् प्रकटीकृत्य उपकरोति छात्रवृन्दम्। क्वचिदपि च वेदवेदान्तमन्त्रतन्त्रादीनां भावार्थादि जिज्ञासते। मध्ये मध्ये तनुतरविनोदिकथाभिः हास्यलहरीरपि उद्भावयति। तत्र तत्र च शब्दशक्तिप्रकाशेन शब्दशुद्धिविचारैः पुरातनसाहित्यप्रकटीकरणेन च भिन्नभिन्नरुचिमपि वाचककुलं सम्यगाराधयति। प्रायः सर्वत्र सरलतमा सुबोधा च अत्रत्या भाषा विदुषामिव विद्यार्थिनामपि सविशेषं परितोषं जनयति। 'पण्डिता च पतिव्रता' इति ख्याताया: क्षमादेवीरावमहोदयायाः 'परित्यक्ता' इति विचित्रा चैत्राङ्कगता चारुतमकथा चमत्कुरुते सचेतसां चेतांसि हृदयङ्गमया निरूपणभङ्ग्या। तस्मिन्नेव मञ्जूषायाः चैत्राङ्के 'शिवसूत्रस् एण्ड संस्कृत आल्फाबेट्' इति विचारप्रचुरः सम्पादकानाम् आंग्लभाषायां लिखित विवेचनात्मकः लेखः सर्वषामपि विपश्चिदपश्चिमानां प्रशंसापात्रं भवतीति निश्चप्रचम्। वयं तु सादरं संसूचयामः "यावच्छक्यं संस्कृतभाषायामेव लेखा लेखनीयाः" येन शुद्धसंस्कृतविदुषामपि उपयोगो भवेत्।

शिञ्जन्मञ्जीरमञ्जूक्तिगुञ्जितैः रसिकरञ्जिनी।
क्षितीशकृतिमञ्जषा केषामेषा न तोषदा॥
सुवर्णकांक्षिभिः सवरर्थैलुब्धैर्मनीषिभिः।
अलङ्कारप्रियैरेषा मञ्जषा गृह्यतां रसात्॥
उत्कृष्टलेखरत्नानां मञ्जूषैषा विशोभते।
सर्वथा समुपादेया सर्वैः सहृदयैरपि॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम् ॥

मञ्जूषा

December, 1951. — १८७३-शकीय-पौषस्य षष्ठ-वर्षस्य चतुर्थी संख्या — Vol. VI. No. 4.

श्रीमच्छङ्कराचार्यविरचितं

श्रीरामलक्ष्मणाष्टकम्

श्रीगणेशाय नमः ॥ श्रीरामचन्द्राय नमः ॥

कमललोचनौ काञ्चनाम्बरौ कवचभूषणौ कार्मुकान्वितौ ।
कलुषसंहरौ कामितप्रदौ रहसि नौमि तौ रामलक्ष्मणौ ॥१॥
मकरकुण्डलौ मुनिसुसेवितौ मणिकिरीटिनौ मानुषोत्तमौ ।
मनुकुलेश्वरौ मञ्जुभाषिणौ रहसि नौमि तौ रामलक्ष्मणौ ॥२॥
रणकुतूहलौ राक्षसान्तकौ रतिविहारिणौ रत्नभूषणौ ।
रविकुलोद्भवौ राजपुङ्गवौ रहसि नौमि तौ रामलक्ष्मणौ ॥३॥
पवनजानुगौ पादचारिणौ पटुशिलीमुखौ पावनांघ्रिकौ ।
परमसात्त्विकौ भक्तवत्सलौ रहसि नौमि तौ रामलक्ष्मणौ ॥४॥
वनविहारिणौ वल्कलाम्बरौ वनफलाशनौ वासवस्तुतौ ।
वरगुणाकरौ वानरार्चितौ रहसि नौमि तौ रामलक्ष्मणौ ॥५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धृतहेमाचलौ दीर्घदोर्युगौ धृतशिखण्डिनौ दीनरक्षणौ ।
द्विजप्रपूजितौ दिव्यविग्रहौ रहसि नौमि तौ रामलक्ष्मणौ ॥६॥
समरवीरकौ सत्यसागरौ वनजरक्षितौ साहसान्वितौ ।
सदयमानसौ सर्ववन्दितौ रहसि नौमि तौ रामलक्ष्मणौ ॥७॥
घनतड़िन्निभौ खड्गधारिणौ घनजटाधरौ पण्डितौ बुधौ ।
बहुरविप्रभौ खानलप्रभौ रहसि नौमि तौ रामलक्ष्मणौ ॥८॥
रसगुणास्पदं राघवाष्टकं रहसि यः पठेद्रामभक्तिदम् ।
रहितकल्मषो रामसन्निधौ रविसमप्रभो राजते सदा ॥९॥

इति श्रीमच्छङ्कराचार्यविरचितं श्रीरामलक्ष्मणाष्टकं स्तोत्रं संपूर्णम् ॥ (रामचन्द्रेण लिखितम्)

राजापुरनगरसंनिकृष्टहर्डोग्रामवासिवेदमूर्ति-घांटोपाह्वसीतारामतनुजश्रीनारायणभट्टैः १८५३ शके मासोकमे मार्गे राजापुरस्थश्रीसंस्कृतपुस्तकसंग्रहालयाय परमप्रेम्णा समुपहारीकृतम् ।

तत्प्रतिकृतिरियं राजापुरनिवासिना पाटणकरोपाह्व-श्रीमत्कृष्णतनयेन रघुनाथशर्मणा विनिर्मिता १८७३ शके शुचिकृष्णाद्वादश्यां कलानिधिवासरे ॥

गीतासारः

मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः ।
निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव ॥११।५५

"This verse is the substance of the whole teaching of the *Gita.* We must carry out our duties, directing the spirit to God and with detachment from all interest in the things of the world and free from enmity towards any living being.

Whatever be our vocation and character, whether we are creative thinkers or contemplative poets or humble men and

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

women with no special gifts, if we possess the one gift of the love of God, we become God's tools, the channels of his love and purpose. When this vast world of living spirits becomes attuned to God and exists only to do His will, the purpose of man is achieved." RADHAKRISHNAN.

आभाणकादि

१। प्रस्तरोऽपि घृष्यमाणः क्षीयते।

निरन्तरनिपतितबिन्दवः सुकठिनमपि शिलाशकलं क्षयमापादयन्ति।

Constant dropping wears the stone.

Little drops pierce the flint upon which they often fall.

(ला) Gutta cavat lapidem non vi sed saepe cadendo.

The drop of rain maketh a hole in the stone, not by violence, but by oft falling.

२। रम्याणां विकृतिरपि श्रियं तनोति।

३। विकृतिः खलु श्रेष्ठानां पापिष्ठत्वाय कल्पते।

(ला) Corruptio optimi pessima est.

Corruption of the best becomes the worst.

"The summer's flower is to the summer sweet,
Though to itself it only live and die;
But if that flower with base infection meet,
The basest weed outbraves his dignity;
For sweetest things turn sourest by their deeds:
Lilies that fester smell far worse than weeds."

SHAKESPEARE, SONNET XCIV.

४। अनन्तपारं किल शब्दशास्त्रं
　स्वल्पं तथायुर्बहवश्च विघ्नाः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(ग्री) Ho bios brakhus, he tekhne: makra. HIPPOCRATES.
(ला) Ars longa, vita brevis.
Art is long, life is short.

५ । (ग्रौ) He: ge: melaina pinei,
pinei de dendre' aute:n.
pinei thalassa krounous,
ho d' he:lios thalassan.

इयं मही मलिना पिबति
पिबति च वृक्षराजिस्ताम् ।
पिबति सागरो निर्झरान्
स च सूर्यः सागरम् ॥

[The fountains mingle with the river
And the rivers with the ocean,
The winds of heaven mix for ever
With a sweet emotion. SHELLEY.]

सायणभाष्य-पाठविमर्शः

[श्रीक्षितीशचन्द्रचट्टोपाध्यायः]

'नीचावया अभवद्वृत्रपुत्रा' [ऋ० सं० १।३२।९] इति मन्त्रस्य व्याख्याने दृश्यते—"वृत्रपुत्रा वृत्रः पुत्रो यस्या मातुः सेयं माता वृत्रपुत्रा नीचावयाः **न्यग्भावं प्राप्ता हता** अभवत् । पुत्रं प्रहाराद्रक्षितुं पुत्रदेहस्योपरि तिरश्ची पतितवतीत्यर्थः ।" . . . नीचावयाः वेति खादतीति **वयो** बाहुः । औणादिकः असिप्रत्ययः । न्यञ्चौ वयसौ यस्याः सा नीचावयाः । ... यद्वा नीचौ निकृष्टौ वयसौ यस्याः सा ।" इति ।

अत्रोत्तरत्र वयस्-शब्दस्य बाहुरित्यर्थस्य प्रदर्शनात् पुत्रं प्रहाराद्रक्षितुं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुत्रदेहस्योपरि तिरश्ची पतितवती इति तात्पर्यकथनाच्च नीचावयाः-पदस्य 'न्यग्भवनं प्राप्ता हता' इत्यर्थकल्पनं न समीचीनतया प्रतिभाति। न्यग्भावप्राप्तबाहुरिति वा न्यग्भावप्राप्तहस्तेति वा पाठः शुद्ध इति प्रतीयते। माधवादिग्रन्थेषु च नीचीनबाहुरिति प्रतिशब्दः सन्दृश्यते।

किञ्च 'वेति खादतीति **वयो** बाहुः' इति सर्वेषु पुस्तकेषूपलभ्यमानः पाठः कथमपि न सङ्गच्छते, 'न्यञ्चौ वयसौ यस्याः सा' 'नीचौ . . . वयसौ यस्याः सा' इत्युभयत्र वयःशब्दस्य पुंस्त्वदर्शनात्। अत एव 'वेति खादतीति वया बाहुः' इति पठनीयम्।

अस्यैव सूक्तस्य षष्ठमन्त्रस्य व्याख्यायां दृश्यते—रुजानाः। 'रुजो भङ्गे'। रुजन्ति कूलानीति रुजाना नद्यः। रुजाना नद्यो भवन्ति रुजन्ति कूलानीति यास्कः। व्यत्ययेन शानच्। तुदादिभ्यः शः। **नुमभाव**-श्छान्दसः। . . . पिपिषे। पिष्लृ संचूर्णने। व्यत्ययेन **लिट्** इति।

अत्र "नुमभावश्छान्दसः" इति पाठो व्यक्तमेव प्रामादिकः, नुमः प्राप्तेरेवाभावात्। 'आने मुक्' इति मुक् प्राप्तः, स च न दृश्यते, अत एवोक्तं भाष्यकृता—मुगभावश्छान्दसः। इति। अस्यैव सूक्तस्याष्टम-मन्त्रस्य व्याख्यायां दृश्यते—अनित्यमागमशासनमिति वचनान्मुगभाव इति।

'पिपिषेपिष्लृ संचूर्णने। व्यत्ययेन लिट्' इत्यपि पाठोऽशुद्धः। अत्र लिटः प्रयोगः सूत्रानुगत एव, परं पिषधातोः परस्मैपदित्वादत्रात्मने-पदविभक्तिरनुपपन्ना। अत एव 'व्यत्ययेन लिट्' इत्यस्य स्थाने 'व्यत्ययेन तङ्' इति पठनीयम्।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुपर्णीनिष्क्रयः

[श्रीअनन्तनारायण-शास्त्री]

किञ्चिदिव निवेदनम्

अयि वेदशास्त्रपारदृश्वानो विद्वदपश्चिमाः ! श्रवसि कुरुत मदीयमपि कञ्चिद्वार्तालेशं—यत् अमर्त्यां भाषां मर्त्येष्वपि विस्तारयितु प्रवृत्त्याहमपि सांप्रतं तैत्तिरीयसंहितागतमर्थवादं कञ्चिदाश्रित्य सुपर्णीनिष्क्रयं नाम नाटकं व्यररचम्। कथासारस्त्वयं—काश्यपस्यर्षेर्द्वे भार्ये—कद्रूः सपर्णीति च। ते चात्मरूपयोरस्पर्धेताम्। केनापि पणेन कद्रूरन्यां जिगाय। अमुष्मात् सोमाहृत्या च प्रेष्यतानिस्तारश्च दर्शितः। सौपर्णेयेषु गायत्र्येवामुं गत्वा सोममाहरत्। पूर्वं गतयोर्जगतीत्रिष्टुभोश्चत्वार्यप्यक्षराणि सैव स्वीचकार। अत एव प्राग्गायत्री चतुरक्षरापि तयोरक्षरैश्चतुर्भिश्चाष्टाक्षरा सती सर्वेषु प्रथितास्ते। अत एव छन्दःसु गायत्र्येव श्रेष्ठेति सर्वविदामाशयः। अस्मिंश्च तत्र तत्र धर्मन्यायादयः सामान्या अपि विषयास्तत्रभवतां समेषां विदुषां मुदमावहेयुरिति विश्वसिमि। दोषज्ञानामपि गुणमात्रश्लाघाशीलानां कलाविदां तादृशानां परमाशयमनुपमा आशिषश्चाहमाकाङ्क्षामि।

पात्राणि

कश्यपः—वृद्धतापसः, गुरुः।

शिष्याः—काश्यपशिष्याः हारीत-कालापात्रेयाद्याः।

वैनतेयः—गरुडः।

काद्रवेयाः—कद्रूसुताः तूल-वितूल-लोहिताद्या रसावर्तिनः।

कद्रूः—काश्यपपत्नी।

सुपर्णी—काश्यपपत्नी।

गायत्रीत्रिष्टुब्जगत्यः—छन्दांसि सुपर्णीतनयाः॥

[क्रमशः]

शुभं भवतु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीयो भ्राजाख्यः श्लोकः

[श्रीरामशंकर-भट्टाचार्यः]

अशेषशेमुषीसम्पन्नो भगवान् पतञ्जलि व्याकरणशास्त्रप्रयोजन-कथनकाले प्रसङ्गादेकं श्लोकं पपाठ। यथा—

यस्तु प्रयुङ्क्ते कुशलो विशेषे
शब्दान् यथावद् व्यवहारकाले।
सोऽनन्तमाप्नोति जयं परत्र
वाग्योगविद् दुष्यति चापशब्दैः॥

[पस्पशाह्निक पृ० ३३ निर्णयसागरः]

भ्राजाख्योऽयं श्लोक इत्यपि भगवतोक्तम्। इमे श्लोकाः कात्यायन-प्रणीता इति कैयटहरदत्तादयः।

पतञ्जलिना प्रमाणत्वेन उद्धृता इमे श्लोका अवश्यं प्रमाणभूता इति कथयितुं शक्यते। परन्तु हा कष्टम्! कात्यायनप्रणीतमिदं ग्रन्थरत्नं सर्वथा लुप्तमेव। प्रचलितेषु ग्रन्थेषु अस्य वचांस्यपि न उद्धृतानीति दृश्यते।

अपरः कश्चिद् भ्राजाख्यः श्लोकोऽस्माभिरुपलब्धः। तथाहि ३।१।१ सूत्रव्याख्याने कैयट एकं श्लोकमुदाहृतवान् :—

"अर्थविशेष उपाधिस्तदन्तवाच्यः समानशब्दो यः।
अनुपाधिरतोऽन्यः स्याच्छ्लाघादिविशेषणं यद्वत्॥"

न्यायवार्त्तिकतात्पर्यटीकायामिदं कात्यायनवचनम् इत्यभिहितम् —तथाच स्मरति भगवान् कात्यायनः 'तदन्तवाच्यः समानशब्दोयम्' इति। [(द्रष्टव्यं पाठान्तरम्)—२अ· २आ· ६० सु० पृ० ४७६ चौखम्बा संस्करणम्।]

नैयायिकसम्प्रदाये कश्चिदपि कात्यायननामधेयो विद्वान् नास्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतोऽयं वैयाकरणः कात्यायन इति तर्क-लाघवतः स्वीकार्यम्। किञ्च अस्मिन् श्लोके य उपाधिशब्दो व्यवहृतः, स तु न अनुमानखण्डव्यवहृत उपाधिशब्दः, प्रत्युत शब्दखण्डव्यवहृत एव। अत्र यस्मिन्नर्थे उपाधिशब्दो व्यवहृतस्तस्मिन्नर्थे वैयाकरणानां व्यवहारः पुष्कलो, न नैयायिकानाम्। अपि च अत्र यः 'श्लाघादि'शब्दः पठितः, स तु 'गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु' (५।१।१४४) इति सूत्रपठितं श्लाघाशब्दं साक्षात् लक्षयति। अपि च नेदं वचनं श्लोकवार्त्तिकभूतम्, अतः परिशेषात् श्लोकोऽयं भ्राजाख्य इत्येवाभ्युपेयम्।

यदीदं निश्चितं स्यात्, तर्हि इदमपि स्वीकरणीयं यत् कैयटेन उद्धृतानां बहूनां श्लोकानां मध्ये कतिपये भ्राजाख्या एव।

महाभाष्य-पाठविमर्शः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

"मतुवसो रु सम्बुद्धौ छन्दसि" [८।३।१] इति सूत्रस्य भाष्ये दृश्यते—

"विभाषा भवद्भगवदघवतामोच्चावस्य।

छन्दसि भाषायाञ्च भवत् भगवत् अघवत् इत्येतेषां विभाषा रुर्वक्तव्यः, ओच्चावस्य वक्तव्यः। भोः भवन्। भगोः भगवन्। अघोः अघवन्निति।

सम्बुद्धावित्युच्यते तत्रेदं न सिध्यति—भो ब्राह्मणा इति। तथा विभक्तौ लिङ्गविशिष्टग्रहणं नेतीह न प्राप्नोति—भो ब्राह्मणि।

नैष दोषः। अव्ययमेष भोः-शब्दो नैषा भवतः **प्रकृतिः**।" इति।

अत्रान्तिमं पदं प्रकृतिरिति केषुचित् पुस्तकेषु प्रवृत्तिरिति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चापरेषु। संक्षिप्तसारव्याकरणस्य वृत्तौ प्रकृतिरित्येव पाठ उपलभ्यते। तथाहि "भवदादेर्वा वतोरुस्" इति सूत्रस्य (६।१०) वृत्तिः--हे भोः हे भवन् हे भगोः हे भगवन् हे अघोः हे अघवन्। अव्ययोऽपि भोः-शब्दोऽस्ति। तेन भो ब्राह्मणि, भो देवदत्तयज्ञदत्तविष्णुमित्राः। तथाच भाष्यम्, अव्ययमेष भोः-शब्दो नैषा भवतः प्रकृतिरिति।

व्याख्यातञ्चेदं गोयीचन्द्रेण—अव्ययोऽपीत्यादि। यदि भोः-शब्दोऽयं भवत एव प्रकृतिः स्यात्, तदा देवदत्तादीनां बहूनामेव विशेषणं भोः-शब्दो न स्यात्। . . . नैषा भवतः प्रकृतिरित्यत्र तु प्रकृतिविशेषणत्वादेषत्यस्य स्त्रीलिङ्गता।

अत्र च वंशीवदनकृता टिप्पनी–"एषा प्रकृतिः सुप्प्रकृतिर्नाम इति यावत्, न भवत्सम्बन्धिनी। जन्यजनकभावसम्बन्धे षष्ठी" इति।

उद्द्योते द्विविधोऽपि पाठो व्याख्यातः। "एषा प्रकृतिः। अव्ययत्वे सुप उत्पत्तेरस्य प्रकृतित्वव्यवहारः। सा च न भवतः न भवच्छब्द-जन्येत्यर्थः। प्रवृत्तिरिति पाठे प्रयोग इत्यर्थः" इति।

सर्वमिदं व्याख्यानं क्लिष्टतया नः प्रतिभाति। नैषा भवतः प्रसूतिरिति वा सम्बुद्धिरिति वात्र शुद्धः पाठ इति प्रतीयते। अत एव कैयटे नात्र किमपि न विलिखितम्। अत्र कल्पनालाघवात् प्रसूतिरित्येव पाठो ग्राह्य इति नो बुद्धिः। किं वात्र विदुषां मतम्?

प्रकृष्टम् उत्तरम्।

दारुणोऽयं निदाघः। पिपासार्ताः प्राणिनोऽनवरतं पानीयं पिबन्तः कथमपि तृप्तिं नाधिगच्छन्ति। अवसरे चास्मिन् यादवमहोदयस्य सलिलकलशः पत्न्याः पाणितः स्खलितश्चूर्णतामभजत्। अनन्यशरणेन यादवेन प्रतिवेशिनो माधवस्य सकाशात् कलशः कश्चिद् ऋणरूपेण स्वीकृतः, परेद्यवि च प्रातः प्रत्यर्पितः। माधवमहोदयः कलशं सच्छिद्रं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वीक्ष्य कदाचिद् यादवमुक्तवान्, अये किमिति प्रत्यग्रो मे कलशो भवता भग्नः, इदानीमत्र छिद्राणि दृश्यन्त इति। व्यवहाराजीवेन यादवमहोदयेन प्रत्युक्तम्, वयस्य, मा मैवम्। प्रथमतस्तावदभग्न एव कलशो मया प्रत्यर्पितः। किञ्च, यदा मया गृहीतो भवतः कलशस्तदैवात्र छिद्राण्यासन्। किञ्च, मया भवतः कलशो लेशतोऽपि न गृहीतः इति।

विधवाया धवः

खृस्तीयानां धर्ममन्दिरम्। उपाचार्येण भाषणं प्रदीयते। आचार्येण तूष्णीमवस्थीयते। नागरिकाः सर्वे ऽवहिताः शृण्वन्ति।

भद्राः, अद्य तावद्विवाहमधिकृत्य किञ्चिदुच्यते। स्वविधवाया या भ्रातृव्या (cousin) तस्याः पाणिपीडनं प्रतिषिद्धमेवास्मच्छास्त्रेषु।

आचार्यः। न हि न हि, स्वविधवाया या स्वसा सा न परिणेतव्येत्येव शास्त्राणामाशयः।

उपाचार्यः। आर्य, मृष्यताम् मे निर्बन्धः। न खलु मयोच्छास्त्रं किमप्यालप्यते। स्वविधवाया या भ्रातृव्या (cousin) सा कथमपि न परिणेतुं शक्यते धार्मिकैः।

आचार्यः। अये भ्रान्तोऽसि। पुनरप्यनुशीलय शास्त्राणि। स्वविधववायाः स्वसैव न परिणेया।

उपाचार्यः। आर्य, यस्य पत्नी विधवा स परलोकं प्रस्थितः। कथं स परिणयेत्।

समीचीनं प्रशंसापत्रम्

गृहिणी। मासमेकं त्वयास्मद्गृहे प्रेष्यभावेनावस्थीयते। तव पाटवेन वयं तथा सन्तुष्टा यथेदृशं दासीरत्नमत्र ग्रामे निगूढं रक्षितुं नेच्छामः। पत्तनं गत्वा तत्र स्वेन भासा जगदुद्भासय।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निरक्षरा दासी । तर्हि कृपया प्रशंसापत्रमेकं प्रदीयताम् ।

गृहिण्या विलिखितम्—

सप्रमोदं मया प्रशस्तिपत्रमिदं प्रेष्यायै प्रदीयते । अनया किल पत्रवाहिकया नियोज्यभावेनावस्थितमस्मद्भवने वर्षमेकमेकादश-मासोनम् । अवसरे चास्मिन्नुपलब्धवत्यहमिमां श्रमशीलां—वहिर्द्वारे, मिताचारिणीं—प्रभुकर्मणि, अवहितां—स्वात्मनि, जागरूकाम्—अप-देशेषु, प्रेमप्रवणां—तरुणपण्यविक्रयिषु, साधुशीलां च—सर्वेषु महार्घेषु वस्तुषु तालकबद्धेषु । इति ।

पुत्रशब्दस्य निर्वचनम्

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

सहृदयाः, बाल्यादारभ्य श्रूयतेऽस्माभिः [महाभारत १।७१।३९]

पुन्नाम्नो नरकाद् यस्मात् त्रायते पितरं सुतः ।
तस्मात् पुत्र इति प्रोक्तः स्वयमेव स्वयम्भुवा ॥ मनु ९।१३९

इति । अतः प्रतीयते पुदुपपदात् त्रायतेः कप्रत्ययेन पुत्रशब्दो निष्पन्नः, द्वितकारकश्चायम् । रामायणे [२।१०७।१२] पुनर्दृश्यते—

पुन्नाम्नो नरकाद् यस्मात् पितरं त्रायते सुतः ।
तस्मात् पुत्र इति प्रोक्तः पितॄन् यः पाति सर्वतः ॥

इति । अतश्च प्रतीयते पुदुपपदाच्च पित्रुपपदाच्च त्रायतेः कप्रत्ययेन पुत्रशब्दस्य निष्पत्तिरिति । महर्षिणा यास्केनापि निरुक्तम्—पुत्रः पुरु त्रायते, निपरणाद्वा । पुन्नरकं ततस्त्रायत इति वा (निरुक्त २।११) इति । व्याख्यातञ्चेदं दुर्गाचार्येण—पुरु त्रायते बह्वपि यत् पित्रा पापं कृतं भवति ततोऽयं त्रायत इति पुत्रः । निपरणाद्वा निपृणाति निददाति ह्यसौ पिण्डान् पितृभ्य इति पुत्रः । अथवा पुत् इति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नरकस्थानमुच्यते, ततस्त्रायत इति वा पुत्र इति। महाभाष्ये च दृश्यते—यदि पुनाति प्रीणातीति वा पुत्रः, दुहितर्यप्येतद् भवति [१।२।६८] इति। उणादिसूत्रेऽपि पुनातेः पुत्रशब्दो व्युत्पादितः। तथाच सूत्रम्—पूञो ह्रस्वश्च [४।१७३, दशपादी ८।८७]। पूञो धातोः क्त्रप्रत्ययो भवति ह्रस्वश्च धातोः। पुनातीति पुत्रः सुतः। इति।

भाषातत्त्वविदां मतेन प्रजननार्थकपुधातोः क्त्रप्रत्ययन पुत्रशब्दो निष्पन्नः। अयमेवावेस्तायां पुथ्रूपेण लाटिन-भाषायां च puklum-रूपेणोपलभ्यते। पुमानप्यस्मादेव धातोर्निष्पद्यते। यो जनयति स पुमान्, यश्च जन्यते स पुत्र इति। ग्रीक्-pais (*pawis) शब्दे, लाटिन puer शब्दे, आङ्ल-puberty शब्दे चायमेव धातुर्देदीप्यते। मन्ये प्राचीनानामप्येतदेवाभिप्रेतमासीत्। अत एव मेधातिथिना पुन्नाम्न इति श्लोकव्याख्यानावसर उपोद्घातरूपोणोक्तम्—अपत्योत्पादन-विधिशेषोऽयमर्थवाद इति।

विचित्रो विवेकः

[श्रीउपेन्द्रनाथ-गङ्गोपाध्यायः]

(१)

प्रातःसन्ध्यां नारायणपूजां च विनिर्वर्त्य गृह्यां गां वत्सांश्च स्वेन हस्तेन किञ्चिद् भोजयित्वा यावद् गौरीकान्तः प्रातराशाय समुद्यत-स्तावद् दौहित्रेण कृष्णचन्द्रेण समागत्योक्तम् "मातामह, धर्माधिकरणाद् राष्ट्रियः समागतः, भवन्तमाह्वयति" इति।

गौरीकान्तस्तावदासनं परिग्रहीतुमुपक्रमते स्म। स ऋजु दण्डाय-मानः सविस्मयमुवाच "धर्माधिकरणाद्राष्ट्रियः समागतः? किमिति? कथं वा राष्ट्रियः समागतः" इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्यग्रनियुक्तः प्रेष्यश्चिन्ताख्यः कृष्णस्य पृष्ठतः समागत्य स्थितः, कृष्णस्य वचनं संशोध्य तेनोक्तम्, "आर्य, न खलु राष्ट्रियः, रक्षिक एव" इति।

"रक्षिकः इति ? रक्षिकस्तावत् कः पदार्थः ?"

इदानीं चिन्ता स्ववचनं संशोध्य प्रोवाच, "आर्य, आह्वायकः" इति।

तच्छ्रुत्वा गौरीकान्तस्य मुखमण्डले समुद्वेगस्य छायापातः समजनि। आह्वायकस्य समागमन-कारणानुमाने लेशतोऽपि तस्य विलम्बो नाभूत्। तथापि मथुरचट्टोपाध्यायस्य यो व्यवहारः प्रचलित-स्तद्गत-साक्षिसमाह्वानस्याह्वायकोऽपि कदापि स्यात्। अपि नाम तदेव स्यात्। तर्हि सर्वं शुभम्। बहिर्भवनं गन्तुं गौरीकान्तः पादौ प्रसारितवान्।

खाद्यं सन्नह्य गृहिणी गिरिजाया सविध एव प्रतीक्षमाणा स्थिता। प्रस्थानोद्यतं पतिमाक्षिप्योक्तवती, मा तावत्। न गन्तव्यम्। सत्वरं भुक्त्वा गन्तव्यम्। सकृद् गतस्तत्रैव कदाचित् कार्यवशान्निरुद्धः स्याः, शीघ्रं प्रत्यागन्तुं न प्रभविष्यसीति।

गृहिणीं प्रति दृष्टिं पातयित्वा मृदु विहस्य गौरीकान्तेनोक्तम्, आह्वायकश्चेद् बहिरपेक्षेत त्वदीयं खाद्यं न हि रोचिष्यते। प्रथमतस्ता-वद्व्यापारस्यामुष्य निष्पत्तिः करणीया। इत्युक्त्वासौ प्रस्थितः।

गिरिजाया भोज्यादिकं परिरक्षन्ती तत्र निषण्णासीत्। क्षणादूर्ध्वं प्रत्यावृत्यासनं परिगृह्य गम्भीराननेन गौरीकान्तेनोक्तम्, आह्वायकं विसर्ज्यागतोऽस्मि, तथापि भोज्यं ते नैव स्वादु स्यात्। न खलु शुभोऽयं वृत्तान्त इति।

उद्विग्नवदनेन गिरिजायापृच्छत्, किमिति ? कस्तावद्वृत्तान्त इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"पितुऋणपत्रमधिकृत्य प्रियमित्रेण धर्माधिकरणेऽभियुक्तम्। आह्वानपत्रं प्रदाय गतः।"

चिन्ताचितानना गिरिजायावदत्, कस्तावदभियुक्त इति।

गौरीकान्तोऽवदत्, मां वर्जयित्वा को वापरोऽभियोक्ष्येत ? पिताः चेदभियोक्तुमिष्येत तर्हि स्वर्गं गत्वाह्वानपत्रं प्रदेयं स्यात्। नैव प्रबभूव रावणः स्वर्गसोपानं निःशेषेण निर्मापयितुमिति।

किञ्चिदिव विलज्जमानया गिरिजाययोक्तम्—नहि नहि, न खलु पितरमभिप्रेत्य वच्मि। देवरोऽप्यभियुक्तो न वेत्येव पृच्छामीति।

सलिलपात्रं गभीरमाचम्य गौरीकान्तोऽवदत्, कथम्, कथं वोमा-कान्तोऽभियोक्ष्येत ? को वा तस्यापराधः ? वित्तनावोऽधस्तात् सुबहूनि छिद्राणि प्रादुर्भवन्तीति दृष्ट्वा स तावद् गृहपतेर्जीवितकाल एव पृथक् संवृत्तः इति।

पित्रास्य जीर्णपूगवाणिज्यस्य प्रभूतां समुन्नतिं विधायैकदा पित्रा सूर्यकान्तमुखोपाध्यायेन बहुमूल्यसम्पत् समार्जिता। परं पञ्चकन्यानां विवाहार्थं कृतस्यर्णस्य ताड़नैकशस्तस्याः सम्पद्वस्तानंशान् विलुप्य-मानान् दृष्ट्वा दूरदर्शिनोमाकान्तेन स्वात्मानं ततोऽपसार्य सुदृढ़े क्षेत्रे समाश्रयो बद्धः। इति।

गिरिजायावदत्, पितुर्जीवितकाल एव देवरः पृथक् संवृत्तः, जानाम्येवैतत्। तथापि 'पितृणम्' इति व्यपदिश्यते ननु। इति।

गिरिजायाया वचनेन कृतं गौरीकान्तस्य वदनमण्डले स्मितेन पदम्। धीरं शिरः सञ्चाल्य तेनोक्तम्—तत्तु न सम्भवति। पितृणं तावत् फलस्यास्थि। यस्य सस्यं तस्यास्थि। सस्यं चेन्न लभ्यते, अस्थ्नो दायो नास्ति। इति।

गिरिजाया सकौतुकमपृच्छत्, किं तावत् सस्यमिति व्यपदिशसि ? इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गौरीकान्तोऽवदत्, सस्यं व्यपदिशामि धनधान्यं, शस्यं वदामि सम्पदम्। अपि न श्रुतं भवत्या जनप्रवादः, जनोऽसौ सर्वथा सस्यसम्पन्न इति, तस्य सविशेषा धनसम्पत्तिर्वर्तते इति तस्यार्थः। इति।

एतस्य किमप्युत्तरमदत्त्वा गिरिजायावदत्, भवता वा कीदृग्विधा धनसम्पत्तिः समासादिता। शृणोमि तावत्। इति।

गौरीकान्तोऽवदत्, तुच्छं यदेव किञ्चिल्लब्धम् स एव दाय इत्युच्यते। तस्यैव च दायस्य कृते पितृणधुरा मया वोढ़व्या इति।

'कियतोऽर्थस्य कृतेऽभियुक्तम्?'

"मूलं वृद्धिं चाहृत्य सार्धसहस्रत्रयदेशीयं स्यात्।"

तच्छ्रुत्वा गिरिजायाया ललाटे चिन्तारेखाः प्रादुर्भूताः। सावदत्, इदानीं क उपाय इति।

"साम्प्रतं तु कोऽप्युपायो नैव नयनपथमवतरति।"

"स चेन्नावतरेत् तर्हि मदीयानि भूषणानि विक्रीयाभियोगान्मोचयात्मानम्।"

गिरिजायाया वचनं श्रुत्वा पुनरपि गौरीकान्तस्य वदनसरसिजे प्रादुर्भूतो हासः। सोऽवदत्, ममैव तावत् पितृणम्, परं श्वशुरर्णमिति कोऽपि शब्दो नास्ति, तत् किमिति भूषणानि त्वदीयानि विक्रेष्ये? पितृणतः समुद्धार्यान्ततो मां पत्न्यृणे निपातयितुमिच्छसि वा? इति।

"परमेतस्य पत्न्यृणस्य कृते न खलु त्वं धर्माधिकरणेऽभियोक्ष्यसे न वाह्वानं ते समागमिष्यति।"

गौरीकान्तेन स्वगतमुक्तम्, न खलु धर्माधिकरणमेवैकं भयस्थानं विभावयामि इति। प्रकाशमवदत्, अन्ततो गत्वा तव भूषणानि वर्तन्त एव, ततः पूर्वं द्रक्ष्यामि तावद् यदि कस्यापि सकाशादर्थमिमं संगृह्य "प्रियमित्र"स्याभियोगादात्मानं मोचयितुं प्रभवेयं वा न वेति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परं प्रतिभुवमन्तरेणैतावतोऽर्थस्य प्रदाता "प्रियमित्र"सब्रह्मचारी कोऽप्यस्मिन्नगरे वर्तत इति न सम्भावयामि। इति।

गिरिजायावदत्, तर्हि सकृद्व्यवहाराजीवस्य भवनं गत्वा दृश्यताम् इति।

प्रातराशस्तावत् सम्पन्नः। उत्थायासनस्योपरि दण्डायमानो दरसमुच्, सितकण्ठं गौरीकान्तोऽवदत्, व्यवहाराजीवस्य भवनमिति? किमर्थम्?" इति।

मन्त्रणार्थम्।

मन्त्रणार्थमिति? व्यवहाराजीवस्तावद् दुर्मन्त्रणामेव प्रदास्यति; व्यवहाराजीवस्य मन्त्रणेनैकमेव व्यवहाराजीवं वर्जयित्वापरस्य कस्याप्युपकारः कदापि प्रत्यक्षीकृतो वा?

न खलु विषयेऽस्मिन् गिरिजायायाः कोऽपि स्वानुभव आसीत्, अतः सा तूष्णीं स्थिता।

गौरीकान्तोऽवदत्, अर्थं संगृह्य "प्रियमित्र"स्य व्यवहारजीवेनव तं धर्माधिकरणे प्रदापयिष्यामीति।

गिरिजायावदत्, भवतु, स एव प्रयासस्तर्ह्यास्थीयतामिति। (क्रमशः)

व्याकरण-विमर्शः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

(पूर्वतोऽनुवृत्तः)

सरस्वतीकण्ठाभरणस्य "क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति॰ कोपः" इति सूत्रं व्याचक्षाणेन दण्डनाथेनापि विस्पष्टमेवोक्तम्—क्रोधः कोप एव। द्रोहादयोऽपि कोपप्रभवा एव गृह्यन्ते। ततः सामान्येन विशेषणं "यं प्रति कोपः" इति। देवदत्ताय कुप्यति क्रुध्यति वा। इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यस्मै कोप इत्यनुक्त्वा "यं प्रति कोपः" इति कथमुक्तम् इत्यत्र हेमचन्द्रेण समाहितम्—

यं प्रति किम् ? यस्मिन्नित्युच्यमाने कर्तुरपि स्यात्। मैत्रेण क्रुध्यते। इति। व्याख्यातञ्चैतत् लघुन्यासे—न केवलं विषयसप्तम्यां यं प्रति कोपस्तस्य सम्प्रदानत्वम्। आधारमात्रेण कर्तुरपि स्यादित्यर्थः इति।

वोपदेवेन यस्म दित्सासूयाक्रोधेर्ष्येत्यादिसूत्रस्य [२९५] वृत्तौ, स्मराद् गोपीगणोऽसूयति कुप्यतीर्ष्यति यस्मै इत्युदाहृतम्।

संक्षिप्तसारस्य "क्रुधद्रुहेर्ष्यासूयार्थानां यत्रार्थः कोपे" इति सूत्रस्य टीकायां गोयीचन्द्रेणोक्तम्—क्रोधस्तावत् कोप एव, द्रोहादयोऽपि कोपप्रभवत्वादेव कोपार्था इति।

मैत्रेयरक्षितेन तन्त्रप्रदीप उक्तम्—यं प्रति कोप इति निर्देशात् कर्मप्रवचनीयविभक्तिः कारकविषयेऽपि क्वचित् प्रवर्तत इत्यनुमीयत इति।

(क्रमशः)

भारविः सारविद्यः

[श्रीमहालिङ्गशास्त्री]

अथ गच्छति काले कश्चन गायको राजसभामुपासदत्। तं च, काञ्चीपुरेश्वरं पल्लवसिंहविष्णुं प्रतियियासुमवगत्य भारविः सिंहविष्णुनामांकितां नरहरिप्रशस्तिमेकां संग्रथ्य तस्मै प्रादात्। अगायदेतद् गीतवस्तु स च सिंहविष्णोः पुरस्तात्—

दनुजपति-हृदय-भूधर-विभेदविज्ञात-शक्तिनखकुलिशम्।
जगदुदयहेतु-विष्णोरवतु वपुर्नारसिंहं वः॥ इति॥

केनेयमत्युदारार्था निर्मितेति कुतूहलात्।
अनुयुक्तोऽथ गन्धर्वः कीर्तयामास भारविम्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ च सिंहविष्णुः बहुशः संप्रार्थ्य दुर्विनीतसकाशादानीय भारविं वसुभारैः समाराध्य निकट एव निवासयामास । स च सुहृष्टः भूपालमनघर्भूषयामास सुभाषितैः। तदानीं भारविः विंशतिवर्षदेशीयो राजाभवदिति अनुमीयते ।

वृद्धपरम्पराऽऽगतमिदमपरं भारविचरितम्—स किल बाल्य एव काव्यकरणकृती प्रथामवाप। सर्वत्र जगत्यभ्यर्ह्यमाणस्य तस्य गुणैरसन्तुष्यन्निव दूषणपरोऽभवत् तस्य पिता। तमेवंविधमसोढा भारविः क्रूरां बुद्धिमास्थाय महत्या शिलया सह पितुः शयनीयस्योपरि समारुह्यावसरप्रेक्षी तस्थौ। अथ शिशयिषुः पिता वृत्तान्तमभ्यूह्य श्लोकमेनमपठत्—

सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ।। इति ।

तद्वचो विमृश्य सहसा सञ्जातपश्चात्तापः पितुश्चरणयोः पतित्वा भारविः स्वापराधक्षमापणमन्वतिष्ठत् । इति ।

किरातार्जुनीये दृश्यते चैतत्पद्यं द्वितीयसर्गे युधिष्ठिरकृते भीमोपसान्त्वने ।

अन्यविधयाऽपि चैतच्छ्लोकघटको वृत्तान्तो निगद्यते। यथा अनेन किल भारविकृतेन श्लोकेन सपदि स्मृतिमारूढेन कोऽपि भूपतिः अविवेकमूलतो निजभार्यापुत्रवधोद्यमाद् विरतो महतीं प्रीतिमवाप इति। शोकानुभवसारभूतोऽयं श्लोकः कुमारिलभट्टशिष्येण गुरुरितिविख्यातेन प्रभाकरमिश्रेण स्वीयायां शाबरभाष्यव्याख्यायां बृहत्यामुदाहृतो दृश्यते ।

जीवनकाल-निर्णयः

ऐतिहासिकैरप्युपपन्नया रीत्या भारवेर्जीवनकालः क्रैस्तवसप्तमशतकात् प्राचीन इति सूपपादम् । तथाहि—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(१) चतुस्त्रिंशदधिकषट्शतीव्यवस्थितः शिलालेखः कोऽपि भारविं विख्यातं कविमाख्याति । यथा—

"येनायोजि न वेश्म स्थिरमर्थविधौ विवेकिना जिनवेश्म ।
स विजयतां रविकीर्तिः कविताश्रितकालिदासभारविकीर्तिः ॥

(२) अन्यस्मिन् शासनलेखे निर्दिष्टमस्ति यद्भारवेः काव्ये पञ्चदशसर्गस्यं शब्दचित्रदुरवगाहस्य दुर्विनीतो नाम राजा व्याख्यां विरचयामास इति । दुर्विनीतस्य राज्यकालः षष्ठशतकस्य पार्यन्तिक-दशकेष्विति तज्ज्ञैरुपपाद्यते ।

(३) अवन्तिसुन्दरीकथाऽनुसारेण भारवेरादर्ता सिंहविष्णुः अपि पूर्वोक्तकालीन एवेति अनुमन्यन्ते ऐतिहासिकाः ।

एवं च सप्तमशतकप्रान्तभाजा प्रभाकरेण भारविवचःस्मरणमपि उपपद्यते ।

दुर्विनीतो गंगवंश्यः भारवेरादर्ता व्याख्याता च तत्काव्यैकदेशस्य । एवं षष्ठशतकस्योत्तरार्धे भारविः भुवनतले व्यलासीदिति सुकरं वक्तुम् ।

भारवेरावासभूतो देशः

स च दक्षिणदेशमलञ्चकार, यतः पल्लवगंगवंश्यनरनाथयोः अभ्यर्हणभागभूत् । स्मरति च सह्यमहीभृतम् अष्टादशे सर्गे—

उरसि शूलभृतः प्रहिता मुहुः प्रतिहतिं ययुरर्जुनमुष्टयः ।
भृशरया इव सह्यमहीभृतः पृथुनि रोधसि सिन्धुमहोर्मयः ॥

भारवेः काव्यपद्धतिः

आदितः प्रभृति साहित्यमहाध्वनि प्रसारितदृशामयं हि सहस शब्दचित्रेष्वाविष्कृतान्यादृशपक्षपातः पुरः परिवर्तते । अस्य खलु पूर्व कालिदासाश्वघोषमेण्ठप्रवरसेनकुमारदासादयो भट्टिश्च वाचं पन्थानमन्वरुध्यन्त तं निजेन वैलक्षण्येनातिशिशयिषुरिव भारविः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रस्थानान्तरेषु कौशलमाविष्करोति। शब्दचित्रभूयिष्ठं निबध्नाति सर्गमेकम्। वर्णनास्वधिकमभिरमते। कथावस्तुपरिमितमुपादाय काव्यपद्धतिविशेषितं तत् पण्डितमनोरममापादयति। विचित्रेषु वृत्तेषु पक्षपाती भवति। बन्धविशेषान् सप्रयत्नं प्रयुङ्क्ते। एवमादि नूतनलक्ष्मान्वितं काव्यमुपनिबध्नन्नसौ किं दाक्षिणात्यसाहित्यसमय-संश्लेषमात्मनो निरन्तरमवगमयति? दृश्यन्ते खल्वीदृश्यो रीतयः द्राविडादिप्रबन्धेषु। अर्वाचीना एते सुतरां बन्धयमकानु-प्रासैकाक्षरद्व्यक्षरादिवैचित्र्यपरायणाः प्रतिलभ्यन्ते। प्राक्तनी चैतेषामेव प्राया रीतिरिति अभ्यूह्यम्। गैर्वाण्यां रीतिरपीदृशी अत्यन्तं सुकरेति निदर्शयितुमिव काचित्कं प्रयत्नमेवंरूपमुररीचकार भारवि-रिति शक्यमवगन्तुम्। भारविस्तदनन्तराणां महाकाव्यपद्धतिप्रवर्तको जातः। दण्डिनः सर्गबन्धलक्षणाख्यानं प्रायः स्वपितामहकृतिमना-मनिर्देशेन प्रमाणयति। तस्य च काव्यादर्शे अतिविस्तृतः तदितर-काव्यलक्षणकारैरदर्शितया रीत्या, प्रपञ्चितोदाहरणसन्दोहः शब्द-चित्राध्यायो दृश्यते।

प्रत्याख्येयानि वार्त्तिकानि

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

(२)

लघुशब्देन्दुशेखरे नागेशभट्टेनोक्तम्—"हरीतकीं भुङ्क्ष्व राजन् मातेव हितकारिणीम्" इत्यसाध्वेव। 'तिङ्समानाधिकरणे प्रथमा' 'अनभिहिते प्रथमा' इति वार्त्तिकस्वारस्येन प्रथमायास्तत्र तत्र कारक-विभक्तित्वोक्तिपरभाष्येण च क्रियायोग एव प्रथमायाः प्रवृत्त्या मातेति प्रथमायां मातृसदृशीमित्यर्थेऽसाधुत्वादित्यन्यत्र विस्तरः। एतद्योग-विभागसिद्धसमासस्य विशेषसंज्ञा न सन्त्येव, तत्तदधिकारेष्वपाठात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज़ीमूतेस्येवेति। अत्र यथार्थत्वादिप्रयुक्तोऽव्ययीभावस्तु न, "तत्र तस्येव" [५।१।११६] इति निर्देशात्। इति।

निपातार्थनिरूपणप्रकरणे लघमञ्जूषायां चोक्तम्—'मातेव हितकारिणीम्' इत्यादौ त्विवस्य सादृश्यवाचकता। इवशब्दार्थ-सादृश्ये च मातुरन्वय इति प्रातिपदिकार्थे प्रथमैव। न च षष्ठ्यापत्तिः, प्रतियोगिविशिष्टसादृश्यवत इवार्थत्वेन तदेकदेशे प्रतियोगिनि मातु-रभेदेनान्वयात् षष्ठ्यप्राप्तेरिति कश्चित्।

असाध्वेवेदम्। क्रियान्वय एव प्रथमायाः साधुत्वात्। अत एव 'तिङ्समानाधिकरणे प्रथमा' 'अभिहिते प्रथमा' इति च वार्त्तिकम्, प्रथमायाः कारकविभक्तिपरं भाष्यं च सङ्गच्छत इत्यन्ये (पृः ६५७) इति। व्याख्यातञ्चेदं कुञ्चिकायाम्—कारकविभक्तित्व परमिति। पुत्रेण सहागतः पितेत्यत्रोपपदविभक्तिरिति न्यायेन प्रथमासिद्धावप्रथमाग्रहणं न कर्तव्यमिति भाष्यकृतोक्तत्वात्। वस्तुतस्तु इति न्यायेनेत्यस्य इति रीत्या इत्यर्थः, यथा हि तत्रान्तरङ्ग-त्वात् प्रबलत्वं तथा प्रथमाया अपीत्यर्थः। इति।

(क्रमशः)

कालिदास-भवभूती

[स्वर्गत-द्विजेन्द्रलाल-रायः]

प्रथमः परिच्छेदः

आख्यानवस्तु

अभिज्ञानशकुन्तलं खलु कालिदासस्य श्रेष्ठं नाटकम्, बहूनामेव च मतेन तस्य श्रेष्ठो लेखः। तथाचाभियुक्ताः स्मरन्ति—"कालिदासस्य सर्वस्वमभिज्ञानशकुन्तलम्" इति। एवमेवोत्तररामचरितं भवभूतेः श्रेष्ठः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रबन्धः। अनयोः कव्योस्तारतम्यविचारोऽनयोर्नाटकयोस्तारतम्य-विचारेणैव सेत्स्यति।

अभिज्ञानशकुन्तलस्याख्यानवस्तु कालिदासेन महाभारते वर्णिताच्छ-कुन्तलोपाख्यानाद् गृहीतम्। पद्मपुराणस्य स्वर्गखण्डेऽपि शकुन्तलो-पाख्यानं विवृतं वर्तते, तेन चोपाख्यानेन शकुन्तलानाटकस्य समधिकं सादृश्यं सन्दृश्यते। परं पद्मपुराणमभिज्ञानशकुन्तलातोऽर्वाचीनमिति कालिदासस्य शकुन्तलाया एव काव्यरूपेण विपरिणाम इति च बहव आशेरते। अत एव पद्मपुराणोपवर्णितमुपाख्यानमेव नाटकस्यास्य मूलमिति वक्तुं नोत्सहे।

महाभारतोपवर्णितस्य शकुन्तलोपाख्यानस्थायं तावत् सारः—

शकुन्तला किल महर्षेर्विश्वामित्रस्याप्सरसो मेनकायाश्च सन्ततिः। अरण्ये परिवर्जिता सती महर्षिणा कण्वेन लालिताभूत्। यौवनपदवी-मनुप्रपन्नासावेकदा नृपतिना दुष्यन्तेन मृगयां गतेन यदृच्छया कण्वाश्रमं प्राप्तेन सन्दृष्टा। शकुन्तलाया रूपेण मुग्धो नरपतिर्गान्धर्वेण विधिना तामुपयम्यैकको राजधानीं प्रत्याववृते।

महर्षिः कण्वस्तदाश्रमे नासीत्। आश्रमं प्रत्यावृत्तेन तेन ध्यानबलेन सर्वं विज्ञातम्, क्षत्रियाणां गान्धर्वविवाह एव श्रेष्ठ इति विवाहोऽसावनुमोदितः। ततश्च कण्वाश्रमे शकुन्तलया कुमार एकः प्रसूतः। महर्षिश्च सुतसमभिव्याहृतां शकुन्तलां राजसदनं प्रेषितवान्।

सभायां समुपस्थितां शकुन्तलां प्रत्यभिज्ञातुमशक्नुवन् दुष्यन्तस्तां प्रत्याचख्यौ। ततश्च दैववाणीप्रत्ययेन तां परिजग्राह। वस्तुतस्तु विवाहवृत्तान्तो राज्ञः स्मृतिपथ एव स्थितः, केवलं लोकलज्जाभयेन प्रथमतस्तेन शकुन्तला न स्वीकृता। उपाख्यानमिदं कालिदासेन स्वीये रूपक इत्थं सन्निवेशितम्—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथमोऽङ्कः

मृगयां गतस्य दुष्यन्तस्य कण्वाश्रमप्राप्तिः। दुष्यन्तस्य शकुन्तलायाश्च परस्परं परिचयश्च प्रेम च। शकुन्तलायाः सहचर्योरनसूयाप्रियंवदयोस्तत्रोत्साहनम्।

द्वितीयोऽङ्कः

दुष्यन्तवयस्यौ। राज्ञो मृगयायामनुत्साहः, वयस्येन च साकं शकुन्तलागतः संलापः। राजानं मृगयायां प्रवर्तयितुं सेनापतेर्विफलमभ्यर्थनम्। तापसयोः प्रवेशः, रक्षोविघ्नप्रतिकरणार्थं च निर्बन्धः। मात्रादेशव्यपदेशेन दुष्यन्तेन वयस्यस्य विसर्जनं, पुनश्च राज्ञस्तपोवनप्रवेशः।

तृतीयोऽङ्कः

दुष्यन्तशकुन्तलयोः परस्परं प्रेमनिवेदनम्, गान्धर्वविवाहप्रस्तावश्च। सहचर्योस्तत्र साहायकम्।

चतुर्थोऽङ्कः

दूरे विरहिणी शकुन्तला। अनसूयाप्रियंवदयोः संलापः। शकुन्तलायाः पुरतो दुर्वाससः प्रवेशोऽभिशापश्च। आश्रमे कण्वस्य प्रत्यावर्त्तनम्, गौतम्या तापसद्वयेन च साकं शकुन्तलायाः पतिगृहे सम्प्रेषणम्।

(अस्मिन्नेवाङ्के विजानीमो यदामन्त्रणात् पूर्वं राज्ञा शकुन्तलाया अभिज्ञानमङ्गुरीयकमेकं प्रदत्तमिति।)

पञ्चमोऽङ्कः

राजसभायां नृपतिर्दुष्यन्तः। गौतम्या तापसाभ्यां च सह शकुन्तलायाः प्रवेशः प्रत्याख्यानम् अन्तर्धानञ्च।

अङ्कावतारः

धीवरनागरिकौ रक्षिणौ च। अङ्गुरीयकस्योद्धरणम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

षष्ठोऽङ्कः

विरहिणो नृपतेर्विप्रलापः । स्वर्गादिन्द्रस्यामन्त्रणाधिगमः ।

सप्तमोऽङ्कः

स्वर्गात् प्रत्यावर्तमानस्य दुष्यन्तस्य हेमकूटपर्वतप्राप्तिः । आत्मजसन्दर्शनं शकुन्तलया च साकं पुनर्मेलनम् ।

एतस्माच्च प्रतीयते वस्तुविषये महाभारतान्नाटकस्य विशेषतः किमपि वैषम्यं नास्ति । कालिदासेन केवलं मूलमुपाख्यानं पल्लवितम् । प्रधानवैलक्षण्यानि त्विमानि—(१) महाभारतानुसारेण महर्षेराश्रम एव शकुन्तलायास्तनयः समजनि, कालिदासस्य नाटके तस्याः प्रत्याख्यानत ऊर्ध्वं तनयो भूमिष्ठ इति । (२) महाभारते प्रत्याख्याता शकुन्तला तस्यामेव सभायां प्रतिगृहीता, नाटके पुनर्विच्छेदादनन्तरं स्थानान्तरे मेलनं सञ्जातम् । (३) सर्वतो गुरुतरं वैलक्षण्यम्—अभिज्ञानं दुर्वाससः शापश्च ।

यथा कालिदासेनाख्यानवस्तु महाभारताद् गृहीतं तथैव भवभूतिनाख्यानवस्तु वाल्मीकिरामायणतः स्वीकृतम् । रामायणस्योपाख्यानं त्वीदृशम्—रामो लङ्काजयादूर्ध्वमयोध्यामध्यासीनो राजकार्यं करोति । प्रकृतयः सीतायाश्चारित्रमधिकृत्य कुत्साकीर्त्तनमकुर्वत । रामो वंशगौरवसंरक्षणार्थं तपोवनदर्शनव्यपदेशेन सीतां वनवासाय प्रेषितवान् । सीता च वाल्मीकेस्तपोवने कुशलवनामानौ यमजौ प्रासोष्ट । ततश्च रामोऽश्वमेधं क्रतुमाजहार । स च तपोनिरतं शूद्रकमवधीत् । ततश्चाश्वमेधयज्ञे निमन्त्रितो वाल्मीकिः कुशेन लवेन च सांकं रामस्य सभां समाजगाम । तत्र च कुशलवौ वाल्मीकिविरचितं रामायणं जगौ । रामस्तौ प्रत्यभिजज्ञौ, सीतायाः पुनर्ग्रहणाभिलाषं च व्यक्तीचकार । परं सीतयाग्निपरीक्षयात्मनो विशुद्धिः प्रमापयितव्येति तेन निर्बद्धम् । क्रोधेन दुःखेन च सीता भूगर्भं प्रविष्टवती ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवभूतिना स्वीये रूपक उपाख्यानमित्थं सन्निवेशितम्—

प्रथमोऽङ्कः

अन्तःपुरे सीता रामश्च। अष्टावक्रमुनेः प्रवेशः। तस्य सविधे प्रजारञ्जनार्थं जानकीमपि परित्यजेयमिति रामस्य प्रतिज्ञा। आलेख्यं पश्यन्त्या सीतया तपोवनदर्शनाभिलाषप्रकटनम्। दुर्मुखस्य प्रवेशः, सीतायाश्चारित्रमधिकृत्यापवादविज्ञापनम्। रामस्य सीतानिर्वासन-सङ्कल्पः। (क्रमशः)

रसमञ्जरी

[श्रीक्षितीशचन्द्रचट्टोपाध्यायः]

[राजकीयसंस्कृतमहाविद्यालयस्य प्रधानशिक्षको बहिर्द्वारप्रकोष्ठे समासीनो वृत्तान्तपत्रं वाचयति। ततः प्रविशति कश्चिच्छीर्णकायः प्रतिभाप्रदीप्तवदनमण्डलः पुरुषः।]

पुरुषः। आर्य, नमो भवते।

शिक्षकः। ब्राह्मणाय नमः। उच्यतां किमर्थमागतो भवान्।

पुरुषः। भवतां विद्यालये प्रधानसंस्कृताध्यापकस्य पदं शून्यं वर्तते इति जनमुखादुपश्रुत्यागतोऽस्मि।

शिक्षकः। भवतैव काम्यते पदं ननु?

पुरुषः। आर्य, अथ किम्।

शिक्षकः। प्रधानपण्डितस्य पदे यः कोऽपि नियोक्तुं न शक्यते। भवता कानि शास्त्राणि तावदधीतानि?

पुरुषः। आर्य! अधिकशास्त्राध्ययनेन मोह एवाभिवर्धते। भवता तु पण्डितोऽपेक्ष्यते। पण्डा वेदोज्ज्वला बुद्धिर्यस्य स एव पण्डितो ननु। मम तु वेदोज्ज्वला बुद्धिः समधिका वर्तते। परीक्षितुमर्हति भवान्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिक्षकः। भवतु, पश्यामि। भाषायां संस्कृत-शिक्षको गुरुरिति व्यपदिश्यते। गुरुशब्दस्य का व्युत्पत्तिः ?

पुरुषः। गौरिव रौतीति गुरुः। अत एव यथा भगवती गौः पूज्यते एवं गुरुरपि पूजास्थानम्। एवमेव गवाभिसम्बन्धाद् गुणशब्दः संप्रवृत्तः। अत एव गुणाः पूजास्थानं गुणिष्विति कविवर्योक्तिः सङ्गच्छते।

शिक्षकः। अहो भवतः प्रज्ञाप्रकर्षः! अपरं किमपि प्रष्टुमिच्छामि।

पुरुषः। आर्य, अलं सङ्कोचेन। स्वच्छन्दं पृच्छ्यताम्।

शिक्षकः। पुरतः किं वा दृश्यते ?

पुरुषः। आर्य, घटिकायन्त्रम्।

शिक्षकः। किमिति घटिकायन्त्रमिदमहोरात्रं ध्वनति ?

पुरुषः। अलभ्यो यदायुःपलः स्वर्णभारै-
रहो तस्य दण्डो वृथा याति यामः।
दिनञ्च त्रियामा प्रमादान्नराणा-
मितीवानिशं घोषयन्ती घटीयम्॥*

शिक्षकः। अहो श्लाघनीया भवतः प्रतिभा। यन्त्रे यत् pendulum वर्तते, संस्कृतभाषया तत् कथं वर्णनीयम् ?

पुरुषः। आर्य, पिण्डलम्बशब्दस्यैवापभ्रंशः pendulum इति। भारतभूमिरेव प्रसूतिः सर्वेषां यन्त्राणाम्। (दूरे धूमशकटस्य शब्दः श्रूयते)।

शिक्षकः। Petroleum-साहाय्यकेनैव धूमशकटः प्रचलति। अपि नाम petroleum-शब्दोऽपि संस्कृत एव।

पुरुषः। कः सन्देहः? 'पार्थिवतैलम्' इति समस्तपदस्यैवापभ्रंशः petroleum इति। एवमेव कीटाशनशब्दापभ्रंशः kerosene इति।

* महाराजकृष्णचन्द्रेण पृष्टस्य बाणेश्वरविद्यालङ्कारस्यायं श्लोक इति-प्रसिद्धिः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिक्षकः। साधु, साधु। भद्र, Puja vacation इदानीं प्रत्यासीदति। कच्चित् vacation-शब्दोऽपि संस्कृत एव।

पुरुषः। अवश्यमेव। 'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः' इति वचनेन अवकाशनशब्दस्याकारलोपे वकाशनशब्दो निष्पन्नः। तस्यैव प्राकृतं रूपं vacation इति।

शिक्षकः। आर्या भवतां पाटवदर्शनेनातिमात्रं प्रीतोऽस्मि। यथा भवतामेवात्र पदे नियोगः स्यात् तथा प्रयतिष्ये। पण्डिताः प्रायेण गतानुगतिका एव भवन्ति। स्वतन्त्रमतीनां भवतामध्यापनेन छात्राणामज्ञानतिमिरं दूरमपसरेदिति मे द्रढीयान् प्रत्ययः।

पुरुषः। आर्य, अनुगृहीतोऽस्मि।

समालोचनम्

The Divine Songs of Zarathushtra—A Philological study of the Gathas of Zarathushtra, containing the Text with Literal Translation into English, a free English rendering and full critical and grammatical notes Metrical Index and Glossary by IRACH J. S. TARAPOREWALA, B. A., PH. D., Barrister-at-Law, Professor of Comparative Philology, University of Calcutta (1917-1929), Principal, M. F. Cama Athornan Institute, Andheri, Bombay (1930-1940), Director, Deccan College, Post-Graduate and Research Institute, Poona (1940-1941). Obtainable from D. B. Taraporewala Sons & Co. Ld., Treasure House of Books, 210 Hornby Road, Bombay 1. Royal 8vo. xlii & 1166. *Price Rupees Twenty-five only.*

अवितथं खलूक्तमभियुक्तैः—नीचैर्गच्छत्युपरि च दशा चक्रनेमि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रमेणेति । ये तावत् पारसीकाः प्राचीनभूमण्डले शाकद्वीपमधितिष्ठन्तस्त्रिभुवननिवासिनां वन्दनीया आसन्, यैश्च—

सूर्यं ध्यायन्ति ये वै हुतवहमनिलं वायुमाकाशमाद्यं
तोयं स[त्]पञ्चतत्त्वं त्रिभुवनसदनं न्यासमन्त्रैस्त्रिसन्ध्यम् ।
श्रीहोर्मज्दं सुरेशं बहुगुणगरिमाणं तमेवं कृपालुं
गौरा धीराः सुवीरा बहुबलनिलयास्ते वयं पारसीकाः ॥
स्नाने ध्याने सुपाठे हुतवहहवने प्राशनोत्सर्गकाले
शास्त्रोक्तं सप्तमौनं निदधति नृवराः सर्वदा सर्वदा नः ।
नानाधूपैः सुपुष्पैर्वरफलबहुलैः पूजयन्तीह धेनुं
गौरा धीराः सुवीरा बहुबलनिलयास्ते वयं पारसीकाः ॥
रम्यं वस्त्रं पवित्रं कवचगुणमयं कञ्चुकं ये धरन्ति
मुक्तामूर्णासकुश्तीमहिमुखसमताबन्धनं चैव कट्राम् ।
मूर्धानं वस्त्रगुप्तं पटयुगलतले रक्षणं कुर्वते ये
गौरा धीराः सुवीरा बहुबलनिलयास्ते वयं पारसीकाः ॥

इत्यादिभिः पद्यरत्नैः स्वगुणगणः संसूच्यते, यैः किल दुर्धर्षतमा ग्रीक्वीरा अपि दासभावमनीयन्त तेऽपि वीरप्रवराः कालचक्रस्यावर्तनेन मोहमदीयैर्विजिता भृशमशरणाः स्वधर्मं परित्यक्तवन्तः, तेषां धर्मग्रन्थाश्च विजेतृभिरङ्गारशेषतां नीताः । अत एव Moulton महोदयेनोक्तम्—

Alexander's destructiveness, if not purely mythical, was accidental : he was the last man to burn a literature of set purpose. It was otherwise with the Moslem invasion of the seventh century. When the choice was between death with the Avesta and life with the Koran, the palpable inferiority of the latter was easily overlooked. The faithful remnant who in the next century took refuge on the

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

hospitable shores of India, to find there a liberty of conscience which Mahommedan Persia denied them, brought with them only fragments of the litertaure that Sassanian piety had so laboriously gathered. Altogether, Prof. Williams Jackson calculates, about two-thirds of the Avesta have disappeared since the last Zoroastrian monarch sat on the Persian throne.*

इदानीं भारतवर्षेऽदूरलक्षाः पारसीकाः प्रतिवसन्ति। एषु च बहवो धनिकधुरीणा वाणिज्यनिष्णाताः स्वप्रावीण्येन पाश्चात्त्य-वणिक्प्रवरानपि ह्लेपयन्ति। ये च पारसीकेषु पण्डितप्रकाण्डाश्च धार्मिकधुरन्धराश्च तेष्वेवायमन्यतमस्तारापुरओयाला-महोदयः। प्राच्य-पाश्चात्त्यविविधभाषापारदृश्वना महात्मनानेन सुबहूनि वर्षाणि तपस्तप्त्वा गाथाविषयकं सुमनोरममिदं पुस्तकं प्रणीतम्। अत्र च प्रथमतो भूमिकायां व्याख्यानशैलीमधिकृत्य अधिकपञ्चाशानि पृष्ठानि विनियुक्तानि। न खल्वत्र पाश्चात्त्येषु श्रद्धाजाड्येन तेषामेव सरणिः सर्वत्रानुस्रियते ग्रन्थकारेण, परं धर्मग्रन्थेऽस्मिन् श्रेष्ठैरेव तत्त्वैरुप-निबद्धैर्भवितव्यम्, अत एव सति सम्भवे मूलानुसार्याध्यात्मिक एवार्थः स्वीकरणीयः इति मतमवलम्ब्य कालक्रमेण सुतरामेव दुर्बोधतामापन्नानां गाथानां परमरहस्योद्घाटने प्रयतितम्। अस्य च व्याख्यानस्य मूलसूत्राणि ग्रन्थकृता भूमिकायां सन्निविष्टानि, तानि च यथा—

1. The Gāthās must be judged *by themselves and in the light of their own contents.* In other words it would not be correct to understand a word from the Gāthās in the sense it has acquired in later Zoroastrian Literature.

2. *The nearest to the Gāthās, both in language and*

---

* Early Religious Poetry of Persia by J. H. Moulton, pp 13-14.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

spirit, stands the Vedic Literature of India. Hence at every step I have compared Vedic words, idioms and ideas.

3. The Gāthās, as the very name implies, are chants. The verification of the Gāthās, as also that of the Vedas, follows the invariable rule that "a unit of verse is also a unit of sense". I have rigorously observed this rule. The point has been missed by practically every one of the previous translators. As regards the Gāthā meter I have worked it out in my own way, guided almost entirely by my own ear.

All these have been set out in full in this book under the heading "Gāthā meter and Metrical Index."

5. *It is the thought of the Gāthās which is really profound.* My own experience has been that as I advance in years and in knowledge of life, I find deeper and deeper meanings in each verse.

"Veil after veil will lift—but there must be
Veil upon veil behind."

I have striven to go behind the mere words of the text. For each verse I have given first the Text with each word numbered consecutively. After that follows a literal, word for word, translation, in which each word is numbered to correspond with the Text. And after this literal rendering I have added a Free English rendering (in blank verse). In this "Free Rendering" I have striven to reach the *thought* underlying each verse.

6. *The Gāthās are spiritual in the fullest sense of the term.* Therefore it is essential to lift up their Message to spiritual heights and never to understand them at the ordinary earthly level. This was the main reason why no previous rendering of the Gāthās brought solace and inspiration to my soul. All of them have spoken of "cattle" and "fodder" and "pastures" as constituting the main theme

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

of the *Gāthās*. In the Bible the Lord Jesus Christ is spoken of as the "Good Shepherd" and His Message speaks of "sheep" and "folds". The Lord SHRI KRISHNA has been depicted as the Divine Cow-herd (*Gopāla*), dwelling among pastures and surrounded by cows. And the Lord SHIVA bears the name of *Pashupati* (Lord of Cattle). Like the "sheep" of Jesus, and the "cows" of Krishna, and the "cattle" of Shiva, the "cow" (*Gāv*) of the Gāthās represents Creation and more especially Humanity. And similarly all the other connected words occurring in the Gāthās are to be taken in a higher spiritual sense.

सर्वथा पुस्तकमिदं सर्वाङ्गसुन्दरं सञ्जातम्। न जानीमोऽत्रत्यं कतमं विषयं सविशेषं प्रशंसामः—मूलं वा, भाषान्तरं वा, टीकां वा, छन्दोविचितिं वा शब्दार्थप्रकरणं वा, सुविस्तृतां विषयसूचिं पाठ्यपुस्तकसूचिं वा। अवश्यं संग्राह्यमिदं पुस्तकं जातिधर्मनिर्विशेषेण सर्वैरेव प्रेक्षावद्भिरिति निर्मायं ब्रूमः। अत्र सुबृहतां पत्राणां द्वादशशती विराजते, मुद्रणप्रमादाः पुनः सुविरला एव, मूल्यमप्यस्योपयोगानुपातेनात्यल्पमेव। त्वरन्तां वाचकमहोदया अस्य संग्रहणाय।

An Introduction to Comparative Philology— By the late Dr. Pandurang Damodar Gune, M.A., Ph. D. edited by Prof. N. P. Gune, M. A. Sole Agents: Poona Oriental Book House, 330A Sadashiv Peth, Poona. 2. D. Crown pp. 258 and 67. Price Rs. 12-8.

भारतभूमिरेव शास्त्राणामितरेषामिव भाषातत्त्वस्यापि प्रसूतिः। सुप्राचीने निरुक्तग्रन्थेऽपि दृश्यते—"शवतिर्गतिकर्मा कम्बोजेष्वेव भाष्यते।...विकारमस्यार्येषु भाषन्ते शव इति। दातिर्लवनार्थे प्राच्येषु दात्रमुदीच्येषु" इति [२।२।८]। महाभाष्येऽपि तेषु तेषु प्रकरणेषु भाषातत्त्वगता बहवो विषया विकीर्णा वर्तन्ते। अधन्यतया पुनरस्माकमर्वाचीने काले वैयाकरणा लाघवमात्रमाद्रियमाणा भाषारहस्यानि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तृणावज्ञायमवजानन्ति। अपरमपि विषादकारणमस्माकं यद् यदा ग्रीसीयमनीषिभिः साकं भारतीयानां परिचयः समजनि तदा ग्रीसीयैर्भारतीया बर्बरा इति व्यपदिष्टाः, भारतीयैश्च ते म्लेच्छा इति, एवञ्च मुष्टिमेयैरेव कैश्चिद् ग्रीसीयैर्भारतीयभाषाधिगता, तथाविधैरेव च भारतीयैर्ग्रीसीयभाषेति सुसमृद्धयोरनयोर्भाषयोस्तुलनं न समभवत्। खृस्तीये १७६७ शके Coeurdoux-समाख्येन फरासीयेन बहूनामेव संस्कृतशब्दानां लाटिनशब्दैः सादृश्यं समुपवर्णितम्। ततश्च खृस्तीये १७९६ शके Sir William Jones महोदयेन संस्कृत-ग्रीक-लाटिन-भाषाणां समानमूलकत्वं प्रतिपादितम्। तत आरभ्य पाश्चात्त्यदेशेषु भाषाणां तुलनं तत्त्वाविष्कारश्चैधमानरयं प्रचलति। अस्मदीये देशे यानि तावद् द्वित्राणि भाषातत्त्वविषयकाणि पुस्तकानि विरचितानि तेष्वेवायमन्यतमो गुणेमहोदयस्य ग्रन्थः। अत्र प्रथमे भागे भाषाया वृद्धिक्षयस्थानगतानि मूलसूत्राणि, द्वितीये भाषावंशावली, तृतीये इन्दो-इराणीया भाषागोष्ठी, चतुर्थे पालिश्चानुशासनिकप्राकृतानि च पञ्चमे नाटकादिषूपलभ्यमानप्राकृतानि साम्प्रतिकहिन्दीवङ्गप्रभृतयो भाषाश्च समुपवर्णिताः। सम्पादकेन संयोजिते प्रथमे परिशिष्टे Hittite भाषा संवर्णिता, द्वितीये परिशिष्टे इन्दो युरोपीयभाषाभाषिणामभिजनमधिकृत्य विचारः प्रवर्तितः। अन्ते च The Greek Language, Indo-Aryan, Germanic and English, Some ancient and recent Marathi Borrowings समाख्या नातिविस्तृताः प्रबन्धाः सन्निविष्टाः। यद्यपि सर्वत्र ग्रन्थकृद्भिः सहास्माकमैकमत्यं न सम्भवति तथापि पुस्तकमिदमतीवोपादेयं छात्राणां च परमोपकारकमित्यत्र नास्ति संशयः। गुणेमहोदयस्य पुत्रेण पितुर्ग्रन्थं सुसंस्कृत्य प्रकाशयता न केवलं पुत्रकृत्यं सम्यगनुष्ठितं बहूनां प्रभूत उपकारोऽपि विहित इत्यवश्यमेवाभ्युपगन्तव्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथवा सन्त्येकपदान्यवधारणानि। तद् यथा अब्भक्षो वायुभक्ष इति। अप एव भक्षयति, वायुमेव भक्षयतीति गम्यते। एवमिहापि सिद्ध एव न साध्य इति।

अथवा पूर्वपदलोपोऽत्र द्रष्टव्यः—अत्यन्तसिद्धः सिद्ध इति। तद् यथा देवदत्तो दत्तः सत्यभामा भामेति।

अथवा व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणमिति नित्यपर्यायवाचिनो ग्रहणमिति व्याख्यास्यामः।

How have these rules of the venerable Ācārya Pāṇini been framed?

[*Sound and sense and the relationship subsisting between the two being established as eternal,* the use of words being determined by the sense current in popular speech, the science (of grammar) enjoins restrictions* (*i. e., the use of correct words to the exclusion of corrupt ones*) *for religious merit, just as we find in matters worldly and Vedic.*]

The sound-sense-relation being established as eternal,

The sound, the sense and the relationship (between the two) being established as eternal.

Now what is the meaning of the word "siddhaḥ"?

It is a synonym of "nitya".

How do you know that?

Since it is used in reference to objects that are unchangeable and immovable, as, for instance, the Heaven is *siddha*, the earth is *siddha*, the sky is *siddha*.

* "The connotation of a name is something inherent in the name, something with an existence independent of any human mind knowing and using the name: but that is surely absurd and contrary to all right ideas of the essence of language and human psychology." JESPERSEN, *Philosophy of Grammar*, p. 66.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Excuse me, Sir, it is also used with reference to things artificial, e. g., the rice is *siddha* (boiled), the soup is *siddha* (cooked), the barley is *siddha* (boiled, prepared). Since the word is used with reference to artificial things, how is it that "siddha" here is to be taken as the synonym of "nitya" and not as the one which is used in reference to artificial things. Since the word is used in the Saṁgraha as opposed to 'artificial' we conclude that it is used there in the sense of eternal, so also here.

Or, there are single-word restrictions also, *e. g.*, ab-bhakṣaḥ, vāyubhakṣaḥ. It is implied he lives on water only, he lives on air only. Exactly in the same way here also "siddha" means that which is "siddha" only and not "sādhya" (also .

Or, we are to understand here that the previous member of the compound has been dropped ; thus *siddhah* stands for *atyantasiddhah* absolutely eternal, as "Dattaḥ" stands for "Devadattaḥ" and "Bhāmā" for "Satyabhāmā".

Or, acc. to the dictum, "in cases of doubt the details may be gathered from the explanation and a rule should not be rejected on the ground of ambiguity" we shall explain that the word "siddha" used in this Vārttika is the synonym of "nitya".

कथं पुनरिति । "किमाचार्य एव स्रष्टा शब्दार्थसम्बन्धानाम्, अथ स्मर्ता" इति प्रश्नः । कैयटः । एवं व्याकरणारम्भं समर्थ्य "सिद्धे" इत्यादिकं वार्त्तिकमवतारयितुं "कथम्" इति भाष्यम् । तस्य तात्पर्यमाह--किमिति । स्रष्टा--यथा देवदत्तादिशब्दाः केनचिदर्थविशेषे सङ्केतिताः, यथा केनचिच्छिल्पिना वस्तुविशेषं निर्माय नामविशेषः क्रियते तद्वदित्यर्थः । स्मर्ता--लोकसिद्ध शब्दानाम् । अन्नंभट्टः ।

कूटस्थेषु--अविनाशिषु । lit. standing on the top, keeping to the highest position, hence immovable, uniform, unchangeable. कूटमयोघनः (hammer), तद्वत तिष्ठन्ति ये तेषु, संसर्गिनाशेऽपि स्वय-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनष्टेऽिन्नत्यर्थः । नन्वयोघनस्यापि तर्हि नित्यत्वं स्यात्, अत आह—अविनाशिन्विति । भाष्ये द्यावापृथिव्याद्यपि व्यावहारिकनित्यत्वाभिप्रायेण दृष्टान्तितम् । आकाशस्यापि व्यावहारिकनित्यत्वमेवाचार्यस्याभिमतम् । एवं च तत्र रूढत्वान्नित्यवाचकस्यैव ग्रहणमिति भावः । नागेशः ।

Saṁgraha is the name of an ancient work on the philosophy of grammar, the authorship of which is ascribed to Vyāḍi. In the Rāmāyaṇa we find :

ससूत्रवृत्त्यर्थपदं महार्थं ससंग्रहं सिध्यति वै कपीन्द्रः ।

Bhartṛhari says in his Vākyapadīya ii. 484-488 :

प्रायेण संक्षेपरुचीनल्पविद्यापरिग्रहान् ।
सम्प्राप्य वैयाकरणान् संग्रहेऽस्तमुपागते ॥
कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना ।
सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने ॥
अलंध्यगाधे गाम्भीर्यादुत्तान इव सौष्ठवात् ।
तस्मिन्नकृतबुद्धीनां नैवावास्थित निश्चयः ॥
बैजिसौभरहर्यक्षैः शुष्कतर्कानुसारिभिः ।
आर्षे विप्लाविते ग्रन्थे संग्रहप्रतिकञ्चुके ॥
यः पतञ्जलिशिष्येभ्यो भ्रष्टो व्याकरणागमः ।
काले स दाक्षिणात्येषु ग्रन्थमात्रे व्यवस्थितः ॥

[इह पुरा पाणिनीयेऽस्मिन् व्याकरणे व्याड्युपरचितं ग्रन्थलक्षपरिमाणं संग्रहाभिधानं निबन्धनमासीत् । पुण्यराजः] ।

In the Bhāṣya on ii. 3. 66 we find : शोभना खलु दाक्षायणस्य संग्रहस्य कृतिः ।

In the well-known stanza [Mahābhāṣya vii. 4. 92] :

किरतिं चर्करीतान्तं पचतीत्यत्र यो नयेत् ।
प्राप्तिज्ञं तमहं मन्ये प्रारब्धस्तेन संग्रहः ।

Saṁgraha does not appear to refer ro this treatise by Vyāḍi.

It is interesting to note in this connexion that both the Vārttikas of Vararuci and the sūtras of Sarvavarman begin with the word *siddha*, the first rule of the Kātantra Vyākaraṇa

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

being सिद्धो वर्णसमाम्नायः. In the Dhātupāṭha as it has come down to us "siddha" stands at the very end : पुनच्छादिषु ..धात्वर्थ इत्येव सिद्धम्. In the Kātantra Vyākaraṇa Vṛddhi stands at the end (आरुत्तरे वृद्धिः). In the *Vājasaneyi Prātis'ākhya* each chapter ends with वृद्धं वृद्धिः.

सिद्धशब्दस्य कः पदार्थः—नावयवार्थः पृच्छ्यते । कस्तर्हि ? समुदायार्थो लौकिकः, सामर्थ्यात् । रूढ़िशब्दो नित्यवाची सिद्धशब्दः । . . . कदाचिद्धि नित्यशब्दस्तमर्थमाह कदाचित् सिद्धशब्दः । भर्तृहरिः ।

संग्रहे नित्यपर्यायवाची, इहापि तदेव । कुतः ? संग्रहोऽप्यस्यैव शास्त्रस्यैकदेशः । तत्रैकतन्त्रत्वाद् व्याड़ेश्च प्रामाण्यादिहापि तथैव सिद्धशब्द उपात्तः ।

सन्त्येकपदान्यप्यवधारणानि—शब्दान्तरेणोपात्तस्यानवद्योतितमवधारणमवद्योत्यत एवशब्देन । यदा त्वर्थप्रकरणादेः सोऽर्थोऽभिव्यज्यते तदा एव-शब्दो न श्रूयते इत्यवधारणमेकपदमित्युच्यते । तत्र न कश्चिदपो भक्षयतीत्यब् भक्षः । अप एव यो भक्षयति सः । भर्तृहरिः । एव-शब्दप्रयोगे द्विपदमवधारणम्, द्योतकत्वेनैवशब्दस्यापेक्षणात् । यदा तु द्योतकमन्तरेण सामर्थ्यादवधारणं गम्यते तदैकपदमित्युच्यते । तत्र सर्व एवापो भक्षयतीत्यब्भक्षश्रुतिः सामर्थ्यान्नियममवगमयत्यप एव भक्षयतीति । इहापि नित्यानित्यव्यतिरेकेण राश्यन्तराभावात् सिद्धशब्दोपादानान्नियमोऽवगम्यते—सिद्ध एवेति । कार्याणां तु पदार्थानां प्रागभावप्रध्वंसाभावयोरपि सत्त्वात् सिद्धता नास्तीति न ते सिद्धा एव । कैयटः ।

यथाभिरूपाय कन्या दातव्येति अभिरूपशब्दस्य प्रकर्षात् प्रवृत्तिरभिरूपतमायेति एवं सिद्धशब्दोऽपि* ... । भर्तृहरिः ।

We find the word नित्य used in the sense of सिद्ध in the Bhāṣya on नित्यवीप्सयोः viii. 1. 4 : इह कस्मान्न भवति–हिमवान् खाण्डवः पारियात्रः समुद्र इति । नैष दोषः । अयं नित्यशब्दोऽस्त्येव कूटस्थेष्वविचालिषु भावेषु वर्तते । तद् यथा–नित्या द्यौः नित्या पृथिवी नित्यमाकाश-

---

* The reference is to Mahābhāṣya i. 4. 42. : लोके चाभिरूपायोदकमानेयम्, अभिरूपाय कन्या देयेति न चानभिरूपे प्रवृत्तिरस्ति तत्राभिरूपतमायेति गम्यते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यिति । अस्याभीक्ष्ण्ये वर्तते । तद्यथा—नित्यप्रहसितः नित्यप्रजल्पित इति । Also Bhāṣya on प्लुतावैच इदुतौ viii. 2. 106 : नित्येषु च शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोपजनविकारिभिः ।

कार्यप्रतिद्वन्द्विभावात्—cf. नित्यो वा स्यात् कार्यो वा (p. 48).

अब् भक्ष occurs in Smṛti literature in the sense of 'living entirely on water' :

ब्राह्मणमनृतेनाभिशपेत् पतनीयेनोपपातकेन वा मासमब्भक्षः शुद्धवतीरावर्तयेदश्वमेधावभृथं वा गच्छेत् । वशिष्ठधर्मसूत्रम् ।

अब्भक्षस्तृतीयः स कृच्छ्रातिकृच्छ्रः । गौतमधर्मसूत्र ३।८।२०

अब्भक्षैर्वायुभक्षैश्च शीर्णपर्णाशनैस्तथा । रामायण १।५१।२६

अब्भक्षा वायुभक्षाश्च प्लवमाना विहायसा ।
जुषन्ते पर्वतश्रेष्ठमृषयः पर्वसन्धिषु ॥ महा ३।१५९।१६

महापापोपापाभ्यां योऽभिशंसेन्मृषा परम् ।
अब्भक्षो मासमासीत स पापी नियतेन्द्रियः ॥ याज्ञवल्क्यसंहिता ३।२८५

देवदत्तो दत्तः सत्यभामा भामा—The principle is generally enunciated thus : नामैकदेशग्रहणेन नाममात्रग्रहणम्. Under I. I. 45 Patañjali says : दृश्यन्ते हि वाक्येषु वाक्यैकदेशान् प्रयुञ्जानाः पदेषु च पदैकदेशान् । वाक्येषु तावद्वाक्यैकदेशान् : प्रविश पिण्डीम् । प्रविश तर्पणम् । पदेषु पदैकदेशान् । देवदत्तो दत्तः सत्यभामा भामेति । Devadatta means 'given by God' Gk. *theosdotos*. Similarly we have Haradatta and Gaṅgadatta, the ā of Gaṅgā being shortened after the analogy of the first two. Bhagadatta occurs in the Mahābhārata. The original meaning of *bhaga* is 'dispenser, distributor, God' (Av. *bagha*, O. Persian *baga*), so *Bhagadatta* recorded in the Mahābhārata would correspond to Av. *baghadāta*. These words ending in '*datta* were often abbreviated into Datta which thus became a surname in Bengal. "Satya-bhāmā" lit. means 'whose wrath is true or genuine'. It may also mean 'of genuine brilliance'. "Bhāma" is a masc. abstract noun, but the fem. form "bhāmā" is used by itself as an abbrevia-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

tion of the entire name 'Satya-bhāmā'.* In the Mahābhārata "Satyā" is several times used for "Satyabhāmā" असतस्त्रीणां समाचारं सत्ये मामनुपच्छसि ३।२३२।१०, निरताहं सदा सत्ये भर्तॄणामुपसेवने ३।२३२।२८, उवाच सत्या सत्कृत्य पाञ्चाली धर्मचारिणीम् ३।२३२।६०. In Bengali Caraṇa is used for Hari-caraṇa, Sāradā-caraṇa etc., S'araṇa for Kālī-s'araṇa. The most interesting examples are probably *nibhā* and *nibhānanī*, names of girls fairly common in Bengal. Expressions like पूर्णचन्द्रनिभानना (नी), इन्दुबिम्ब-निभानना (नी) are abbreviated first into निभाननी and then still further abbreviated into निभा after the analogy of विभा, प्रभा etc. Similarly *s'armā* is used for *deva-s'armā* 'one who has God for his protector' (cf. Gk. *Theo-kharis, Lat. deo gratus*). From Gk. *margarites* 'pearl' we have in English the corruption of the first portion *Mag, Maggie, Meg, etc.* and that of the second portion in German *Gret-chen*. Similarly Dora is used in English for Theodora 'the gift of God' (Cf. Skt. Deva-dattā). In Greek also we often find either the first part or the second part of compound names which form the main body used, *e.g., Philios* for *Philo-doros, Hippias* for *Hipparkhos*. Bhartṛhari reads: अथवा पूर्वोत्तरपदलोपोऽत्र द्रष्टव्यः and remarks: किं पुनरत्र पूर्वोत्तर-पदलोपोपायः ? न ह्यनुच्चारितस्य देवदत्तशब्दस्य पाणिनिरन्यो वा कश्चित् समर्थो लोपं कर्तुम्। तत्रैके मन्यन्ते। ...समुदायस्मृतिः, तत एवार्थप्रतिपत्ति-रिति। एतदसम्यक्। ...यथा साधनसाध्यमामिक्षासमकालं वाजिनमपि निष्पद्यते, एवं सत्यभामाशब्देन सह सत्यशब्दो भामाशब्दश्च निष्पद्यते। तच्च पाणिनिर्लोप-द्वारेणैव भूतानामननिष्पादिनां साधुत्वमाचष्टे।

किं पुनरनेन वर्ण्येन ? किं न महता कण्ठेन नित्यशब्द एवोपात्तः, यस्मिन्नुपादीयमानेऽसन्देहः स्यात् ?

---

* I have not come across any instance of the use of "Bhāmā" for "Satyabhāmā" in early Sanskrit literature. स दृष्ट्वा शोभितं वध्वा तां शौरिमिव भामया। कथासरित्सागर ३९।१९७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मङ्गलार्थम् । माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं सिद्धशब्दमादितः प्रयुङ्क्ते। मङ्गलादीनि हि शास्त्राणि प्रथन्ते वारपुरुषाणि च भवन्त्यायुष्मत्पुरुषाणि च, अध्येतारश्च सिद्धार्था यथा स्युरिति ।

But why should such an explanation be necessary at all ? Why has not the word "nitya" itself been uttered in a loud voice – the word which when uttered would leave no room for doubt ?

For the sake of auspiciousness The Ācārya, bent on securing maṅgala (auspiciousness) uses the word Siddha at the beginning for the well-being of the great collection of S'āstras. Works which have auspicious words at the beginning spread far and wide, and the people connected with them become heroes and live long and the readers have their desires fulfilled.

Under i. 1. 1 we find मङ्गलादीनि हि शास्त्राणि प्रथन्ते, वीरपुरुषकाणि च भवन्त्यायुष्मत्पुरुषकाणि च, अध्येतारश्च वृद्धियुक्ता यथा स्युः। Again under 1. 3. 1 we read माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वकारमादितः प्रयुङ्क्ते। मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्त्यायुष्मत्पुरुषाणि च, अध्येतारश्च मङ्गलयुक्ता यथा स्युः ।

महता कण्ठेन—'बड़ गलाय' इति वङ्गभाषायाम् । "दोषयुक्तवाच्यमुपांशच्यते निर्दुष्टं तूच्चैरिति लोकप्रसिद्धमिति निर्दुष्टतानेन सूचिता ।" छाया।

अयं खलु नित्यशब्दो नावश्यं कूटस्थेष्वविचालिषु भावेषु वर्तते। किं तर्हि ? आभीक्ष्ण्येऽपि वर्तते, यथा नित्यप्रहसितः नित्यप्रजल्पित इति। यावताभीक्ष्ण्येऽपि वर्तते, तत्राप्यनेनैवार्थः स्यात्—व्याख्यानतो विशेषप्रतिपत्ति र्नहि सन्देहादलक्षणमिति। पश्यति त्वाचार्यो. मङ्गलार्थश्चैव सिद्धशब्द आदितः प्रयुक्तो भविष्यति,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शक्ष्यामि चैनं नित्यपर्यायवाचिनं वर्णयितुमिति। अतः सिद्धशब्द एवोपात्तो न नित्यशब्द इति।

Even this word "nitya" does not necessarily refer to objects which are unchangeable and immova ble. What then? It also denotes repetition as for instance, "nityaprahasitaḥ" perpetually laughing. "nityaprajalpitaḥ" perpetually prattling. Since it denotes repetition also, we can have our desired sense with the help of the maxim "in cases of doubt the details may be gathered from the explanation and a rule should not be rejected on the ground of ambiguity". The Ācārya perceives 'the word "siddha" denoting auspiciousness will be used at the beginning and at the same time I shall be able to explain it as synonymous with "nitya". It is for this reason that the word "siddha" has been used in preference to "nitya".

अथ कं पुनः पदार्थं मत्वैष विग्रहः क्रियते—"सिद्धे शब्दे अर्थे सम्बन्धे च" इति?

आकृतिमित्याह।

कुत एतत्?

आकृति र्हि नित्या द्रव्यमनित्यम्।

अथ द्रव्ये पदार्थे कथं विग्रहः कर्तव्यः?

सिद्धे शब्दे अर्थसम्बन्धे चेति। नित्यो ह्यर्थवतामर्थैरभिसम्बन्धः।

Now, with what sense in mind is the expression "siddhe s'abdārthasambandhe" resolved into "siddhe s'abde arthe sambandhe ca".

"Genus" says the writer.

How is this?

For "genus" is eternal, whereas individuals are transitory.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

If the words connote individuals how should the expression be resolved ?

"Siddhe s'abde'rthasambandhe ca" (when words and their relationship with meaning are established as eternal), for the relation of significant words with their significa-tion is eternal.

अथवा द्रव्य एव पदार्थ एष विग्रहो न्याय्यः—सिद्ध शब्दे अर्थे सम्बन्धे चेति। द्रव्यं हि नित्यमाकृतिरनित्या।

कथं ज्ञायते ?

एवं हि दृश्यते लोके मृत् कयाचिदाकृत्या युक्ता पिण्डो भवति, पिण्डाकृतिमुपमृद्य घटिकाः क्रियन्ते, घटिकाकृतिमुपमृद्य कुण्डिकाः क्रियन्ते। तथा सुवर्णं कयाचिदाकृत्या युक्तं पिण्डो भवति, पिण्डाकृति-मुपमृद्य रुचकाः* क्रियन्ते, रुचकाकृतिमुपमृद्य कटकाः क्रियन्ते, कटकाकृति-मुपमृद्य स्वस्तिकाः क्रियन्ते†। पुनरावृत्तः सुवर्णपिण्डः पुनरपरयाकृत्या

---

* Cf. S'abara on MS. i. 1. 5 : रुचकः स्वस्तिको वर्धमानक इति हि प्रत्यक्षं दृश्यते।

† Cf. S'ankara on BAU i. 2. 1 : "घटादिकारणस्याप्यसत्त्वमेव, अनुपमृद्य मृत्पिण्डादिकं घटाद्यनुत्पत्तेरिति चेत्, न, मृदादेः कारणत्वात्। मृत्सुवर्णादि हि तत्र कारणं घटरुचकादे र्न पिण्डाद्याकारविशेषः। तदभावे भावात्। असत्यपि पिण्डाद्याकारविशेषे मृत्सुवर्णादिकारणद्रव्यमात्रादेव घटरुचकादि-कार्योत्पत्तिर्दृश्यते। तस्मान्न पिण्डाकारविशेषो घटरुचकादिकारणम्। असति तु मृत्सुवर्णादिद्रव्ये घटरुचकादि र्न जायते इति मृत्सुवर्णादिद्रव्यमेव कारणम्, न तु पिण्डाद्याकारविशेषः...पिण्डादिपूर्वकार्योपमर्दे मृदादिकारणं नोपमृद्यते घटादिकार्यान्तरेऽप्यनुवर्तते।"

नवा कुण्डिका। नवा घटिका। असतश्च विवक्षा यथा। समुद्रः कुण्डिका। विन्ध्यो वर्धितकम्, स्रवति कुण्डिकोदकम्, स्रवति कुण्डिकाया उदकम्, स्रवति कुण्डिकोदकमिति विसृजतीति गम्यते, स्रवति कुण्डिकाया उदकमिति निष्क्रामतीति गम्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

युक्तः खदिराङ्गारसवर्णे कुण्डले भवतः। आकृतिरन्या चान्या च भवति, द्रव्यं पुनस्तदेव। आकृत्युपमर्देन द्रव्यमेवावशिष्यते।

Or, only when words are regarded as connoting individuals is the analysis "siddhe s'abde arthe sambandhe ca" correct, for *dravya* or individual is eternal, form or shape non-eternal.

How do you know this ?

We find in the world that earth when invested with a certain form turns into a clod, by crushing the clod-form, small pots are made, by crushing the pot-form, small pitchers are made. Similarly gold invested with a certain form becomes a lump (or nugget), by crushing the nugget-form rings are made, by crushing the ring-form bracelets are made, by crushing the bracelet-form Svastikas are made. Rolled over into a lump again the nugget becomes a pair of ear-rings of the colour of burning charcoal of Khadira-wood. The form undergoes successive changes ; the substance, however, remains the same. On the destruction of the form, the substance alone remains.

आकृतावपि पदार्थ एष विग्रहो न्याय्यः—सिद्धे शब्दे अर्थे सम्बन्धे चेति।

ननु चोक्तमाकृतिरनित्येति।

नैतदस्ति, नित्याकृतिः।

कथम् ?

न क्वचिदुपरतेति कृत्वा सर्वत्रोपरता भवति, द्रव्यान्तरस्था तूपलभ्यते* ॥

---

* Cf. S'abara i. I. 13: उपरतयोः संयोगविभागयोः श्रूयते इति चेत्, नैतदेवम्। न नूनमुपरमन्ति संयोगविभागाः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथवा नेदमेव नित्यलक्षणम्—ध्रुवं कूटस्थमविचाल्यनपायोपजनविकार्यनुत्पत्त्यवृद्ध्यव्यययोगि यत्तन्नित्यमिति। तदपि नित्यं यस्मिंस्तत्त्वं न विहन्यते।

किं पुनस्तत्त्वम् ?

तद्भावस्तत्त्वम्। आकृतावपि तत्त्वं न विहन्यते।

Even if the form or genus be regarded as the meaning of words this analysis (siddhe s'abde arthe sambandhe ca) is right.

But you have said, the form is non-eternal ?

That is not so. The form is eternal.

How ?

It is not dead everywhere merely because it is dead in some substances, but is found inhering in other substances.

Or the definition of "nitya" is not only "that which is constant and immovable, without destruction, development and transformation, without birth, growth and decay", that also is "nitya" in which the essence is not destroyed.

What, again, is "tattva" or essence ?

Tattva is that-ness, the essential characteristic or inherent attribute of a thing. In the form also the essence is not destroyed.

ध्रुवं कटस्थमिति संसर्गानित्यता (non-eternality due to association) परिहृता। अविचालीति परिणामानित्यता (non-eternality due to transformation) अनपायेत्यादिना प्रध्वंसानित्यता (non-eternality due to destruction)।

ध्रुवम्—स्वाभाविकवस्त्वन्तरसंसर्गरहितम्, कूटस्थम् आगन्तुकेन संसर्गरहितम्, अविचालि अपरिणामि। अपायोपजनविकाररहितमित्यस्यैव व्याख्यानम्—अनुत्पत्ति अवृद्धि अव्यययोगि इति। षड्भावविकारराहित्यं वानेन भाष्येणोच्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्र अपायो नाशः, उपजनः सत्ता, सम्बन्धः अस्तित्वम्। विकारः परिणामः, उत्पत्ति-वृद्धी प्रसिद्धे। व्ययोऽपक्षय इति। अन्नंभट्टः।

ध्रुवपदस्यैव व्याख्यानं कूटस्थमिति। रूपान्तरापत्तिर्विचालः, यथा पयसो दध्यादिरूपता। अनेन परिणामानित्यता परास्ता। उत्पत्तेः सत्तापर्यन्तत्वात् अनुत्पत्तीत्यनेन जन्मसत्तारूपौ भावविकारौ निरस्तौ। अवृद्धीत्यनेन तृतीया वृद्धिलक्षणा। अनुपजनेति चतुर्थः परिणामः, अनपायेति पञ्चमः अपचयः, अव्ययेति षष्ठो विनाशः।

The reference is to Nirukta i. 2. 8 : षड् भावविकारा भवन्तीति वार्ष्यायणिः—जायतेऽस्ति विपरिणमते वर्धतेऽपक्षीयते विनश्यतीति। "Acc. to Vārṣyāyaṇi there are six modifications of *becoming*—genesis, existence, alteration, growth, decay and destruction" Sarup. This passage is quoted by Patañjali in his Bhāṣya on भूवादयो धातवः I. I. 3.

अथवा किं न एतेन—इदं नित्यम्, इदमनित्यम् इति। यन्नित्यं तं पदार्थं मत्वैष विग्रहः क्रियते—सिद्धे शब्दे अर्थे सम्बन्धे चेति।

कथं पुनर्ज्ञायते—सिद्धः शब्दोऽर्थः सम्बन्धश्चेति।

लोकतः। यल्लोके अर्थमर्थमुपादाय* शब्दान् प्रयुञ्जते। नैषां निर्वृत्तौ यत्नं कुर्वन्ति। ये पुनः कार्या भावा निर्वृत्तौ तावत् तेषां यत्नः क्रियते। तद् यथा घटेन कार्यं करिष्यन् कुम्भकारकुलं गत्वाह—कुरु घटम्, कार्यमनेन करिष्यामीति, न तद्वच्छब्दान् प्रयोक्ष्यमाणो वैयाकरणकुलं गत्वाह—कुरु शब्दान् प्रयोक्ष्य इति। तावत्येवार्थमुपादाय शब्दान् प्रयुञ्जते।

Or, why should we bother about what is nitya and what is anitya? The analysis "siddhe s'abde arthe sambandhe ca" is made taking what is eternal as the meaning of the word.

---

* Cf. S'abara i. I. 16: न हि यकारं प्रयुञ्जाना इकारमुपाददते यथा कटं चिकीर्षुर्वीरणानि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

How is one to know that sound and sense and the relationship between the two are eternal ?

From the world, for in the world people think of diverse objects and use words to denote them, they make no effort to coin words. In the case of objects, however, which are produced, effort is made to produce them. Thus, for instance, a man who wants to use a jar goes to the potter's and says : Make a jar, I want to use it. But a man who wishes to use words does not go to the grammarian's and say : Make some words, I shall use them. Even without going to the house of a grammarian, he takes the object he needs and uses words.

प्रयोक्ष्यमाणः —Future participle Atm. of **प्र-युज्** to employ. This reading is to be preferred to the present participle of the desiderative **प्रयुयुक्षमाणः,** because of the future participle **करिष्यन्** in the previous clause. Atm. acc. to **प्रोपाभ्यां युजेरयज्ञपात्रेषु** and **पूर्ववत् सनः** .

तावत्येवार्थम्—बुद्ध्या वस्तु निरूप्य । कैयटः । तावत्येवेति । वैयाकरण-कुलमगत्वैवेत्यर्थः ।

यदि तर्हि लोक एषु प्रमाणम्, किं शास्त्रेण क्रियते ?

लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः* ।

लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः क्रियते । किमिदं धर्मनियम इति । धर्माय नियमो धर्मनियमः । धर्मार्थो वा नियमो धर्मनियमः । धर्मप्रयोजनो वा नियमो धर्मनियमः ।

If then the people be the final court of appeal with respect to them (words), what is the use of grammar ?

The use of words being determined by the sense current in popular speech, the science of grammar enjoins restrictions (i. e., the use of correct words to the exclusion of corrupt forms) for religious merit.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

What is this "dharma-niyamaḥ" ?

It is (a Tatpuruṣa with the final Dative) "dharmāya niyamaḥ" *i. e.* restriction for religious merit, or it is (a Karmadhāraya belonging to the S'ākapārthivādi group) "dharmārthaḥ niyamaḥ" or (to be more explicit) "dharma-prayojanaḥ niyamaḥ" *i.e*, restriction which has for its object religious merit.

धर्माय नियमः—Similarly, a little later on Patañjali explains **वृत्तिसमवायः** as **वृत्तये समवायः**. Following in the foot-steps of Patañjali, S'abarasvāmin explains **धर्मजिज्ञासा** as **धर्माय जिज्ञासा** under Mīmāṁsāsūtra i. i. i. Commentators hasten to point out that these are mere explanations and not grammatical dissolutions of the compounds, for acc. to Patañjali Pāṇini's rule **चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः** allows the dative to be compounded with another inflected word only when there is the relationship of the material and the thing made (**प्रकृतिविकृतिभाव**) between the two. This, they hold, is clear from the fact that Pāṇini includes in his rules the words **बलि** and **रक्षित**. What is a present given to the Mahārāja is *for* him, so there is **तादर्थ्य** present there, consequently the **चतुर्थी** compound in **महाराजबलिः** comes under the **तदर्थ** portion of the rule and it is unnecessary to make a specific mention of **बलि** in the rule for this purpose (**यो हि महाराजाय बलिः स महाराजार्थो भवति । तत्र तदर्थ इत्येव सिद्धम् । भाष्यम्**). The same remarks apply with greater force to the case of **रक्षित** also.

I find it difficult to subscribe to this view. I believe Pāṇini thought that in **महाराजाय बलिः** there is a clear case of **सम्प्रदाने चतुर्थी** and so also to a certain extent in the case of **गोरक्षितम्** and **अश्वरक्षितम्** if they be the examples intended by Pāṇini. It is difficult to accept the view of the commentators

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

that to make सम्प्रदाने चतुर्थी applicable to such cases the root दा must be present. Pāṇini says nothing of the kind. So we may dismiss the argument of Jinendrabuddhi who says :—

ननु च सम्प्रदाने चतुर्थ्यर्थं बलिरक्षितग्रहणं स्यात् । नैतदस्ति । ददातिकर्मणा ह्यभिप्रेयमाणस्य क्रियया वा सम्प्रदान-संज्ञेष्यते । न चेह ददाति-कर्मणा क्रियया वाभिप्रेयमाणतास्ति । तत् कुतः सम्प्रदाने चतुर्थी ।

We find in the Taittiriya Āraṇyaka: यस्मै भूतानि बलिमावहन्ति (i. 31. 2). Again we find: हिरण्यनाभये वितुदये कौबेरायायं बलिः and सर्वभूताधिपतये नमः where there is hardly any perceptible difference between the dative in connexion with बलिः and that in connexion with नमः.

If as Kaiyaṭa says: विकृतिः प्रकृत्या (i. e. विकृतिश्चतुर्थ्यन्ता प्रकृत्या सह समस्यते) be the rule of a predecessor of Pāṇini, then it is clear that the चतुर्थी compounds had grown more numerous by the time of Pāṇini who deliberately removed the restriction and thereby extended the scope of the rule. As Kātyāyana points out, even if we accept the view that a word in the dative denoting the thing made is compounded with a समर्थसुबन्त denoting the material, we have to make provision for cases like अश्वाय घासः अश्वघासः, श्वश्र्वै सुरा श्वश्रुसुरम् , हस्तये विधा (= अन्नम्) हस्तिविधा etc. (विकृतिः प्रकृत्येति चेदश्वघासादीनामुपसंख्यानम् २।१।३६।२).

Patañjali, no doubt, says that we should regard अश्वघास etc. as षष्ठी compounds, but there is no reason why we should have recourse to this round-about explanation to make it consistent with our imaginary explanation of Pāṇini's rule.

("अश्वघासादीनामुपसंख्यानं कर्तव्यमिति । न कर्तव्यम् । अश्वघासादयः षष्ठीसमासा भविष्यन्ति । यद्धि यदर्थं भवति, अयमपि तत्राभिसम्बन्धो भवति—अस्येदमिति । तद् यथा—गुरोरिदं गुर्वर्थमिति ।)

Haradatta's remarks in this connexion are interesting. He says : अथ रन्धनाय स्थालीत्यत्र षष्ठीसमासः कस्मान्न भवति। कश्चिदाह

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवत्येव, तद् यथा—गोग्रासः लीलाम्बुजं क्रीडासरः वासभवनं नाट्यशालेति। अपर आह—रन्धनस्थाल्यादयोऽनभिधानात् षष्ठीसमासा न भवन्तीति,* उभावपि प्रतिब्रूमः। येषु षष्ठीसमास इष्यते तेषु चतुर्थीसमास एवास्तु, येषु तु नेष्यते तेषु तु चतुर्थीसमास एवानभिधानान्नेष्यताम्। मा कारि ज्ञापनार्थं बलिरक्षितग्रहणम्। ... किञ्चैवं सति, सूत्रमेवैतदनर्थकम्, यूपदार्वादावपि षष्ठीसमास एवास्तु, "चतुर्थी तदर्थ" इत्येतत्तु "षष्ठी तदर्थ" इति क्रियताम्, ज्ञापकाच्च स्वरस्य व्यवस्था क्रियताम्। तत्रार्थभेदो भवति, षष्ठीसमासे सम्बन्धमात्रं गम्यते चतुर्थीसमासे तु तादर्थ्यं सम्बन्धविशेषः। नैषोऽस्ति विशेषः। आरभ्यमाणेऽपि चतुर्थीसमासे न दण्ड-वारितः षष्ठीसमासः, तत्रार्थप्रकरणादिना विशेषोऽवसेयः। यद्येवं केवलेऽपि षष्ठी-समासे तथा विशेषोऽवगंस्यते, किं च सिद्धान्तेऽश्वघासादिषु तावदर्थप्रकरणादिना तादर्थ्यावसायः, सर्वत्रैव तथास्तु नार्थोऽनेन। उच्यते। हितशब्देन तावत् षष्ठी-समासो न भवति तद्योगे चतुर्थ्या नित्यत्वादिति चतुर्थीसमास एव वक्तव्यः, ततश्च "क्ते च" इत्यत्रापि चतुर्थीग्रहणं कर्तव्यं 'गोहितम्' इत्याद्यर्थम्, एवं च 'गोरक्षित'मित्यत्र न स्यात् चतुर्थ्या [षष्ठ्या] असम्भवात्, "षष्ठी तदर्थ" इत्यस्य चाप्रसङ्गः प्रकृतिविकाराभावादिति रक्षितेनापि चतुर्थीसमास एव विधेयः, अर्थशब्देनापि योगे तादर्थ्यसम्बन्धविशेषस्य नियमेन प्रतीयमानत्वाच्चतुर्थ्या सम्भवितव्यमिति तेनापि चतुर्थीसमास एव कर्तव्यः, बलिसुखग्रहणमपि कर्तव्यम् तादर्थ्यस्य समासे नियमेन प्रतीतिर्यथा स्यादित्येवमर्थम्। तस्मादारब्धव्यमेव सूत्रम्, प्रकृतिविकारभाव एव समास इत्यस्य तु प्रयोजनं चिन्त्यम्।

It is also unnecessary for Kumārila Bhaṭṭa श्लोकवार्त्तिकम् १।११८-१२०) to explain away S'abara's धर्माय जिज्ञासा thus:

प्रकृत्या विकृतिर्यस्माच्चतुर्थ्यन्ता समस्यते।
तादर्थ्ये यूपदार्वादौ तेनास्मिन्न समासता॥
स हि तस्येत्यनेनोक्तो धर्मस्येत्येष विग्रहः।
धर्मायेति तु तादर्थ्ये षष्ठी वृत्तेति कथ्यते॥
प्राप्नोत्यत्र चतुर्थ्येव विशेषश्चेद्विवक्षितः।
सामान्यस्य विवक्षायां तादृशः कथ्यते कथम्॥

* The reference here is to Kaiyaṭa who says: रन्धनस्थाल्यादयस्त्वनभिधानान् षष्ठीसमासा न भवन्ति.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

41126

Dr. Suniti Kumar Chatterji, M.A., D.LITT. (London)
Professor, Calcutta University, writes :

The *Manjusha* is run by Dr. Kshitish Chandra Chatterjee of the University of Calcutta, who is one of our most erudite authorities on the technical and other niceties of Sanskrit grammar. He is a student of languages and, in addition, he handles Sanskrit with ease. It has been his love of Sanskrit that has made him carry on the work of editing and bringing out this paper since its inception by himself. Financially it has been a thankless task. It has brought other disadvantages also—the editing and financing of a journal without much wide appeal because of its language has been a source of worry which has had its repercussions on his health. But he has not given in, because he is an incorrigible optimist when he is convinced his cause is noble. Prof. Chatterjee is quite an institution in himself. Then, he has been able to enist a number of disinterested colleagues who help him with contributions and who are enthusiasts for Sanskrit like himself. And he himself writes. It is a remarkable thing that although he finds joy in unravelling the intricacies of Sanskrit grammar, he is not in his mental make-up a dry-as dust grammarian. He has a wonderful sense of humour supported by an inexhaustible fund of anecdotes and stories which he brings out in racy Sanskrit. So the pages of the *Manjusha* at times sparkle with laughter. Comparative linguistic he brings in frequently in his articles, and this is a remarkable "special feature" of this little paper. Further, it does not confine itself to Sanskrit alone. Proverbs, *Bon-mots*, wise sayings, *Mahavakyas*, etc. from different languages, English, French, German, Latin, etc., are rendered appropriately into Sanskrit, demonstrating the capacity of the language of the Gods to keep pace with turns of expression peculiar to various languages. One can say also that there is an "English Section" to this magazine, devoted as it is entirely to the culture of Sanskrit. Thus, the editor himself is bringing out through this magazine, in instalments, his English translation and commentary on the *Mahabhashya* of Patañjali which, when completed, will be a valuable contribution to the study of Sanskrit grammar through English.

A journal like this deserves a much wider appreciation which is its due. I think our high school students reading Sanskrit will find much of interest, pleasure and profit in it.

Printed and published by Sri Jyotish Chandra Chatterjee, B. A. from 81, Shyambazar Street, Calcutta—4. Printed at the Elm Press 63, Beadon Street, Calcutta—6

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

MANJUSHA (Sanskrit Monthly Magazine)

Registered No. C. 3278

काव्यालङ्कारसूत्रवृत्तिः (वामनविरचिता ५।१)

अभिनवविशदविस्तृतटीकोपेता Rs. 2

Convocation Address in Ancient India -8-

स्त्रीप्रशंसा—The original slokas of Varāhamihira with a splendid Sanskrit commentary Re. 1/-

Popular Etymology Re. 1/-

শব্দকথা—সরস সরল ভাষাতত্ত্ব— ২৲

ঊষার আলো—হাসির গল্পের সমষ্টি— ৸০

নক্ষত্রমালা—ধর্মবিষয়ক শ্লোক ও অনুবাদ— ।৴০

Several complete sets of Vol. IV of the Manjusha are still available for Rs. 6/- and only a few sets of Vols. I-III are available at Rs. 5/12/- for the lot.

TECHNICAL TERMS AND TECHNIQUE OF

SANSKRIT GRAMMAR

A Critical, Comparative and Historical Study

BY

KSHITISH CHANDRA CHATTERJI, SASTRI, M. A., D. LITT.

Lecturer, Calcutta University ;
Formerly Editor, Calcutta Oriental Journal,
Surabharati, Oriental Literary Digest, etc.. etc.

"We have nothing but admiration for this masterpiece of scholarship." *Modern Review.*

Price Rupees Ten only. *Foreign Rs. 12/-*

Postage Extra.

VISVANATH CHATTERJI

81, Shyambazar Street,

CALCUTTA—4

Phone : B. B. 4049

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Compiled
1999-2000

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri